एषोऽहं गृहीत्वा केशहस्ते दुःशासनस्यानुकृतिं करोमि॥

ननु प्रेक्षस्व ननु प्रेक्षस्व।

सिर काट डालूं अथवा मारूं कलम करना

असिः सुतीक्ष्णो वलितं च मस्तकं कल्पये शीर्षमुत मारयामि वा।
अलं तवैतेन पलायितेन मुमूर्षुर्यो भवति न स खलु जीवति॥] सिर को मैं मारना चाहता हूं वह भागने पर भी बच नहीं पाता।

वसन्तसेना—अज्ज अबला क्खु अहम्। [आर्य अबला खल्वहम्।]

विटः—अत एव ध्रियसे। इसीलिए अभी तक जिन्दा हो।

शकारः—अदो ज्जेव ण मालीअशि। [अत एव न मार्यसे।]

वसन्तसेना—(स्वगतम्) कधं अणुणओ वि शे भअं उप्पादेदि। भोदु। एव्वं दाव। (प्रकाशम्) अज्ज इमादो किंपि अलंकरणं तक्कीअदि। [कथमनुनयोऽप्यस्य भयमुत्पादयति। भवतु। एवं तावत्।... आर्य अस्मात्किमप्यलंकरणं तर्क्यते।]

विटः—शान्तम्¹। भवति वसन्तसेने न पुष्पमोषमर्हत्युद्यानलता। तत्कृतमलंकरणैः। Re

वसन्तसेना—ता किं क्खु दाणिम्। [तत्किं खल्विदानीम्।]

शकारः—हगे वरपुलिशमणुश्शे² वाशुदेवके कामइदव्वे। [अहं वरपुरुषमनुष्यो वासुदेवः कामयितव्यः।] तुम्हारे द्वारा मुझे प्रेम किया जाना चाहिए।

Vasantasenā :—Sir, I [am] indeed a [helpless] woman!

Viṭa :—Hence alone, you [still] live!

Śakāra :—Hence alone, you are not being killed!

Vasantasenā :—(*To herself*) How, even his courtesy [or propitiation] creates terror [in me]! Well, [I shall do] just thus. (*Aloud*) Sir, is some ornament or other being sought from this [person, that is, me] ?

Viṭa :—God forbid [lit. peace]! Lady, Vasantasenā, a garden-creeper does not deserve to be robbed of [its] blossoms. So, away with [that is, speak not of] the ornaments!

Vasantasenā :—Then what indeed [is it] now [that you harass me for] ?

Śakāra :—I, an excellent person and a human being, [a veritable] Vāsudeva ought to be made love to [by you].

---

१ शान्तं पापम्। २ वेरपुलिशे मणुश्शे।

वसन्तसेना—(सक्रोधम्) शन्तं शन्तम्। अवेहि। अणज्जं मन्तेसि। [शान् शान्तम्। अपेहि। अनार्यं मन्त्रयासि।]

शकारः—([१]संतालिकं विहस्य) भावे भावे पेक्ख दाव। [२]मं अन्तलेण शुशिणिद्धा एशा गणिआदालिआ णम्। जेण मं भणादि—एहि। शन्तेशि किलिन्तेशि त्ति। हगे ण गामन्तलं ण णगलन्तलं वा गडे। अज्जुके शवामि भावश्श शीशं अत्तणकेहिं पादेहिं। तव जेव पश्चाणुपाश्चिआए आहिण्डन्ते शन्ते किलिन्ते म्हि शंवुत्ते। [भाव भाव प्रेक्षस्व तावत्। मामन्तरेण सुस्निग्धैषा गणिकादारिका ननु। येन मां भणाति—एहि। श्रान्तोऽसि। क्लान्तोऽसि इति। अहं न ग्रामान्तरं न नगरान्तरं वा गतः। भट्टालिके शपे भावस्य शीर्षमात्मीयाभ्यां पादाभ्याम्। तवैव पृष्ठानुपृष्ठिकयाहिण्डमानः श्रान्तः क्लान्तोऽस्मि संवृत्तः।]

extremely affectionate

form of oath

विटः—(स्वगतम्) अये कथं शान्तमित्यभिहिते श्रान्त इत्यवगच्छति मूर्खः। (प्रकाशम्) वसन्तसेने वेशवासविरुद्धमभिहितं भवत्या। पश्य

युवक जन ही गणिका के सहायक होते हैं- ऐसा तुम्हें सोचना चाहिए- अपना मार्ग नहीं भूलना चाहिए।

तरुणजनसहायश्चिन्त्यतां वेशवासो
विगणय गणिका त्वं मार्गजाता लतेव।
वहसि हि धनहार्यं पण्यभूतं शरीरं
सममुपचर भद्रे सुप्रियं [३]चाप्रियं च॥ ३१॥

Vasantasenā :—(*Indignantly*) Shut up! Stop! Get away. You talk of something unworthy!

Śakāra :—(*Laughing while clapping his hands*) Bhāva, Bhāva, just see. I say, this courtezan-girl [is] extremely (*su*) affectionate towards me, so that [she] says to me—'Come on, you are tired, you are fatigued.' [Now] I have not gone to another village or to another city. Lady, I swear by the head of Bhāva, [and] by my own feet, that I have become tired [and] fatigued, wandering about close upon your heels alone!

Viṭa :—(*To himself*) Oh, how [this] fool understands 'fatigued' when [she] has said 'Shut up'. (*Aloud*) Vasantasenā, your ladyship has said [something] contrary to [your] stay in the Courtezan-square. See—

> Let it be borne in mind that the stay in the Courtezan-quarters [that is, a courtezan's life] has young men as helpers. Note that you, a courtezan [are] like a creeper grown on the way-side. You again possess a body kept for sale [and] to be secured by wealth. Good lady, wait upon [therefore] equally one very agreeable and one disagreeable [to you]! (31)

---

[१] सहस्ततालं। [२] मं dropped. [३] चाप्रियं वा।

अपि च

वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः मयूर द्वारा
फुल्लां नाम्यति वायसोऽपि हि लतां या नामिता बर्हिणा।
ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे
त्वं वापीव लतेव नौरिव जनं वेश्यासि सर्वं भज ॥ ३२ ॥

वसन्तसेना—गुणो क्खु अणुराअस्स कारणम् ण उण बलक्कारो। [गुणः खल्वनुरागस्य कारणम् न पुनर्बलात्कारः।]

शकारः—भावे भावे एशा गब्भदाशी कामदेवाअदणुज्जाणादो पहुदि ताह दलिद्दचालुदत्ताह अणुलत्ता ण मं कामेदि। वामदो तश्श घलम्। जधा तव मम अ हत्थादो ण एशा पलिब्भंशादि तधा कलेदु भावे। [भाव भाव एषा गर्भदासी कामदेवायतनोद्यानात्प्रभृति तस्य दरिद्रचारुदत्तस्यानुरक्ता न मां कामयते। वामतस्तस्य गृहम्। यथा तव मम च हस्तान्नैषा परिभ्रश्यति तथा करोतु भावः।]

विटः—(स्वगतम्) यदेव परिहर्तव्यं तदेवोदाहरति मूर्खः। कथं वसन्तसेनार्यचारुदत्तमनुरक्ता। सुष्ठु खल्विदमुच्यते—रत्नं रत्नेन संगच्छते इति। तद्गच्छतु। किमनेन मूर्खेण। (प्रकाशम्) काणेलीमातः वामतस्तस्य सार्थवाहस्य गृहम्।

And further,

A well-versed eminent Brāhmaṇa as also an idiot of the lowest caste—[both] bathe in [the same] well; even a crow again bends down the same blossomed creeper that was bent down by a pea-cock; by the same boat by which Brāhmaṇas, Kṣatriyas and Vaiśyas cross over [the river], cross the others [that is, the Śūdras]. You are a courtezan, like the well, like the creeper, like the boat; [so], wait upon all people [without discrimination]. (32)

Vasantasenā :—Merit indeed [is] the cause [or inspirer] of love, not again, force.

Śakāra :—Bhāva, Bhāva, this slave-by-birth deeply attached to that poor Cārudatta, since [her visit to] the garden of the Kāmadeva temple, does not love me. His house [is] to the left. So, let Bhāva so arrange that this one does not slip away from your [his] or my hands.

Viṭa :—(*To himself*) [This] fool is relating the very thing that ought to be kept back. What, Vasantasenā [is] deeply attached to the noble Cārudatta! It is indeed well said—'A gem is united with a gem.' So, let her go. What

शकारः—अध इं । वामदो तश्श घलम् । [अथ किम् । वामतस्तस्य गृहम् ।]

वसन्तसेना—(स्वगतम्) अम्महे । वामदो तस्स गेहं त्ति जं सच्चं अवरज्झन्तेण वि दुज्जणेण उवकिदम् जेण पिअशङ्गमं पाविदम्¹ । [आश्चर्यम् वामतस्तस्य गृहमिति यत्सत्यम् अपराध्यतापि दुर्जनेनोपकृतम् येन प्रियसंगमः प्रापितः ।]

शकारः—भावे भावे बलिए क्खु अन्धआले माशलाशिपविट्टा विअ मशीगुडिआ दीशन्दी ज्जेव पणट्टा वशन्तशेणिआ । [भाव भाव बलीयसि खल्वन्धकारे माषराशिप्रविष्टेव मसीगुटिका दृश्यमानैव प्रनष्टा वसन्तसेनिका ।]

विटः—अहो बलवानन्धकारः । तथाहि ।

आलोकविशाला मे सहसा तिमिरप्रवेशविच्छिन्ना ।
उन्मीलितापि दृष्टिर्निमीलितेवान्धकारेण ॥ ३३ ॥

अपि च

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ ३४ ॥

शकारः—भावे भावे अण्णेशामि वशन्तशेणिअम् । [भाव भाव अन्विष्यामि वसन्तसेनिकाम् ।]

[have I to do] with this fool ? (*Aloud*) Son of Kāṇelī, [is] the house of that big merchant to the left ?

Śakāra :—Just so. His house [is] to the left.

Vasantasenā :—(*To herself*) Ah ! To speak the truth, by [saying] that his house [is] to the left, the wicked fellow, although offending [me] has [actually] obliged [me] in that, union with [my] beloved has been accomplished.

Śakāra :—Bhāva, Bhāva, in [the] pitchy darkness indeed, has disappeared [or, been quite lost] Vasantasenā, while just being seen, like a small ball of soot entering into a heap of black beans.

Viṭa :—Oh ! [How] dense [is the] darkness ! For,

My eye [sight], reaching far, when there is light, [but] suddenly cut off by entering into gloom, although fully opened up, is as though closed up by darkness ! (33)

And further,

Darkness is, as though, besmearing the limbs; the sky is, as though, showering forth [black] collyrium; the eye-sight, like service of an unworthy person, has become fruitless ! (34)

Śakāra :—Bhāva, Bhāva ! I shall make a search for Vasantasenā.

---

१ पाविदा

विटः—काणेलीमातः अस्ति किंचिच्चिह्नं यदुपलक्षयसि ।

शकारः—भावे भावे किं विअ । [भाव भाव किमिव ।]

विटः—भूषणशब्दं सौरभ्यानुविद्धं माल्यगन्धं वा ।

शकारः—शुणामि मल्लगन्धम् । अन्धआलपूलिदाए उण णाशिआए ण शुव्वत्तं पेक्खामि भूशणशद्दम् । [शृणोमि माल्यगन्धम् । अन्धकारपूरितया पुनर्नासिकया न सुव्यक्तं पश्यामि भूषणशब्दम् ।]

विटः—(जनान्तिकम्) वसन्तसेने

कामं प्रदोषतिमिरेण न दृश्यसे त्वं
सौदामनीव जलदोदरसंधिलीना ।
त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं
गन्धश्च भीरु मुखराणि च नूपुराणि ॥ ३५ ॥

श्रुतं वसन्तसेने ।

वसन्तसेना—(स्वगतम्) सुदं गहिदं अ । (नाट्येन नूपुराण्युत्सार्य माल्यानि चापनीय किंचित्परिक्रम्य हस्तेन परामृश्य) अम्मो भित्तिपरामरिससूइदं पक्खदुआरअं क्खु एदम् । जाणामि अ संजोएण गेहस्स संवुदं पक्खदुआरअम् । [श्रुतं गृहीतं च ।...अहो भित्तिपरामर्शसूचितं पक्षद्वारकं खल्वेतत् । जानामि च संयोगेन गेहस्य संवृतं पक्षद्वारकम् ।]

Viṭa :— Son of Kāṇelī, is there any indication [about her] which you notice ?

Śakāra :—Bhāva, Bhāva ! What like ?

Viṭa :—The tinkling of the ornaments or the scent of the garlands, blended with sweet fragrance.

Śakāra :—I hear the scent of the garlands, but I cannot see quite distinctly the tinkling of the ornaments with [my] nose filled with darkness.

Viṭa :—(*Aside*) Vasantasenā !

True, you are not seen owing to the evening gloom, like the lightning lying low in the gap of the cloud-interior; but this scent again arising from the garlands would point out to you [and O] timid one, the anklets likewise [are] noisy. (35)

Did you hear, Vasantasenā ?

Vasantasenā :—(*To herself*) I have heard and [also] understood. (*Gesticulating pulling up her anklets and taking off the garlands, moving about a little, and feeling by the hand*) Ah ! This [is] indeed a side-door indicated by the feel about the wall.

---

१ संधिलीना ।

चारुदत्तः—वयस्य समाप्तजपोऽस्मि । तत्सांप्रतं गच्छ । मातृभ्यो बलिमुपहर ।

विदूषकः—भो ण गमिस्सम् । [भोः न गमिष्यामि ।]

१ **चारुदत्तः**—धिक्कष्टम् ।

दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न संतिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः ।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत्परैरपि कृतं तत्तस्य संभाव्यते ॥ ३६ ॥

अपि च

संगं नैव हि कश्चिदस्य कुरुते संभाषते नादरा-
त्संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
Re मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥ ३७ ॥

अपि च

And I know by the joining [of the panes] that the side-door of the house is closed up.

Cārudatta :—Friend, I have finished the muttering of the Mantras. So, go now ; offer oblation to the Mothers.

Vidūṣaka :—Oh, I will not go.

Cārudatta :—Fie ! Alas !

Owing to [his] poverty, a man's relatives do not stand by [or, act up to his] words ; [his] extremely intimate friends turn [their] faces away [from him] ; miseries multiply ; [his] spirit declines ; the lustre of the moon in the form of [his] character fades away ; and what sinful deed is done even by others is attributed to [or, regarded as possibly done by] him. (36)

And further,

No one, verily, keeps company with him, or converses respectfully [with him]; when gone to the mansions of the wealthy on festive occasions, he is looked down upon with contempt ; having [only] scanty clothing, he moves about only at a distance from the big people, owing to shame ; I willingly consider pennilessness as another sixth great sin ! (37)

And further,

---

१ सहसा ।

दारिद्र्य शोचामि भवन्तमेवमस्मच्छरीरे सुहृदित्युषित्वा ।
विपन्नदेहे मयि मन्दभाग्ये ममेति चिन्ता क्व गमिष्यसि त्वम् ॥ ३८ ॥

विदूषकः—(सवैलक्ष्यम्) भो वअस्स जइ मए गन्तव्वम् ता एसा वि मे सहाइणी रदणिआ भोदु । [भो वयस्य यदि मया गन्तव्यम् तदेषापि मम सहायिनी रदनिका भवतु ।]

चारुदत्तः—रदनिके मैत्रेयमनुगच्छ ।

चेटी—जं अज्जो आणवेदि । [यदार्य आज्ञापयति ।]

विदूषकः—भोदि रदणिए गेण्ह बलिं पदीवं अ । अहं अपावुदं पक्खदुआरअं करेमि । [भवति रदनिके गृहाण बलिं प्रदीपं च । अहमपावृतं पक्षद्वारकं करोमि ।]
(तथा करोति)

वसन्तसेना—मम अब्भुववत्तिणिमित्तं विअ अवावुदं पक्खदुआरअम् । ता जाव पविसामि । (दृष्ट्वा) हन्द्धी हन्द्धी । कधं पदीवो । [ममाभ्युपपत्तिनिमित्तमिवापावृतं पक्षद्वारकम् । तद्यावत्प्रविशामि । ...हा धिक् हा धिक् । कथं प्रदीपः ।]
(पटान्तेन निर्वाप्य प्रविष्टा)

चारुदत्तः—मैत्रेय किमेतत् ।

विदूषकः—अवावुदपक्खदुआरएण पिण्डीभूदेण वादेण णिव्वाविदो पदीवो ।

[O] Poverty! I feel sorry for you—having stayed thus in our body like a friend, where would you be going when I, luckless that I am, have [my] body done up?—this [is] my anxiety! (38)

Vidūṣaka :—(*With embarrassment*) O friend, if I must go, then let this Radanikā also be my companion [that is, accompany me].

Cārudatta :—Radanikā, follow Maitreya.

Ceṭī :—As the noble one commands.

Vidūṣaka :—Worthy [or, lady] Radanikā, take the oblation and the lamp. I shall unfasten the side-door. [*Does accordingly*

Vasantasenā :—The side-door has been unfastened as though for the purpose of favouring [or, receiving] me. So, I shal just enter. (*Seeing*) Alas! Oh, the pity of it! How, a lamp!

[*Putting out the lamp with the skirt of her garment, goes in*

Cārudatta :—Maitreya, what [is] this?

Vidūṣaka :—The lamp has been extinguished by the wind coming in a gust owing to the side-door being opened. Worthy

भोदि रदणिए णिक्कम तुमं पक्खदुआरएण। अहंवि अब्भन्तरचदुस्सालादो पदीवं पज्जालिअ आअच्छामि । [अपावृतपक्षद्वारेण पिण्डीभूतेन वातेन निर्वापितः प्रदीपः। भवति रदनिके निष्काम त्वं पक्षद्वारकेण । अहमप्यभ्यन्तरचतुःशालातः प्रदीपं प्रज्वाल्यागच्छामि ।]

(इति निष्क्रान्तः)

शकारः—भावे भावे अण्णेशामि वशन्तशेणिअम् । [भाव भाव अन्वेषयामि वसन्तसेनिकाम् ।]

विटः—अन्विष्यतामन्विष्यताम् ।

शकारः—(तथा कृत्वा) भावे भावे गहिदा गहिदा । [भाव भाव गृहीता गृहीता ।]

विटः—मूर्ख नन्वहम् ।

शकारः—इदो दाव भविअ एअन्ते भावे चिट्ठदु । (पुनरन्विष्य चेटं गृहीत्वा) भावे भावे गहिदा गहिदा । [इतस्तावद्भूत्वा एकान्ते भावस्तिष्ठतु । ...भाव भाव गृहीता गृहीता ।।

चेटः—भट्टके चेडे हगे । [भट्टारक चेटोऽहम् ।]

शकारः—इदो भावे इदो चेडे । भावे चेडे चेडे भावे । तुम्हे दाव एअन्ते चिट्ठ । (पुनरन्विष्य रदनिकां केशेषु गृहीत्वा) भावे भावे शंपदं गहिदा गहिदा वशन्तशेणिआ ।

Radanikā, you get out by the side-door. I, on my part, would come, having lighted the lamp from the inner quadrangle. [*Exit*

Śakāra :—Bhāva, Bhāva, I shall make a search for Vasantasenā !

Viṭa :—Search on, search on.

Śakāra :—(*Doing accordingly*) Bhāva, Bhāva, [she is] caught, caught !

Viṭa :—Fool, [it is] I surely.

Sakāra :—Just going to this side, let Bhāva stay on in a corner. (*Searching again, and taking hold of* Ceṭa) Bhāva, Bhāva, [she is] caught, caught !

Ceṭa :—Master, [it is] I, Ceṭa.

Śakāra :—Here, Bhāva; here Ceṭa. Bhāva, Ceṭa; Ceṭa, Bhāva. Both of you, stay on just in a corner. (*Again searching, grasping* Radanikā *by the hair*) Bhāva, Bhāva, now [is] caught. [definitely] caught Vasantasenā.

अन्धआले पलाअन्ती मल्लगन्धेण शूइदा ।
[1]केशविन्दे पलामिट्टा चाणक्केणेव्व दोव्वदी ॥ ३९ ॥

[इतो भावः इतश्चेटः । भावश्चेटः चेटो भावः । युवां तावदेकान्ते तिष्ठतम् ।
...भाव भाव सांप्रतं गृहीता गृहीता वसन्तसेनिका ।
अन्धकारे पलायमाना माल्यगन्धेन सूचिता ।
केशवृन्दे परामृष्टा चाणक्येनेव द्रौपदी ॥]

विटः—एषासि वयसो दर्पात्कुलपुत्रानुसारिणी ।
केशेषु कुसुमाढ्येषु सेवितव्येषु कर्षिता ॥ ४० ॥

शकारः-एशाशि वाशू शिलशि ग्गहीदा केशेशु वालेशु शिलोलुहेशु ।
अक्कोश विक्कोश लवाहिचण्डं शंभुं शिवं शंकलमीशलं वा ॥४१॥

[एषासि वासु शिरसि गृहीता केशेषु वालेषु शिरोरुहेषु ।
आक्रोश विक्रोश लपाधिचण्डं शंभुं शिवं शंकरमीश्वरं वा ॥]

रदनिका—(सभयम्) किं अज्जमिस्सेहिं ववसिदम् । [किमार्यमिश्रैर्व्यवसितम् ।]

विटः—काणेलीमातः अन्य एवैष स्वरसंयोगः ।

शकारः—भावे भावे जधा दहिशरपालिलुद्धाए मज्जालीए शलपलिवत्ते होदि तधा दाशीए धीए शलपलिवत्ते कडे । [भाव भाव यथा दधिशरपरिलुब्धाया मार्जारिकायाः स्वरपरिवृत्तिर्भवति तथा दास्याःपुत्र्या स्वरपरिवृत्तिः कृता ।]

---

fleeing away in the darkness, betrayed [or, indicated] by the scent of garlands, taken hold of by the mass of hair, like Draupadī by Cāṇakya. (39)

Viṭa :—

Here are you dragged by the hair rich [that is, decorated] with flowers, and fit to be honoured,—you going after, through the pride of youth, a nobly-born person. (40)

Śakāra :—

Here are you, girl, taken hold of, by [your] head, hair, locks, tresses; shout out, scream, cry loudly enough for Śambhu, Śiva, Śaṅkara or Īśvara! (41)

Radanikā :—(*With fear*) What are [you] honourable gentlemen bent upon doing [or driving at]?

Viṭa :—Son of Kāṇelī, quite different [is] this voice!

Śakāra :—Bhāva, Bhāva, just as there is the change of voice of a she-cat greedy of the cream of curds, so has been effected a change of voice by [this] daughter of a whore.

---

[1] केशहस्ते ।

विटः—कथं स्वरपरिवर्तः कृतः । अहो चित्रम् । अथवा किमत्र चित्रम् ।

इयं रङ्गप्रवेशेन कलानां चोपशिक्षया ।
वञ्चनापण्डितत्वेन स्वरनैपुण्यमाश्रिता ॥ ४२ ॥

(प्रविश्य) **विदूषकः**—ही ही भोः पदोसमन्दमारुदेण पसुबन्धोवणीदस्स विअ छागलस्स हिअअम् फुरफुराअदि पदीवो । (उपसृत्य रदनिकां दृष्ट्वा) भो रदणिए । [आश्चर्यं भोः प्रदोषमन्दमारुतेन पशुबन्धोपनीतस्येव छागलस्य हृदयम् फुरफुरायते प्रदीपः । ...भो रदनिके ।]

शकारः—भावे भावे मणुश्शे मणुश्शे । [भाव भाव मनुष्यो मनुष्यः ।]

विदूषकः—जुत्तं णेदम्[1] सरिसं णेदम्[1] जं अज्जचारुदत्तस्स दलिद्ददाए संपदं परपुरिसा गेहं पविशन्ति[2] । [युक्तं नेदम् सदृशं नेदम् यदार्यचारुदत्तस्य दरिद्रतया सांप्रतं परपुरुषा गेहं प्रविशन्ति ।]

रदनिका—अज्ज मित्तेअ पेक्ख मे परिहवम् । [आर्य मैत्रेय प्रेक्षस्व मे परिभवम् ।]

विदूषकः—किं तव परिहवो । आदु अम्हाणम् । [किं तव परिभवः । अथवास्माकम् ।]

रदनिका—णं तुम्हाणं ज्जेव । [ननु युष्माकमेव ।]

विदूषकः—किं एसो बलक्कारो । [किमेष बलात्कारः ।]

Viṭa:—What, [by her] has been effected a change of voice! How strange! Or, what [is] there strange [about it] ?

Owing to practice on the stage and by the training in the arts, this one has attained to a skilful use of the voice, by [her] proficiency in deception. (42)

(*Entering*) **Vidūṣaka** :—Ha ! Ha ! Oh ! By the gentle evening breeze is fluttering up the lamp, like the heart of a goat brought near the slaughter-post [at the sacrifice] ! (*Approaching, beholding* Radanikā) O Radanikā !

Śakāra :—Bhāva, Bhāva ! A man, a man.

Vidūṣaka :—This [is] not proper, this [is] not becoming that, as a result of the noble Cārudatta's poverty strangers should now be entering [his] house !

Radanikā :—Noble Maitreya, look at [this] insult [offered] to me !

Vidūṣaka :—What ! Insult to you or to us ?

Radanikā :—Surely, to yourselves alone !

Vidūṣaka :—Is this violence [done to you] ?

---

[1] ण्णेदम् । [2] पवेसीअन्ति ।

रदनिका—अध इं। [अथ किम्।]

विदूषकः—सच्चम्। [सत्यम्।]

रदनिका—सच्चम्। [सत्यम्।]

विदूषकः—(सक्रोधं दण्डकाष्ठमुद्यम्य) मा दाव। भो सके गेहे कुक्कुरो वि दाव चण्डो भोदि किं उण अहं बम्हणो। ता एदिणा अम्हारिसजणभाअधेअकुडिलेन दण्डकट्ठेण दुट्ठस्स विअ सुक्खाणवेणुअस्स मत्थअं दे पहारेहिं कुट्टइस्सम्। [मा तावत्। भोः स्वके गेहे कुक्कुरोऽपि तावच्चण्डो भवति किं पुनरहं ब्राह्मणः। तदेतेनास्मादृशजनभागधेयकुटिलेन दण्डकाष्ठेन दुष्टस्येव शुष्कवेणुकस्य मस्तकं ते प्रहारैः कुट्टयिष्यामि।]

विटः—महाब्राह्मण मर्षय मर्षय।

विदूषकः—(विटं दृष्ट्वा) ण एत्थ एसो अवरज्झदि। (शकारं दृष्ट्वा) एसो क्खु एत्थ अवरज्झदि। अरे रे राअसालअ संट्ठाणअ दुज्जण दुम्मणुस्स जुत्तं णेदम्। जइ वि णाम तत्तभवं अज्जचारुदत्तो दलिद्दो संवुत्तो ता किं तस्स गुणेहिं ण अलंकिदा उज्जइणी। जेण तस्स गेहं पविसिअ परिअणस्स ईरिसो उवमद्दो करीअदि।

Radanikā :—Just so.

Vidūṣaka :—Sure [or, true] ?

Radanikā :—Sure !

Vidūṣaka :—(*Angrily raising his wooden staff*) [You must] not [act] thus. Oh, in his own abode, even a dog becomes for the matter of that, terrifying; what then of me, a Brāhmaṇa ? So, with this wooden staff crooked [also, perverse] like the fortune of people like us, I shall batter down your head with blows, like the top of a bad [or, damaged] dry bamboo.

Viṭa :—Pardon, great Brāhmaṇa, pardon.

Vidūṣaka :—(*Beholding* Viṭa) Not this one is the offender in this case. (*Beholding* Śakāra) *This one* indeed is the offender. O you king's brother-in-law, Saṁsthānaka, villain, wicked man, this [is] not proper—even if it be granted that the worthy noble Cārudatta has become a pauper, is it not that by his merits has been adorned Ujjayinī ?—that such insult is offered to [his] servants, [by one] having entered his house ?

---

१ णेदम्।

मा दुग्गदोत्ति परिहवो णत्थि कअन्तस्स दुग्गदो णाम।
चारित्तेण विहीणो अड्ढो वि अ दुग्गदो होइ ॥ ४३ ॥

[नात्रैषोऽपराध्यति। ... एष खल्वत्रापराध्यति। अरे रे राजश्यालक संस्थानक दुर्जन दुर्मनुष्य युक्तं नेदम्। यद्यपि नाम तत्रभवानार्यचारुदत्तो दरिद्रः संवृत्तः तत्किं तस्य गुणैर्नालंकृतोज्जयिनी। येन तस्य गृहं प्रविश्य परिजनस्येदृश उपमर्दः क्रियते।

मा दुर्गत इति परिभवो नास्ति कृतान्तस्य दुर्गतो नाम।
चारित्र्येण विहीन आढ्योऽपि च दुर्गतो भवति॥]

विटः—(सवैलक्ष्यम्) महाब्राह्मण मर्षय मर्षय। अन्यजनशङ्कया खल्विदमनुष्ठितम् न दर्पात्। पश्य

सकामान्विष्यतेऽस्माभिः

विदूषकः—किं इअम्। [किमियम्।]

विटः—शान्तं पापम्।

काचित्स्वाधीनयौवना।
सा नष्टा[1] शङ्कया तस्याः प्राप्तेयं शीलवञ्चना ॥ ४४ ॥

सर्वथा इदमनुनयसर्वस्वं गृह्यताम्। (इति खड्गमुत्सृज्य कृताञ्जलिः पादयोः पतति)

Let there be [offered] no insult [simply] because [a person is] poor [or, in bad circumstances]; there is indeed no one poor for [that is, in the eyes of] Fate. One, even though prosperous, [but] devoid of character, becomes [that is, is counted as] poor for the matter of that. (43)

Viṭa :—(*With embarrassment and shame*) Great Brāhmaṇa, pardon, pardon. This was indeed done, owing to [our] mistaking [her] for some other person, not through arrogance. See—

A woman in love is being searched by us,

Vidūṣaka :—What, this one ?

Viṭa :—God forbid !

some one, [who is] the mistress of [her] youth; she has disappeared, and owing to mistaking [this one] for her, there has resulted this violation of character [or, breach of decorum] ! (44)

Anyway, let this all-in-all of supplication [that is, profuse apology] be accepted.

[*Dropping his sword and folding his hands, falls at his feet*

---

[1] भ्रष्टा।

विदूषकः—सप्पुरिस उट्ठेहि उट्ठेहि। अआणन्तेण मए तुमं उवालद्धे। संपदं उण जाणन्तो अणुणेमि। [सत्पुरुष उत्तिष्ठोत्तिष्ठ। अजानता मया त्वमुपालब्धः। सांप्रतं पुनर्जानन्ननुनयामि।]

विटः—ननु भवानेवात्रानुनेयः। तदुत्तिष्ठामि समयतः।

विदूषकः—भणादु भवम्। [भणतु भवान्।]

विटः—यदीमं वृत्तान्तमार्यचारुदत्तस्य नाख्यास्यसि।

विदूषकः—ण कधइस्सम्। [न कथयिष्यामि।]

विटः—एष ते प्रणयो विप्र शिरसा धार्यते मया।
गुणशस्त्रैर्वयं येन शस्त्रवन्तोऽपि निर्जिताः॥ ४५॥

शकारः—(सासूयम्) किंणिमित्तं उण भावे एदश्श दुट्ठबडुअश्श किविणअञ्जलिं कडुअ पाएशु णिवडिदे। [किंनिमित्तं पुनर्भाव एतस्य दुष्टबटुकस्य कृपणाञ्जलिं कृत्वा पादयोर्निपतितः।]

विटः—भीतोऽस्मि।

शकारः—कश्श तुमं भीदे। [कस्मात्त्वं भीतः।]

Vidūṣaka :—Good man, rise, rise. You have been blamed by me unknowingly. Now however knowing [the true facts] I apologise [to you].

Viṭa :—I say, [it is] indeed your honour that should be apologised to, in this case. So, I shall rise up on [one] condition.

Vidūṣaka :—You may speak out.

Viṭa :—That you would not communicate this incident to the noble Cārudatta.

Vidūṣaka :—I shall not tell.

Viṭa :—Here this favour of yours, [O] Brāhmaṇa, is held on the head by me, [you] by whom, we, though possessed of [actual] weapons, have been conquered by weapons in the form of virtues ! (45)

Śakāra :—(*With envy*) For what reason [O] Bhāva, did you again fall at the feet of this wicked brat, folding [your] hands in humiliation ?

Viṭa :—I was afraid.

Śakāra :—Of what [were] you afraid ?

६ **विट:**—तस्य चारुदत्तस्य गुणेभ्यः ।

शकार:—के तश्श गुणा जश्श गेहं पविशिअ अशिदव्वं पि णत्थि ।
[के तस्य गुणा यस्य गृहं प्रविश्याशितव्यमपि नास्ति ।]

९ **विट:**—मा मैवम् ।

सोऽस्मद्विधानां प्रणयैः कृशीकृतो न तेन कश्चिद्विभवैर्विमानितः ।
निदाघकालेष्विव सोदको ह्रदो नृणां स तृष्णामपनीय शुष्कवान् ॥ ४६ ॥

शकार:—(सामर्षम्) के शे गब्भदासीए पुत्ते ।

शूले विक्कन्ते पण्डवे शेदकेदू पुत्ते लाधाए लावणे इन्ददत्ते ।
आहो कुन्तीए तेण लामेण जादे अश्शत्थामे धम्मपुत्ते जडाऊ ॥ ४७ ॥

[कः स गर्भदास्याः पुत्रः ।

शूरो विक्रान्तः पाण्डवः श्वेतकेतुः पुत्रो राधाया रावण इन्द्रदत्तः ।
३ आहो कुन्त्यां तेन रामेण जातः अश्वत्थामा धर्मपुत्रो जटायुः ॥]

विट:—मूर्ख आर्यचारुदत्तः खल्वसौ ।

दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी
आदर्शः शिक्षितानां सुचरितनिकषः शीलवेलासमुद्रः ।

Viṭa :—Of the virtues of that Cārudatta.

Śakāra :—What virtues his, on entering whose house, [one finds] there is nothing even to eat ?

Viṭa :—[Say] not, not thus.

He has been impoverished [lit. made thin] by [granting] requests of [people] like us ; by him has not been despised any one, on account of [his] riches. Like a well full of water, in the summer seasons, has he become dried up, by relieving the thirst of men. (46)

Śakāra :—(*With indignation*) Who [is] he, the son of a slave-by-birth ? [Is he]

the brave, heroic son of Paṇḍu, Śvetaketu, [or] the son of Rādhā, Rāvaṇa, [or] Indradatta [or, born of favour from Indra] ? Or Aśvatthāman, born of Kuntī from that Rāma, [or] Jaṭāyu, the son of Dharma ? (47)

Viṭa :—Fool, he [is] indeed [no other than] the noble Cārudatta—

The wish-fulfilling tree bent down by the fruit in the form of his virtues, for the poor ; a patriarch house-holder for the good men ; a mirror [that is, an ideal to look to] for the educated ; a touch-stone for excellent character ; a sea with the

सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो
ह्येकः श्लाघ्यः स जीवत्यधिकगुणतया चोच्छ्वसन्तीव चान्ये ॥४८॥ O imp

तदितो गच्छामः ।

शकारः—अगेण्हिअ वशन्तशेणिअम् । [अगृहीत्वा वसन्तसेनिकाम् ।] 3

विटः—नष्टा वसन्तसेना ।

शकारः—कधं विअ । [कथमिव ।]

विटः—अन्धस्य दृष्टिरिव पुष्टिरिवातुरस्य
मूर्खस्य बुद्धिरिव सिद्धिरिवालसस्य ।
स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या
त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा ॥ ४९ ॥ 3

शकारः—अगेण्हिअ वशन्तशेणिअं ण गमिश्शम् । [अगृहीत्वा वसन्तसेनिकां न गमिष्यामि ।]

विटः—एतदपि न श्रुतं त्वया ।

आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।
हृदये गृह्यते नारी यदिदं[1] नास्ति गम्यताम् ॥ ५० ॥

shore of [that is, not transgressing] moral conduct; a doer of good [or honour]; never a despiser; a treasure of manly virtues; possessed of courteous and liberal spirit—He alone worthy of respect, lives, owing to [his] being possessed of a plethora of virtues; while others are as though [simply] letting off breath ! (48) O

So, let us go away from here.

Śakāra :—Without taking [with us] Vasantasenā ?

Vita :—Lost [is] Vasantasenā.

Śakāra :—How possibly ?

Viṭa :—

Like the sight of a blind man, like the [bodily] growth of a sick person, like the intellect of a fool, like the success of an idler, like the highest [Ātman] knowledge of one of weak memory and vicious, like love in the case of an inimical person, has she completely (*pra*) disappeared, after having met you. (49)

Śakāra :—Without taking Vasantasenā, I will not go.

Viṭa :—Has not [again] been heard by you even this ?

An elephant is held by the tying chain; a horse is held by the reins; a woman is held [that is, won] by the heart; because this is not [in you], go away please. (50)

---

[1] यदीदं ।

शकारः—यादि गच्छशि गच्छ तुमम्। हगे ण गमिश्शम्। [यादि गच्छसि गच्छ त्वम्। अहं न गमिष्यामि।]

विटः—एवम्। गच्छामि। (इति निष्क्रान्तः)

शकारः—गडे खु भावे अभावम्। (विदूषकमुद्दिश्य) अले काकपदशीशमश्तका दुट्टबडुआ उवविश उवविश। [गतः खलु भावोऽभावम्।...अरे काकपदशीर्षमस्तक दुष्टबटुक उपविशोपविश।]

विदूषकः—उववेसिदा ज्जेव अम्हे। [उपवेशिता एव वयम्।]

शकारः—केण। [केन।]

विदूषकः—कअन्तेण। [कृतान्तेन।]

शकारः—उट्ठेहि उट्ठेहि। [उत्तिष्ठोत्तिष्ठ।]

विदूषकः—उट्ठिस्सामो। [उत्थास्यामः।]

शकारः—कदा। [कदा।]

विदूषकः—जदा पुणो वि देव्वं अणुऊलं भविस्सादि। [यदा पुनरपि दैवमनुकूलं भविष्यति।]

शकारः—अले लोद लोद। [अरे रुदिहि रुदिहि।]

विदूषकः—रोदाविदा ज्जेव अम्हे। [रोदिता एव वयम्।]

शकारः—केण। [केन।]

Śakāra :—If you [want to] go, go you. I will not go.

Viṭa :—Very well. I am going. [*Exit*

Śakāra :—Bhāva has indeed made [himself] away. (*Addressing* Vidūṣaka) O wicked brat, O one possessing a pate and head with [or, like] a crow-foot mark, sit down, sit down.

Vidūṣaka :—We have been already made to sit [or, trampled] down.

Śakāra :—By whom ?

Vidūṣaka :—By Fate.

Śakāra :—Get up, get up.

Vidūṣaka :—We would get up.

Śakāra :—When ?

Vidūṣaka :—When once again Fate would be favourable.

Śakāra :—Oh, weep, weep.

Vidūṣaka :—We have been already made to weep.

Śakāra :—By whom ?

विदूषकः—दुग्गदीए। [दुर्गत्या।]

शकारः—अले हश हश। [अरे हस हस।]

विदूषकः—हसिस्सामो। [हसिष्यामः।]

शकारः—कदा। [कदा।]

विदूषकः—पुणो वि रिद्धीए अज्जचारुदत्तस्स। [पुनरपि ऋद्ध्यार्यचारुदत्तस्य।]

शकारः—अले डुट्टवडुआ भणेशि मम वअणेग तं दलिद्दचालुदत्तकम्—एशा शशुवण्णा शहिलण्णा णवणाडअदंशणुट्ठिदा शुत्तधालि व्व वशन्तशेणा णाम गणिआदालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता अम्हेहिं वलक्कालाणुगीअमाणा तुह गेहं पविट्ठा। ता जइ मम हश्ते शअं ज्जेव पट्टाविअ एणं शमप्पेशि तदो अधिअलगे ववहालं विगा लहुं णिज्जादमाणाह तव मए अणुवद्धा पीदी हुविश्शदि। आदु अणिज्जादमाणाह मलगन्तिके वेले हुविश्शदि। अवि अ पेक्ख

Vidūṣaka :—By penury [or, misery].

Śakāra :—Oh, laugh, laugh.

Vidūṣaka :—We shall laugh.

Śakāra :—When ?

Vidūṣaka :—By the prosperity once again of the noble Cārudatta.

Śakāra :—O wicked brat, you shall say in my name, to that beggarly Cārudatta —

‘This courtezan-girl by name Vasantasenā [decked] with gold [ornaments], with aurum [ornaments], like the wife of the Sūtradhāra ready for the exhibition of a new play, deeply attached to you since [you were seen in] the garden of the Kāmadeva temple, has entered your house, while being propitiated by us with force. So, if you, on your own, having sent [her] away would deliver her in my hands, then of you quickly restoring [her] without any judicial proceedings in a court of law, there would be continued love with me; on the other hand, [of you] not restoring [her] there would be enmity terminating [only] at death. And further, note—

कश्चालुका गोम्हडहित्तवेण्टा शाके अ शुक्खे तलिदे हु मंशे।
भत्ते अ हेमन्तिअलत्तिशिद्धे लीणे अ वेलं ण हु होदि पूदी ॥ ५१ ॥

शोइतकं भणेशि लइतकं भणेशि। तधा भणेशि जधा हगे अत्तणकेलिकाए पाशादबालग्गकवोदवालिआए उवविट्ठे शुणामि। अण्णधा जादि भणेशि ता कवालपविट्ठकवित्थगुडिअं विअ मश्तअं दे मडमडाइश्शम्। [अरे दुष्टबटुक भाणिष्यसि मम वचनेन तं दरिद्रचारुदत्तकम्—एषा ससुवर्णा सहिरण्या नवनाटकदर्शनोत्थिता सूत्रधारीव वसन्तसेना नाम गणिकादारिका कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्तास्माभिर्बलात्कारानुनीयमाना तव गेहं प्रविष्टा। तद्यदि मम हस्ते स्वयमेव प्रस्थाप्यैनां समर्पयसि ततोऽधिकरणे व्यवहारं विना लघु निर्यातयतस्तव मयानुबद्धा प्रीतिर्भविष्यति। अथवानिर्यातयतो मरणान्तिकं वैरं भविष्याति। अपि च प्रेक्षस्व

कूष्माण्डी.गोमयलिप्तवृन्ता शाकं च शुष्कं तालितं खलु मांसम्।
भक्तं च हैमन्तिकरात्रिसिद्धं लीनायां च वेलायां न खलु भवति पुति ॥

शोभनं भाणिष्यसि सकपटं भाणिष्यसि। तथा भाणिष्यसि यथाहमात्मकीयायां प्रासादबालाग्रकपोतपालिकायामुपविष्टः शृणोमि। अन्यथा यदि भणसि· तदा कपाटप्रविष्टकपित्थगुलिकमिव मस्तकं ते मडमडायिष्यामि।]

विदूषकः—भणिस्सम्। [भणिष्यामि।]

शकारः—(अपवार्य) चेडे गडे शच्चकं ज्जेव भावे। [चेट गतः सत्यमेव भावः।]

चेटः—अध इं। [अथ किम्।]

शकारः—ता शिग्घं अवक्कमम्ह। [तच्छीघ्रमपक्रमावः।]

A pumpkin with [its] stalk besmeared with cow-dung, and a dried vegetable, fried flesh to be sure, and boiled rice cooked during nights in the cold season—these surely do not become putrid even after the lapse of time.' (51)

You shall say [this] well, shall say craftily, shall say [this] in such a way that I seated on the small dove-cot end of my own palace, should hear [it]; if you say otherwise, then I shall [simply] smash down your head, like a round Kapittha fruit caught between [lit. entering] the panels [of a door].

Vidūṣaka :—I shall say [it].

Śakāra :—(*Aside*) Ceṭa, is Bhāva indeed really gone ?

Ceṭa :—Just so.

Śakāra :—Then, let us depart quickly.

चेटः—ता गेण्हदु भट्टके असिम् । [तद्गृह्णातु भट्टारकोऽसिम् ।]

शकारः—तव ज्जेव हश्ते चिट्ठदु । [तवैव हस्ते तिष्ठतु ।]

चेटः—एशे भट्टालके[1] । गेण्हदु णं भट्टके असिम् । [एष भट्टारक । गृह्णात्वेनं भट्टारकोऽसिम् ।]

शकारः—(विपरीतं गृहीत्वा)

णिव्वक्कलं मूलकपेशिवण्णं खन्धेण घेत्तूण अ कोशशुत्तम् ।
कुक्केहि कुक्कीहि अ वुक्कअन्ते जधा शिआले शलणं पलामि ॥ ५२ ॥
[निर्वल्कलं मूलकपेशिवर्णं स्कन्धेन गृहीत्वा च कोशसुप्तम् ।
कुक्कुरैः कुक्कुरीभिश्च बुक्क्यमानो यथा शृगालः शरणं प्रयामि ॥]

(परिक्रम्य निष्क्रान्तौ)

विदूषकः—भोदि रदणिए ण क्खु दे अअं अवमाणो तत्तभवदो चारुदत्तस्स णिवेदइदव्वो । दोग्गच्चपीडिअस्स मण्णे दिउणदरा पीडा हुविस्सदि । [भवति रदनिके न खलु तेऽयमपमानस्तत्रभवतश्चारुदत्तस्य निवेदयितव्यः । दौर्गत्यपीडितस्य मन्ये द्विगुणतरा पीडा भविष्यति ।]

रदनिका—अज्ज मित्तेअ रदणिआ क्खु अहं संजदमुही । [आर्य मैत्रेय रदनिका खल्वहं संयतमुखी ।]

विदूषकः—एवं ण्णेदम् । [एवं न्विदम् ।]

Ceṭa :—Then, let [my] master take [this] sword.

Śakāra :—Let [it] remain in your hand itself.

Ceṭa :—Here [it is], master. Let [my] master take this sword.

Śakāra :—(*Taking it the wrong way*)

Bearing [or, holding] on the shoulder [this sword] without the covering, having the colour of the radish-skin and sleeping [or, resting] in the sheath, I go off to [my] abode, like a jackal [when] being barked at by dogs and bitches. (52)

[*Moving about, exeunt both*

Vidūṣaka :—Worthy Radanikā, this insult to you must surely be not communicated to the noble Cārudatta ; I think [thereby] there would be two-fold [or, additional] pain [to him already] harassed by penury [or, misfortune].

Radanikā :—Noble Maitreya, surely I am Radanikā [possessed of teeth that are clenched] with [my] lips sealed [lit. mouth closed].

Vidūṣaka :—So indeed [be] it.

---

[1] भट्टालकस्स ।

चारुदत्तः—(वसन्तसेनामुद्दिश्य) रदनिके मारुताभिलाषी प्रदोषसमय[1]शीतार्तो रोहसेनः । ततः प्रवेश्यतामभ्यन्तरमयम् । अनेन प्रावारकेण छादयैनम् । (इति प्रावारकं प्रयच्छति)

वसन्तसेना—(स्वगतम्) कधं परिअणात्ति मं अवगच्छादि । (प्रावारकं गृहीत्वा समाघ्राय च स्वगतं सस्पृहम्) अम्हहे जादीकुसुमवासिदो पावारओ । अणुदासीणं से ज्जोव्वणं पडिभासेदि । [कथं परिजन इति मामवगच्छाति । ...आश्चर्यम् जातीकुसुमवासितः प्रावारकः । अनुदासीनमस्य यौवनं प्रतिभासते ।] (अपवारितकेन प्रावृणोति)

चारुदत्तः—ननु रदनिके रोहसेनं गृहीत्वाभ्यन्तरं प्रविश ।

वसन्तसेना—(स्वगतम्) मन्दभाइणी क्खु अहं तुम्हे अब्भन्तरस्स । [मन्दभागिनी खल्वहं तवाभ्यन्तरस्य ।]

चारुदत्तः—ननु रदनिके प्रतिवचनमपि नास्ति । कष्टम् ।

यदा तु भाग्यक्षयपीडितां दशां नरः कृतान्तोपाहितां प्रपद्यते ।
तदास्य मित्राण्यपि यान्त्यमित्रतां चिरानुरक्तोऽपि विरज्यते जनः ॥ ५३ ॥

Cārudatta :—(*Addressing* Vasantasenā) Radanikā, Rohasena, who likes [to enjoy] the breeze [is likely] to suffer from cold of the evening time. So, let him be brought inside. Cover him up with this mantle. [*Hands over the mantle*

Vasantasenā :—(*To herself*) What, he takes me to be [his] servant! (*Taking the mantle and smelling it, to herself, longingly*) Ah ! The mantle is made fragrant with the jasmine flowers. His youth appears to be not indifferent [to sensual pleasures]. [*Covers herself in a manner so as not to be observed by others*

Cārudatta :—I say, Radanikā, taking Rohasena [with you] enter the inner [apartment].

Vasantasenā :—(*To herself*) I am indeed [too] unfortunate to [enter] your inner [apartment; also to gain your love].

Cārudatta :—I say, Radanikā, there is not even a word in reply [from you] ! Alas !

When again a man attains to a state brought on by Fate and distressing owing to the loss [or, decay] of fortune, then even his friends become [his] enemies and even persons long and deeply attached [to him] become void of affection [or, indifferent].

---

[1] समयः । शीता...।

(रदनिकामुपसृत्य) **विदूषकः**—भो इअं सा रदणिआ। [भोः इयं सा रदनिका।]

चारुदत्तः—इयं सा रदनिका। इयमपरा का।

अविज्ञातावसक्तेन दूषिता मम वाससा।

वसन्तसेना—(स्वगतम्) णं भूसिदा। [ननु भूषिता।]

चारुदत्तः—

छादिता शरदभ्रेण चन्द्रलेखेव दृश्यते ॥ ५४ ॥

अथवा न युक्तं परकलत्रदर्शनम्।

विदूषकः—भो अलं परकलत्तदंसणसङ्काए। एसा वसन्तसेणा कामदेवाअदणुज्जाणादो पहुदि भवन्तमणुरत्ता। [भोः अलं परकलत्रदर्शनशङ्कया। एषा 3 वसन्तसेना कामदेवायतनोद्यानात्प्रभृति भवन्तमनुरक्ता।]

चारुदत्तः—इयं वसन्तसेना। (स्वगतम्)

यया मे जनितः कामः क्षीणे विभवविस्तरे।
क्रोधः कुपुरुषस्येव स्वगात्रेष्वेव सीदति ॥ ५५ ॥

विदूषकः—भो वअस्स एसो क्खु राअसालो भणादि। [भो वयस्य एष खलु राजश्यालो भणति।]

(*Pushing forward* Radanikā) **Vidūṣaka** :—Oh, here [is] that Radanikā.

Cārudatta :—Here [is] that Radanikā ? [Then] who [is] this another ?

Contaminated by my garment brought into contact [with her], unconsciously,

Vasantasenā :—(*To herself*) I say, adorned [*not* contaminated].

Cārudatta :—[she] appears like a digit of the moon screened by an autumnal cloud. (54)

Or, it [is] not proper to look at another's wife.

Vidūṣaka :—Oh, away with the fear about looking at another's wife. This [is] Vasantasenā deeply attached to you since [she saw you in] the garden of the Kāmadeva temple.

Cārudatta :—This [is] Vasantasenā (*To himself*)

the love inspired in me by whom, when [my] large fortune has declined, lies low in my body itself [lit. limbs], like the wrath of an impotent person. (55)

Vidūṣaka :—O friend, here indeed, the king's brother-in-law says—

---

[१] उपसृत्य रदनिका विदूषकश्च।

चारुदत्तः—किम् ।

विदूषकः—एसा ससुवण्णा सहिलण्णा णवणाडअदंसणुट्ठिदा सुत्तधालिव्व वसन्तसेणा णाम गणिआदालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता अम्हेहिं बलक्कालाणुणीअमाणा तुह गेहं पविट्ठा । [एषा ससुवर्णा सहिरण्या नवनाटकदर्शनोत्थिता सूत्रधारीव वसन्तसेना नाम गणिकादारिका कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्तास्माभिर्बलात्कारानुनीयमाना तव गेहं प्रविष्टा ।]

वसन्तसेना—(स्वगतम्) बलक्कालाणुणीअमाणोत्ति जं सच्चम् अलंकिदम्हि एदेहिं अक्खरेहिं । [बलात्कारानुनयिमानेति यत्सत्यम् अलंकृतास्म्येतैरक्षरैः ।]

विदूषकः—ता जइ मम हत्थे सअं ज्जेव पट्ठाविअ एणं समप्पेसि तदो अधिअलणे ववहालं विणा लहुं णिज्जादमाणाह तव मए अणुबन्द्धा पीदी हुविस्सादि । अण्णधा मलणन्तिके वेले हुविस्सादि । [तद्यदि मम हस्ते स्वयमेव प्रस्थाप्यैनां समर्पयसि ततोऽधिकरणे व्यवहारं विना लघु निर्यातयतस्तव मयानुबद्धा प्रीतिर्भविष्यति । अन्यथा मरणान्तिकं वैरं भविष्यति ।]

चारुदत्तः—(सावज्ञम्) अज्ञोऽसौ । (स्वगतम्) अये कथं देवतोपस्थानयोग्या युवतिरियम् । तेन खलु तस्यां वेलायाम्

Cārudatta :—What ?

Vidūṣaka :—'This courtezan-girl by name Vasantasenā, [decked] with gold [ornaments], with aurum [ornaments], like the wife of the Sūtradhāra ready for the exhibition of a new play, deeply attached to you since [you were seen in] the garden of the Kāmadeva temple, has entered your house, while being propitiated by us with force.

Vasantasenā :—(*To herself*) 'Being propitiated by us with force'—Surely, I am flattered [lit. adorned] by these words [lit. syllables] !

Vidūṣaka :—So, if you, on your own, having sent [her] away would deliver her in my hands, then of you quickly restoring [her] without any judicial proceedings in a court of law, there would be continued love with me ; on the other hand, [of you] not restoring [her] there would be enmity terminating [only] at death.'

Cārudatta :—(*With contempt*) He [is] unwise. (*To himself*) Aye, how ! This young lady [is] fit to be waited upon like a goddess. Hence indeed at that time,

प्रविश गृहमिति प्रतोद्यमाना न चलति भाग्यकृतां दशामवेक्ष्य ।
पुरुषपरिचयेन च प्रगल्भं न वदति यद्यपि भाषते बहूनि ॥ ५६ ॥

(प्रकाशम्) भवति वसन्तसेने अनेनाविज्ञानादपरिज्ञातपरिजनोपचारेणापराद्धोऽस्मि । शिरसा भवतीमनुनयामि ।

वसन्तसेना—एदिणा अणुचिदभूमिआरोहणेण अवरज्झा अज्जं सीसेण पणमिअ पसादेमि । [एतेनानुचितभूमिकारोहणेनापराद्धार्यं शीर्षेण प्रणम्य प्रसादयामि ।]

विदूषकः—भो दुवेवि तुम्हे सुहं पणमिअ कलमकेदारा अण्णोण्णं सीसेण सिसं समाअदा । अहं पि इमिणा करहजाणुसरिसेण सीसेण दुवेवि तुम्हे पसादेमि । [भोः द्वावपि युवां सुखं प्रणम्य कलमकेदारावन्योन्यं शीर्षेण शीर्षं समागतौ । अहमप्यमुना करभजानुसदृशेन शीर्षेण द्वावपि युवां प्रसादयामि ।] (इत्युत्तिष्ठति)

चारुदत्तः—भवतु । तिष्ठतु प्रणयः ।

वसन्तसेना—(स्वगतम्) चदुरो मधुरो अ अअं उवण्णासो । ण जुत्तं अज्ज एरिसेण इध आअदाए मए पडिवसिदुम् । भोदु । एव्वं दाव भणिस्सम्,

[though] urged on with [the words] 'enter the house,' she moved not, bearing in mind the state produced by Fate. And although she could talk boldly a lot owing to [her] familiarity with males, she did not speak [a word]. (56)

(*Aloud*) Lady Vasantasenā, I have unwittingly committed an offence by this treatment [of you] as a servant, not recognising [you]. I apologise to your ladyship [saluting you] with [my] head.

Vasantasenā :—I, offending [you] by [my] intrusion on a place [or, playing a role] undeserved [by me], propitiate [you], the noble one, saluting with [my] head.

Vidūṣaka :—Oh, both of you even, bowing down happily [or, comfortably] have met each other, head to head [like two adjoining] meadows of paddy. I too, with this [my] head resembling the knee of a young camel, would [now] be propitiating even both of you. [*Gets up*

Cārudatta :—Very well; let the formality be dropped.

Vasantasenā :—(*To herself*) This [is] an ingenious and charming introduction. It [is] not proper for me who have come here in such [circumstances], to stay on to-day. Well, I

---

[1] सुसंपण्णा विअ।

(प्रकाशम्) अज्ज जइ एव्वं अहं अज्जस्स अणुग्गेज्झा ता इच्छे अहं इमं अलंकारअं अज्जस्स गेहे णिक्खिविदुम् । अलंकारस्स णिमित्तं एदे पावा अणुसरन्ति । [चतुरो मधुरश्चायमुपन्यासः । न युक्तमद्येदृशेनेहागतया मया प्रतिवस्तुम् । भवतु । एवं तावद्भणिष्यामि ।...आर्य यद्येवमहमार्यस्यानुग्राह्या तदिच्छाम्यहमिममलंकारकमार्यस्य गेहे निक्षेप्तुम् । अलंकारस्य निमित्तमेते पापा अनुसरन्ति ।]

चारुदत्तः—अयोग्यमिदं न्यासस्य गृहम् ।

वसन्तसेना—अज्ज अलीअम् । पुरुसेसु णासा णिक्खिविअन्ति ण उण गेहेसु । [आर्य अलीकम् । पुरुषेषु न्यासा निक्षिप्यन्ते न पुनर्गेहेषु ।]

चारुदत्तः—मैत्रेय गृह्यतामयमलंकारः ।

वसन्तसेना—अणुग्गहिदम्हि । [अनुगृहीतास्मि ।] (इत्यलंकारमर्पयति)

विदूषकः—(गृहीत्वा) सोत्थि भोदीए । [स्वस्ति भवत्यै ।]

चारुदत्तः—धिङ् मूर्ख न्यासः खल्वयम् ।

विदूषकः—(अपवार्य) जइ एव्वं ता चोरेहिं हरिज्जउ [यद्येवं तदा चोरैर्ह्रियताम्]

चारुदत्तः—अचिरेणैव कालेन

---

shall just say thus—(*Aloud*) Noble one, if I am thus fit to be favoured by the noble one, then I wish to keep this bunch of ornaments as deposit in the house of the noble one. For the sake of the ornaments, do these wicked [or, sinful] fellows follow [me].

Cārudatta :—This house [is] unfit for a deposit [to be kept in].

Vasantasenā :—Noble one, [this is] untrue. Deposits are entrusted to *persons* not again to *houses.*

Cārudatta :—Maitreya, take these ornaments.

Vasantasenā :—I am favoured [or obliged to you].
[*Hands over the ornaments*

Vidūṣaka :—(*Taking them*) Welfare to your ladyship !

Cārudatta :—Fie, fool, this [is] indeed [but] a deposit !

Vidūṣaka :—(*Aside*) If so, then, let the thieves take away—

Cārudatta :—In a short time indeed—

विदूषकः—एसो से अम्हाणं विण्णासो। [एषोऽस्या अस्माकं विन्यासः।]

चारुदत्तः—निर्यातयिष्ये ।

वसन्तसेना—अज्ज इच्छे अहम् इमिणा अज्जेण अणुगच्छिज्जन्ती सकं गेहं गन्तुम् । [आर्य इच्छाम्यहम् अनेनार्येणानुगम्यमाना स्वकं गेहं गन्तुम् ।]

चारुदत्तः—मैत्रेय अनुगच्छ तत्रभवतीम् ।

विदूषकः—तुमं ज्जेव एदं कलहंसगामिणीं अणुगच्छन्तो राअहंसो विअ सोहासि। अहं उण बम्हणो जहिं तहिं जणेहिं चउप्पहोवणीदो उवहारो कुक्कुरेहिं विअ खज्जमाणो विवज्जिस्सम्। [त्वमेवैतां कलहंसगामिनीमनुगच्छन् राजहंस इव शोभसे । अहं पुनर्ब्राह्मणो यत्र तत्र जनैश्चतुष्पथोपनीत उपहारः कुक्कुरैरिव खाद्यमानो विपत्से ।] [illegible]

चारुदत्तः—एवं भवतु । स्वयमेवानुगच्छामि तत्रभवतीम् । तद्राजमार्गविश्वासयोग्याः प्रज्वाल्यन्तां प्रदीपिकाः ।

विदूषकः—वड्ढमाणअ पज्जालेहि पदीविआओ । [वर्धमानक प्रज्वालय प्रदीपिकाः ।]

Vidūṣaka :—This her deposit entrusted to us.

Cārudatta :—I shall return [it].

Vasantasenā :—Noble one, I wish to go to my own house, being accompanied by this gentleman.

Cārudatta :—Maitreya, accompany [or, follow] her ladyship.

Vidūṣaka :—You alone, accompanying this [lady] walking [gracefully] like a Kalahaṁsa, would shine forth [that is, look charming] like a royal swan. I, again, a Brāhmaṇa, would fare badly, being harassed (*khādyamāna*) by people here and there, like an offering placed in a [public] square, being devoured by the dogs !

Cārudatta :—Be it so. I myself shall accompany her ladyship. Let then the torches be made to blaze forth [so as to be] fit for [inspiring] confidence [for movement] on the king's highway.

Vidūṣaka :—Vardhamānaka, light up the torches.

चेटः—(जनान्तिकम्) अले तेल्लेण विणा पदीविआओ पज्जालीअन्ति। [अरे तैलेन विना प्रदीपिकाः प्रज्वाल्यन्ते ।]

४५ **विदूषकः**—(जनान्तिकम्) ही ताओ क्खु अम्हाणं पदीविआओ अवमाणिदनिद्धणकामुआ विअ गणिआ णिस्सिणेहाओ दाणिं संवुत्ता । [आश्चर्यम् ताः खल्वस्माकं प्रदीपिका अपमानितनिर्धनकामुका इव गणिका निःस्नेहा इदानीं
४८ संवृत्ताः ।]

चारुदत्तः—मैत्रेय भवतु । कृतं प्रदीपिकाभिः । पश्य

उदयति हि शशाङ्कः कामिनीगण्डपाण्डु-
र्ग्रहगणपरिवारो राजमार्गप्रदीपः । ①
तिमिरनिकरमध्ये रश्मयो यस्य गौराः
स्रुतजल इव पङ्के क्षीरधाराः पतन्ति ॥ ५७ ॥

(सानुरागम्) भवति वसन्तसेने इदं भवत्या गृहम् । प्रविशतु भवती ।

(वसन्तसेना सानुरागमवलोकयन्ती निष्क्रान्ता)

३ **चारुदत्तः**—वयस्य गता वसन्तसेना । तदेहि । गृहमेव गच्छावः ।

Ceṭa :—(*Aside*) Aye, are the torches to be lighted up without oil ?

Vidūṣaka :—(*Aside*) Ah, those our torches indeed have now become void of oil, like courtezans [who become] void of affection, insulting [their] penniless lovers.

Cārudatta :—Maitreya, that would do. No need of torches. See—

[Here] rises up indeed the moon, pale-white like the cheeks of a woman in love, having for the retinue clusters of stars [lit. planets], the big (*pra*) lamp on the king's highway,—whose white rays fall in the midst of the mass of darkness, like streams of milk on [a mass of] mud with the water oozed out. (57)

(*Affectionately*) Lady Vasantasenā, here [is] your ladyship's house. Let your ladyship enter [it].

[Vasantasenā, *looking on affectionately, exit*

Cārudatta :—Friend, gone [is] Vasantasenā. So, come on., Let us just go home.

राजमार्गो हि शून्योऽयं रक्षिणः संचरन्ति च ।
वञ्चना परिहर्तव्या बहुदोषा हि शर्वरी ॥ ५८ ॥

(परिक्रम्य) इदं च सुवर्णभाण्डं रक्षितव्यं त्वया रात्रौ वर्धमानकेनापि दिवा ।

विदूषकः—जधा भवं आणवेदि । [यथा भवानाज्ञापयति ।] (इति निष्क्रान्तौ)

इति अलंकारन्यासो नाम प्रथमोऽङ्कः । 3

This king's highway [is] indeed [now] deserted; and the guards are patrolling; deceit [or, treacherous handling by rogues] ought to be avoided; for, night [is] full of [that is, associated with] mis-adventures. (58)

(*Moving about*) And this bunch of gold ornaments should be guarded by you at night, and by Vardhamānaka too, by day.

Vidūṣaka:—As you command.

[*Exeunt both*

Here ends the First Act called ' *Alaṁkāranyāsa* ' [*the deposit of the ornaments*].

वसन्तसेना—हञ्जे रमिदुमिच्छामि ण सेविदुम् । [चेटि रन्तुमिच्छामि न सेवितुम्।]

मदनिका—विज्जाविसेसालंकिदो किं कोवि बम्हणजुआ कामीअदि । [विद्याविशेषालंकृतः किं कोऽपि ब्राह्मणयुवा काम्यते।]

वसन्तसेना—पूअणीओ मे बम्हणजणो। [पूजनीयो मे ब्राह्मणजनः।]

मदनिका—किं अणेअणअराहिगमणजणिदविहववित्थारो वाणिअजुआ वा कामीअदि। [किमनेकनगराभिगमनजानितविभवविस्तारो वाणिजयुवा वा काम्यते।]

वसन्तसेना—हञ्जे उवारूढसिणेहं पि पणइजणं परिच्चइअ देसन्तरगमणेण वाणिअजणो महन्तं विओअजं दुक्खं उप्पादेदि। [चेटि उपारूढस्नेहमपि प्रणयिजनं परित्यज्य देशान्तरगमनेन वाणिजजनो महद्वियोगजं दुःखमुत्पादयति।]

मदनिका—अज्जए ण राआ ण राअवल्लहो ण बम्हणो ण वाणिअजणो। ता को दाणिं सो भट्टिदारिआए कामीअदि। [आर्ये न राजा न राजवल्लभः न ब्राह्मणः न वाणिजजनः। तत्क इदानीं स भर्तृदारिकया काम्यते।]

वसन्तसेना—हञ्जे तुमं मए सह कामदेवाअदणुज्जाणं गदा आसि। [चेटि त्वं मया सह कामदेवायतनोद्यानं गतासीः।]

Madam tell [me]—who is being served, a king, or a king's favourite ?

Vasantasenā :—Ceṭī, I wish to *enjoy*, not to *serve*.

Madanikā :—Is it some Brāhmaṇa youth adorned with deep learning, who is loved ?

Vasantasenā :—Brāhmaṇa folk [are] worthy of being worshipped in my eyes [lit. for me].

Madanikā :—Is it a merchant-youth then who is loved, who has created ample fortune [for himself] by visiting many cities ?

Vasantasenā :—Ceṭī, the merchant-folk, abandoning [their] beloved persons though [their] affection is fully grown, create intense grief due to separation by going to other countries !

Madanikā :—Madam, neither a king, nor a king's favourite, nor a Brāhmaṇa, nor [one of] the merchant-class ! Then, who [is it] now that is loved by [my] mistress ?

Vasantasenā :—Ceṭī, you had gone with me to the garden of the Kāmadeva temple ?

मदनिका---अज्जए गदम्हि । [आर्ये गतास्मि ।]

वसन्तसेना---तह वि मं उदासीणा विअ पुच्छसि । [तथापि मामुदासीनेव पृच्छसि ।]

मदनिका---जाणिदम्। किं सो ज्जेव जेण अज्जआ सरणाअदा अब्भुववण्णा । [ज्ञातम् । किं स एव येनार्या शरणागताभ्युपपन्ना ।]

वसन्तसेना---किंणामहेओ क्खु सो । [किंनामधेयः खलु सः ।]

मदनिका---सो क्खु सेट्ठिचत्तरे पडिवसदि । [स खलु श्रेष्ठिचत्वरे प्रतिवसति।]

वसन्तसेना---अइ णामं से पुच्छिदासि । [अयि नामास्य पृष्टासि ।]

मदनिका---सो क्खु अज्जए सुगहीदणामहेओ अज्जचारुदत्तो णाम । [स खलु आर्ये सुगृहीतनामधेय आर्यचारुदत्तो नाम।]

वसन्तसेना---(सहर्षम्) साहु मदणिए साहु । सुट्ठु तुए जाणिदम् । [साधु मदनिके साधु । सुष्ठु त्वया ज्ञातम् ।]

मदनिका---(स्वगतम्) एव्वं दाव । (प्रकाशम्) अज्जए दलिद्दो क्खु सो सुणीअदि । [एवं तावत् । ...आर्ये दरिद्रः खलु स श्रूयते ।]

वसन्तसेना---अदो ज्जेव कामीअदि । दलिद्दपुरिससंकन्तमणा क्खु गणिआ लोए अवअणीआ भोदि । [अत एव काम्यते । दरिद्रपुरुषसंक्रान्तमनाः खलु गणिका लोकेऽवचनीया भवति ।] Rl-

---

Madanikā :—I had gone, Madam.

Vasantasenā :—And still, you ask me, as though [quite] indifferent [or, unobservant] ?

Madanikā :—[Now] I know. What, [is he] the same by whom was Madam approaching for [his] protection, favoured [lit. accepted] ?

Vasantasenā :—What indeed is his name ?

Madanikā :—He indeed lives in the Merchant-square.

Vasantasenā :—Aye, you have been asked his name !

Madanikā :—He [is] indeed, Madam, called the noble Cārudatta of auspiciously invoked name.

Vasantasenā :—(*With joy*) Good ! Madanikā ! Good ! You have rightly known !

Madanikā :—(*To herself*) [I shall] just [say] thus. (*Aloud*) Madam, he is reported to be indeed poor.

Vasantasenā :—For that very reason [lit. hence indeed] is he loved. A courtezan with [her] heart [lit. mind] gone

मदनिका—अज्जए किं हीणकुसुमं सहआरपादवं महुअरीओ उण सेवन्ति । [आर्ये किं हीनकुसुमं सहकारपादपं मधुकर्यः पुनः सेवन्ते ।]

वसन्तसेना—अदो ज्जेव ताओ महुअरीओ वुच्चन्ति । [अत एव ता मधुकर्य उच्यन्ते ।]

मदनिका—अज्जए जइ सो मणीसिदो ता कीस दाणिं सहसा ण अहिसारीअदि । [आर्ये यदि स मनीषितस्तत्किमर्थमिदानीं सहसा नाभिसार्यते ।]

वसन्तसेना—हञ्जे सहसा अहिसारिअन्तो पच्चुअआरदुब्बलदाए मा दाव जणो दुल्लहदंसणो पुणो भविस्सदि । [चेटि सहसाभिसार्यमाणः प्रत्युपकार-दुर्बलतया मा तावत् जनो दुर्लभदर्शनः पुनर्भविष्यति ।]

मदनिका—किं अदो ज्जेव सो अलंकारओ तस्स हत्थे णिक्खित्तो। [किमत एव सोऽलंकारस्तस्य हस्ते निक्षिप्तः ।]

वसन्तसेना—हञ्जे सुट्ठु दे जाणिदम् । [चेटि सुष्ठु त्वया ज्ञातम् ।]

(नेपथ्ये) अले भट्टा दशसुवण्णाह लुद्धु जूदकलु पपलीणु पपलीणु। ता गेण्ह गेण्ह । ।चिट्ठ चिट्ठ । दूलात्पदिट्ठो सि । [अरे भट्टारक दशसुवर्णस्य रुद्धो द्यूतकरः प्रपलायितः प्रपलायितः । तद्गृहाण गृहाण । तिष्ठ तिष्ठ । दूरात्प्रदृष्टोऽसि ।]

---

over to a poor person, would indeed be unblamable in the world [that is, by the people].

Madanikā :—Madam, do the female bees again wait upon a mango-tree bereft of blosooms ?

Vasantasenā :—For that very reason, are they called ' honey-makers ' [not, ' honey-enjoyers '].

Madanikā :—Madam, if he is longed for, then, for what reason is he not now approached of your own accord, straightaway (*sahasā*) ?

Vasantasenā :—Ceṭī, being approached of my own accord straightaway, owing to [his] inability to oblige [me] in return, let it not be that [that] person would be difficult to see again.

किंवा प्रशस्तवचनैर्बहुभिर्मदुक्तै-
रन्तर्हिता[1] यदि भवेद्वनितेति मन्ये ॥ ४ ॥

अपि च

harmonical

तं तस्य स्वरसंक्रमं मृदुगिरः[2] श्लिष्टं च तन्त्रीस्वनं
वर्णानामपि मूर्च्छनान्तरगतं तारं विरामे मृदुम् ।
हेलासंयमितं पुनश्च ललितं रागाद्[3]द्विरुच्चारितं
यत्सत्यं विरतेऽपि गीतसमये गच्छामि शृण्वन्निव ॥ ५ ॥

विदूषकः—भो वअस्स आवणन्तररच्छाविहाएसु सुहं कुक्कुरा वि सुत्ता । ता गेहं गच्छेम्ह । (अग्रतोऽवलोक्य) वअस्स पेक्ख पेक्ख । एसो वि अन्धआ-

through [her] nostrils, makes distinctly (*adhikam*, or, repeatedly) a *sū-sū* noise; a man also singing the Kākalī like an old priest wrapped in a garland of dried up flowers, muttering the Mantras, is assuredly not to my liking!

Cārudatta:—Friend, superbly indeed friend Rebhila sing to-day! And yet you are not satisfied!

[The *gīta* was] indeed impassioned, and sweet, and smooth and distinct, and full of emotion, and charming and attractive! Or, what need of many commendatory words uttered by me? I think [or wonder] whether there was some woman concealed [who was singing and not Rebhila]! (4)

And again,

To tell the truth, even though the time of the singing is gone by, I am moving on, as though listening [still] to that cadence of notes of him of sweet voice, and the properly harmonised notes of the lute, high-pitched, mingled in the different Mūrchanās even on syllables, low at the close, controlled with utmost ease, and at the same time charming and repeated twice in consonance with the Rāga [or, passion]! (5)

Vidūṣaka:—O friend, even the dogs are sleeping soundly [or, comfortably] at the partitions of the road through the market.

---

[1] रन्तर्हितो । [2] गिरा । [3] रागाद्द्वि... ।

रस्स विअ अवआसं देन्तो अन्तरिक्खपासादादो ओदरदि भअवं चन्दो। [भो वयस्य आपणान्तररथ्याविभागेषु सुखं कुक्कुरा अपि सुप्ताः। तद्गृहं गच्छावः। ...वयस्य पश्य पश्य। एषोऽप्यन्धकारस्यैवावकाशं ददद्न्तरिक्षप्रासादादवतरति भगवांश्चन्द्रः।]

चारुदत्तः—सम्यगाह भवान्।

असौ हि दत्त्वा तिमिरावकाशमस्तं व्रजत्युन्नतकोटिरिन्दुः। Good [illegible]
जलावगाढस्य वनाद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टम् ॥ ६ ॥

विदूषकः—भो एदं अम्हाणं गेहम्। वड्ढमाणअ वड्ढमाणअ उग्घाडेहि दुआरअम्। [भोः इदमस्माकं गेहम्। वर्धमानक वर्धमानक उद्घाटय द्वारम्।]

चेटः—अज्जमित्तेआह शलशंजोए शुणीआदि। आगदे अज्जचालुदत्ते। ता जाव दुआलअं शे उग्घाडेमि। (तथा कृत्वा) अज्ज वन्दामि। मित्तेअ तुमंपि वन्दामि। एत्थ वित्थिण्णे आशणे णिशीदन्तु अज्जा। [आर्यमैत्रेयस्य स्वरसंयोगः श्रूयते। आगत आर्यचारुदत्तः। तद्यावद्द्वारमस्योद्घाटयामि। ...आर्य वन्दे। मैत्रेय त्वामपि वन्दे। अत्र विस्तर्णि आसने निषीदतमार्यौ।]

(उभौ नाट्येन प्रविश्योपविशतः)

विदूषकः—वड्ढमाणअ रअणिअं सद्दावेहि पादाइं धोइदुम्। [वर्धमानक रदनिकां शब्दापय पादौ धावितुम्।]

So, let us go home. (*Looking in front*) Friend, see, see. Here is this divine moon also, descending from [his] sky-palace, as though making room for darkness!

Cārudatta :—You have spoken truly [or, well].

This moon, indeed making room for darkness, goes to set, with [his] end raised up, like the sharp tusk-end of a wild elephant plunged into the water, remaining above [that is, visible over the water]. (6)

Vidūṣaka :—Oh, here [is] our house. Vardhamānaka, Vardhamānaka, open the door.

Ceṭa :—The voice of the noble Maitreya is being heard! The noble Cārudatta has arrived. So, I shall open the door for him. (*Doing accordingly*) Sir, I salute [you]. Maitreya, I salute you as well. Pray, take [you two] your seats here on the seats spread out [or, commodious], Sirs!

[*Both, gesticulating entrance, sit down*

Vidūṣaka :—Vardhamānaka, shout out for Radanikā to wash [our] feet.

चारुदत्तः—(सानुकम्पम्) अलं सुप्तजनं प्रबोधयितुम् ।

चेटः—अज्जमित्तेअ अहं पाणिअं गेण्हे । तुमं पादाइं धोवेहि । [आर्यमैत्रेय अहं पानीयं गृह्णामि । त्वं पादौ धाव ।]

विदूषकः—(सक्रोधम्) भो वअस्स एसो दाणिं दासीए पुत्तो भविअ पाणिअं गेण्हेदि । मं उण बम्हणं पादाइं धोवावेदि । [भो वयस्य एष इदानीं दास्याःपुत्रो भूत्वा पानीयं गृह्णाति । मां पुनर्ब्राह्मणं पादौ धावयति ।]

चारुदत्तः—वयस्य मैत्रेय त्वमुदकं गृहाण । वर्धमानकः पादौ प्रक्षालयतु ।

चेटः—अज्जमित्तेअ देहि उदअम् । [आर्यमैत्रेय देह्युदकम् ।]

(विदूषकस्तथा करोति । चेटश्चारुदत्तस्य पादौ प्रक्षाल्यापसरति)

चारुदत्तः—दीयतां ब्राह्मणस्य पादोदकम् ।

विदूषकः—किं मम पादोदएहिं । भूमीए ज्जेव मए ताडिदगद्दहेण विअ पुणोवि लोट्ठिदव्वम् । [किं मम पादोदकैः । भूम्यामेव मया ताडितगर्दभेनेव पुनरपि लोठितव्यम् ।]

चेटः—अज्जमित्तेअ बम्हणे क्खु तुमम् । [आर्यमैत्रेय ब्राह्मणः खलु त्वम् ।]

Cārudatta :—(*With pity*) Away with awakening a person [who is] asleep.

Ceṭa :—Noble Maitreya, I shall take [hold of] the water, you wash the feet [of Cārudatta].

Vidūṣaka :—(*With wrath*) O friend, now here [this Ceṭa], holding the status of (*bhūtvā*) the son of a whore, takes [hold] of] the water, but makes me, a Brāhmaṇa, wash the feet !

Cārudatta :—Friend Maitreya, you take [hold of] the water. Let Vardhamānaka wash the feet.

Ceṭa :—Noble Maitreya, pour out [lit. give] the water.

[Vidūṣaka *does accordingly*. Ceṭa, *having washed* Cārudatta's *feet*, *moves back*

Cārudatta :—Let water for [washing] the feet be poured out for the Brāhmaṇa [Maitreya].

Vidūṣaka :—What [is the use] to me of waters for [washing] the feet ? I must needs be rolling about again on the bare ground, like a donkey which has been given a hiding !

Ceṭa :—Noble Maitreya, you [are], forsooth, a Brāhmaṇa [and so, must be respected duly].

विदूषकः—जधा सव्वणागाणं मज्झे डुण्डुहो तधा सव्वबम्हणाणं मज्झे अहं बम्हणो। [यथा सर्वनागानां मध्ये डुण्डुभः तथा सर्वब्राह्मणानां मध्येऽहं ब्राह्मणः।]

चेटः—अज्जमित्तेअ तधा वि धोइश्शम्। (तथा कृत्वा) अज्जमित्तेअ २७ एदं तं शुवण्णभण्डअं मम दिवा तुह लत्तिं अ। ता गेण्ह। [आर्यमैत्रेय तथापि धाविष्यामि।...आर्यमैत्रेय एतत्तत्सुवर्णभाण्डं मम दिवा तव रात्रौ च। तद्गृहाण।]

(इति दत्त्वा निष्क्रान्तः) ३०

विदूषकः—(गृहीत्वा) अज्ज वि एदं चिट्ठदि। किं एत्थ उज्जइणीए चोरो वि णत्थि जो एदं दासीए पुत्तं णिद्दाचोरं ण अवहरदि। भो वअस्स अब्भन्तरचतुस्सालअं पवेसआमि णम्। [अद्याप्येतत्तिष्ठति। किमत्रोज्जयिन्यां ३३ चौरोऽपि नास्ति य एतं दास्याःपुत्रं निद्राचौरं नापहरति। भो वयस्य अभ्यन्तरचतुःशालकं प्रवेशयाम्येनम्।]

चारुदत्तः—

अलं चतुःशालमिमं प्रवेश्य प्रकाशनारीधृत एष यस्मात्।
तस्मात्स्वयं धारय विप्र तावद्यावन्न तस्याः खलु भोः समर्प्यते ॥ ७ ॥

(निद्रां नाटयन् ‘ तं तस्य स्वरसंक्रमम्–’ ३।५ इति पुनः पठति)

Vidūṣaka :—As the Duṇḍubha [species of serpents, absolutely harmless and not feared by any one] amongst all serpents, so [am] I, a Brāhmaṇa amongst all Brāhmaṇas !

Ceṭa :—Noble Maitreya, all the same, I shall wash [them]. (*Doing accordingly*) Noble Maitreya, here [is] that bunch of gold ornaments [to be kept by you now, according to Cārudatta's orders] with me, by day; and with you by night. So, take [it].

[*Gives it and exit*

Vidūṣaka :—(*Taking it*) Even now [or, so long] this has remained [with us] ! What, is there not even a [single] thief in Ujjayinī here, none who would steal this son of a whore [the suvarṇabhāṇḍa], the stealer of [my] sleep ? O friend, I shall place this in the inner quadrangle [chamber].

Cārudatta :—Do not place [lit. away with placing] this in the inner quadrangle, because it has been worn by a public woman. Therefore, O Brāhmaṇa, keep it yourself so long as it is not handed over to her. (7)

[*Gesticulating being sleepy, repeats again 'That cadence of notes of him' etc. III. 5*

विदूषकः—अवि णिद्दाअदि भवम् । [अपि निद्राति भवान् ।]

3 चारुदत्तः—अथ किम् ।

इयं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव माम् ।
अदृश्यरूपा चपला जरेव या मनुष्यसत्त्वं परिभूय वर्धते ॥ ८ ॥

विदूषकः—ता सुवेम्ह । [तत्स्वपिवः ।] (नाट्येन स्वपिति)

(ततः प्रविशति शर्विलकः)

शर्विलकः—कृत्वा शरीरपरिणाहसुखप्रवेशं
शिक्षाबलेन च बलेन च कर्ममार्गम् ।
गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो
निर्मुच्यमान इव जीर्णतनुर्भुजंगः ॥ ९ ॥

(नभोऽवलोक्य सहर्षम्) अये कथमस्तमुपगच्छति स भगवान्मृगाङ्कः । तथा हि

नृपतिपुरुषशङ्कितप्रचारं परगृहदूषणनिश्चितैकवीरम् ।
[1]घनपटलतमोनिरुद्धतारा रजनिरियं जननीव संवृणोति ॥ १० ॥

Vidūṣaka :—Are you sleepy ?

Cārudatta :—Just so ?

Here, this sleep indeed is as though approaching me from the region of the forehead, taking hold of [my] eyes ; which, like old age, of invisible form, [and] elusive, augments in strength, overcoming the vitality of man. (8)

Vidūṣaka :—Well, let us [both] sleep.

[*Gesticulates falling asleep*

(*Then enter* Śarvilaka)

Śarvilaka :—Having made a passage by boring (*karman*), affording easy entrance for the compass of [my] body, by virtue of [my] training and by [my physical] strength, I go ahead [through the passage] with [my] sides scratched by creeping on the ground, like a serpent of worn-out body, being relieved of [his] slough. (9)

(*Looking to the sky, with joy*) Oh ! What, is that divine moon going to set ? Thus—

This night, like a mother, is concealing [me], with the stars screened by the thick mass of darkness, [me] whose movement is apprehensive of the king's officers, [or, city-guards] and who am the one warrior resolved upon breaking through (*dūṣaṇa*) the houses of others ! (10

---

[1] घनतिमिरनिरुद्धसर्वभावा ।

वृक्षवाटिकापरिसरे संधिं कृत्वा प्रविष्टोऽस्मि मध्यमकम्। तद्यावदिदानीं चतुःशालकमपि दूषयामि। भोः

कामं नीचमिदं वदन्तु पुरुषाः स्वप्ने च यद्वर्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्यं न शौर्यं हि तत्।
स्वाधीना वचनीयतापि हि वरं बद्धो न सेवाञ्जलि-
मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना ॥ ११ ॥ Imp.

तत्कस्मिन्नुद्देशे संधिमुत्पादयामि।

देशः को नु जलावसेकशिथिलो यस्मिन्न शब्दो भवे-
द्भित्तीनां च न दर्शनान्तरगतः संधिः करालो भवेत्।
क्षारक्षीणतया च लोष्टककृशं जीर्णं क्व हर्म्यं भवे-
त्कस्मिन्स्त्रीजनदर्शनं च न भवेत्स्यादर्थसिद्धिश्च मे ॥ १२ ॥

weakened

(भित्तिं परामृश्य) नित्यादित्यदर्शनोदकसेचनेन[1] दूषितेयं भूमिः क्षारक्षीणा।

Having made a breach in the fencing wall of the grove of trees, I have now entered the middle [region]. So, I shall now break through the inner quadrangle as well. Oh!

I admit (*kāmam*) people may speak of this [profession of a thief] as vile, which again prospers when [people are] asleep. Overcoming by fraud those who are unsuspecting is [but] knavery; there [is] verily, no heroism about it. Still, even a blamable state, dependent on oneself is better, but not [a servile state where one is] to have hands folded in service. [And] moreover, this [is] the course followed formerly by Droṇa's son [Aśvatthāman] at the murder of kings while asleep! (11)

Well, in what region shall I make a breach?

Which possibly [is] the region loose owing to the sprinkling of water, where no noise would result [at the time of boring], where there could be a wide breach in the walls, but not within [that is, capable of attracting] the sight of others? Where could the mansion be dilapidated, with the brick-masonry rendered less strong owing to being corroded by salt-petre, where there would not be the sight of women-folk, and at the same time there would be the accomplishment of [my] desired object? (12)

ruinous

rust

(*Feeling the wall*) Here [is] the region weakened by salt-petre and rendered loose (*dūṣita*) by the sprinkling of water at

---

[1] ...दित्यादर्शनो।

मूषिकोत्करश्चेह । हन्त सिद्धोऽयमर्थः । प्रथममेतत्स्कन्दपुत्राणां सिद्धिलक्षणम् । अत्र कर्मप्रारम्भे कीदृशमिदानीं संधिमुत्पादयामि । इह खलु भगवता कनकशक्तिना चतुर्विधः संध्युपायो दर्शितः । तद्यथा—पक्वेष्टकानामाकर्षणम् आमेष्टकानां छेदनम् पिण्डमयानां सेचनम् काष्ठमयानां पाटनमिति । तदत्र पक्वेष्टके इष्टकाकर्षणम् । तत्र

Profession

पद्मव्याकोशं भास्करं बालचन्द्रं
वापीविस्तीर्णं स्वस्तिकं पूर्णकुम्भम् ।
तत्कस्मिन्देशे दर्शयाम्यात्मशिल्पं
दृष्ट्वा श्वो यं यद्विस्मयं यान्ति पौराः ॥ १३ ॥

तदत्र पक्वेष्टके पूर्णकुम्भ एव शोभते । तमुत्पादयामि ।

अन्यासु भित्तिषु मया निशि पाटितासु
क्षारक्षतासु विषमासु च कल्पनासु ।

---

the daily (*nitya*) sight of the [rise of the] sun; and here [is also] a pile of rubbish excavated by mice! Oh joy, this [my] desired object is accomplished! This [is] the first sign of success for the sons of Skanda [that is thieves]! Now here, to begin the boring, what kind of breach shall I make? Here indeed, by the Revered Kanakaśakti has been prescribed a fourfold mode for [making] breaches, which [is] as follows—(1) Pulling out the bricks if baked (2) Cutting through the bricks if unbaked (3) Sprinkling [water over bricks] made of earth-clods (4) Chipping [bricks] made of wood. So, here [the mode to be followed is] pulling out the bricks, there being baked bricks. There [too]

[are possible the following varieties]—Fully blossomed lotus, sun, crescent moon, well, rectangular, Svastika, full water-jar—So, in what place shall I show my craftsmanship seeing which tomorrow the citizens would become amazed! (13)

Now here in [this region of] baked bricks, a full-water jar [variety of breach] alone would look well [or, appropriate]. I shall effect it.

In the case of other walls and hard structures [or formations] corroded by salt-petre, breached at night, the crowd of neighbours, on seeing [the whole thing] in the [next]

दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषांश्च मे वदति कर्मणि कौशलं च ॥ १४ ॥

[नमो वरदाय कुमारकार्तिकेयाय नमः कनकशक्तये ब्रह्मण्यदेवाय देवव्रताय नमो भास्करनन्दिने नमो योगाचार्याय यस्याहं प्रथमः शिष्यः। तेन च परितुष्टेन योगरोचना मे दत्ता ।] Re

अनया हि समालब्धं न मां द्रक्ष्यन्ति रक्षिणः ।
शस्त्रं च पतितं गात्रे रुजं नोत्पादयिष्यति ॥ १५ ॥

(तथा करोति) धिक्कष्टम्। प्रमाणसूत्रं मे विस्मृतम्। (विचिन्त्य) आं इदं यज्ञोपवीतं प्रमाणसूत्रं भविष्यति। यज्ञोपवीतं हि नाम ब्राह्मणस्य महदुपकरणद्रव्यम् विशेषतोऽस्मद्विधस्य। कुतः। Re.

एतेन मापयति भित्तिषु कर्ममार्गमेतेन मोचयति भूषणसंप्रयोगान्।
उद्घाटको भवति यन्त्रदृढे कपाटे दष्टस्य कीटभुजगैः परिवेष्टनं च ॥१६॥

मापयित्वा कर्म समारभे। (तथा कृत्वावलोक्य च) एकलोष्टावशेषोऽयं संधिः।

---

morning, have spoken in condemnation of me, and at the same time of my skill in [my] job. (14)

A bow to the boon-giver Kumāra Kārtikeya, a bow to Kanakaśakti, the god good to the Brāhmaṇas, of divine law; a bow to Bhāskaranandin, a bow to Yogācārya of whom I [am] the best (*prathamaḥ*) pupil. And by him fully satisfied, was given to me a magic ointment.

The guards would not indeed be able to see me when anointed with this [yogarocanā], nor would [any] weapon striking at [my] body, produce [any] agony [or, wound]. (15)

[*Does accordingly*

Oh, fie! Alas! I have forgotten my measuring tape. (*Thinking*) Oh, yes. This [my] sacred thread would be [serving the purpose of] the measuring tape. A sacred thread, indeed, [is] a great helping material to a Brāhmaṇa, especially to [one] like us. Why? Re

With this [one] measures the passage made by boring in the walls; with this [one] unfastens the fastenings of ornaments; it becomes the opener in the case of a door made fast by a bolt; [it is] also a ligature for one bitten by insects or serpents! (16)

Having measured up, I [now] start boring. (*Doing accordingly, and beholding*) This breach has [only] one brick re-

धिक्कष्टम्। अहिना दष्टोऽस्मि। (यज्ञोपवीतेनाङ्गुलीं बद्ध्वा विषवेगं नाटयति। चिकित्सां कृत्वा) स्वस्थोऽस्मि। (पुनः कर्म कृत्वा दृष्ट्वा च) अये ज्वलति प्रदीपः। तथा हि

शिखा प्रदीपस्य सुवर्णपिञ्जरा महीतले संधिमुखेन निर्गता।
विभाति पर्यन्ततमःसमावृता सुवर्णरेखेव कषे निवेशिता ॥ १७ ॥

(पुनः कर्म कृत्वा) समाप्तोऽयं संधिः। भवतु। प्रविशामि। अथवा न तावत्प्रविशामि। प्रतिपुरुषं निवेशयामि। (तथा कृत्वा) अये न कश्चित्। नमः कार्तिकेयाय। (प्रविश्य दृष्ट्वा च) अये पुरुषद्वयं सुप्तम्। भवतु। आत्मरक्षार्थं द्वारमुद्घाटयामि। कथं जीर्णत्वाद्गृहस्य विरौति कपाटम्। तद्यावत्सलिलमन्वेषयामि। क्व नु खलु सलिलं भविष्यति। (इतस्ततो दृष्ट्वा सलिलं गृहीत्वा क्षिपन्सशङ्कम्) मा तावद्भूमौ पतच्छब्दमुत्पादयेत्। भवतु। एवं तावत्। (पृष्ठेन प्रतीक्ष्य कपाटमुद्घाट्य) भवतु। एवं तावत्। इदानीं परीक्षे किं लक्ष्यसुप्तम् उत परमार्थसुप्तमिदं द्वयम्। (त्रासयित्वा परीक्ष्य च) अये परमार्थसुप्तेनानेन भवितव्यम्। तथा हि

---

maining [to be pulled out]. Fie ! Alas ! I am bitten by a snake ! (*Having tied up his finger with the sacred thread, gesticulates the effect of poison ; applying the medicine*) I am all right [*now*]. (*Boring again, and seeing*) Aye, a lamp is burning. Thus—

The flame of the lamp, yellowish like gold, emerging through the opening of the breach, on to the ground, being enveloped by darkness on all sides, shines like a streak of gold drawn on a touch-stone ! (17)

(*Again doing the boring*) Finished [is] this breach. Well, [now] I shall enter ; or, I shall not enter for a while (*tāvat*). I shall [first] introduce a dummy man. (*Doing accordingly*) Ah ! [there is] no one [about]. A bow to Kārtikeya ! (*Entering and seeing*) Ah ! a couple of men asleep ! Well, I shall open the door for the sake of my [own] protection. What, owing to the house being old, the door is creaking ! So, I shall just make a search for water. Where possibly could the water indeed be ? (*Looking here and there, taking the water, and throwing it on, apprehensively*) I hope, it will not make any noise, while falling on the ground. Well, thus now [I shall act]. (*Waiting behind, opening the door*) Well, [I shall do] just this. Now I shall examine, whether this pair is feigning sleep or is really asleep. (*Having frightened them and examining*) Ah ! this pair ought to be really asleep ! Thus—

Good description

निःश्वासोऽस्य न शङ्कितः सुविशदस्तुल्यान्तरं वर्तते
दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला ।
गात्रं स्रस्तशरीरसंधिशिथिलं शय्याप्रमाणाधिकं
दीपं चापि न मर्षयेदभिमुखं स्याल्लक्ष्यसुप्तं यदि ॥ १८ ॥ Imp.

(समन्तादवलोक्य) अये कथं मृदङ्गः। अयं दर्दुरः। अयं पणवः। इयमपि वीणा।
एते वंशाः। अमी पुस्तकाः। कथं नाट्याचार्यस्य गृहमिदम्। अथवा भवनप्रत्ययात्प्रविष्टोऽस्मि। तत्किं परमार्थदरिद्रोऽयम् उत राजभयाच्चौरभयाद्वा भूमिष्ठं ३.
द्रव्यं धारयति। तन्ममापि नाम शर्विलकस्य भूमिष्ठं द्रव्यम्। भवतु। बीजं प्रक्षिपामि। (तथा कृत्वा) निक्षिप्तं बीजं न क्वचित्स्फारीभवति। अये परमार्थदरिद्रोऽयम्। भवतु। गच्छामि। ६

विदूषकः—(उत्स्वप्नायते) भो वअस्स संधी विअ दिज्जदि। चोरं विअ पेक्खामि। ता गेण्हदु भवं एदं सुवण्णभण्डअम्। [भो वयस्य संधिरिव दृश्यते। चौरमिव पश्यामि। तद्गृह्णातु भवानिदं सुवर्णभाण्डम्।] १.

Of this [pair], the breathing [is], not halting, quite distinct and goes on at regular intervals; the eyes [are] fast closed up, neither blinking, nor unsteady within; the limbs [are] relaxed, owing to the joints of the body being loosened and [go] beyond the measure [or, limits] of the bed. If this [pair] be feigning sleep, it could not be bearing the [gleam of the] lamp straight on [its] faces. (18)

(*Looking all round*) Aye, what, a drum! This flute (*dardura*), this Paṇava; here again a lute, these reed-pipes, these dolls! What, [is] this a house of a Professor of music [or, dancing]? Or, [it appears that I was not well-advised in that] I entered [here] on trusting to the [external bigness of the] mansion! Then, is he [the owner of the house] really poor, or does he keep the wealth buried under the ground through fear of the king or fear of thieves? In that case, [can there be any] wealth buried underground to [and not capable of being discovered by] even *me*, Śarvilaka, for the matter of that? Well, I shall scatter away the [magical] seeds. (*Doing accordingly*) The scattered seed is not expanding anywhere! Aye, [that means] this one [is] really poor. Well, I shall go.

Society
[illegible]

Vidūṣaka:—(*Talks in his sleep*) O friend, [something] like a breach is seen; [something] like a thief I see. So, take you this bunch of gold ornaments.

शर्विलकः—किं न खल्वयमिह मां प्रविष्टं ज्ञात्वा दरिद्रोऽस्मीत्युपहसति। तत्किं व्यापादयामि उत लघुत्वादुत्स्वप्नायते। (दृष्ट्वा) अये जर्जरस्नानशाटीनिबद्धं दीपप्रभयोद्दीपितं सत्यमेवैतदलंकरणभाण्डम्। भवतु। गृह्णामि। अथवा न युक्तं तुल्यावस्थं कुलपुत्रजनं पीडयितुम्। तद्गच्छामि।

विदूषकः—भो वअस्स साविदोसि गोबम्हणकामाए जइ एदं सुवण्णभण्डअं ण गेह्णसि। [भो वयस्य शापितोऽसि गोब्राह्मणकाम्यया यद्येतत्सुवर्णभाण्डं न गृह्णासि।]

शर्विलकः—अनतिक्रमणीया भगवती गोकाम्या ब्राह्मणकाम्या च। तद्गृह्णामि। अथवा ज्वलति प्रदीपः। अस्ति च मया प्रदीपनिर्वापणार्थमाग्नेयः कीटो धार्यते। तं तावत्प्रवेशयामि। तस्यायं देशकालः। एष मुक्तो मया कीटो [१]यात्वेवास्य दीपस्योपरि मण्डलैर्विचित्रैर्विचरितुम्। एष पक्षद्वयानिलेन निर्वापितो भद्रपीठेन। धिक्कृतमन्धकारम्। अथवा मयाप्यस्मद्ब्राह्मणकुले [२]न धिक्कृतमन्धकारम्। अहं हि चतुर्वेदविदोऽप्रतिग्राहकस्य पुत्रः शर्विलको नाम ब्राह्मणो

Śarvilaka :—What, [can it] not [be] indeed that this one, finding out that I have entered here, is ridiculing [me], because he is poor? So, shall I kill [him], or is he talking in [his] sleep, owing to nervousness? (*Seeing*) Ah! here [is] truly enough a bunch of ornaments wrapped up in a tattered bath-towel, flashing up in the lamp-light! All right. I shall take [it]; or, [it is] not proper to harass a nobly-born person, equally circumstanced [that is, hard hit by fortune].

Vidūṣaka :—O friend, you would be cursed in the name of the wish of cows and Brāhmaṇas, if you would not take this bunch of gold ornaments!

Society

Śarvilaka :—The venerable cow-wish and Brāhmaṇa-wish ought not to be transgressed! So, I shall take [it]; or, the lamp is burning on. Now (*asti*) again, I keep [with me] a fire-insect for the purpose of extinguishing a lamp. I shall just introduce it. This [is just the proper] time and place for [making use of] it. Here let the insect released by me, go ahead straight (*eva*) to hover about over this lamp in varying [or, wonderful] circles. Here is [the lamp] extinguished by Bhadrapīṭha [name of the insect] with the breeze from [its] pair of wings! Fie upon [this] darkness produced! Or rather, has not by me also been despised [this] darkness in the case of

---

[१] यात्वेवास्य...चरति।   [२] न dropped.

गणिकामदनिकार्थमकार्यमनुतिष्ठामि । इदानीं करोमि ब्राह्मणस्य प्रणयम् । (इति जिघृक्षति)

विदूषकः—भो वअस्स सीदलो दे अग्गहत्थो । [भो वयस्य शीतलस्तेऽग्रहस्तः ।] २४

शर्विलकः—धिक्प्रमादः । सलिलसंपर्काच्छीतलो मेऽग्रहस्तः । भवतु । कक्षयोर्हस्तं प्रक्षिपामि । २७
(नाट्येन सव्यहस्तमुष्णीकृत्य गृह्णाति)

विदूषकः—गहिदम् । [गृहीतम् ।]

शर्विलकः—अनतिक्रमणीयोऽयं ब्राह्मणप्रणयः । तद्गृहीतम् । society

विदूषकः—दाणिं विक्किणिदपण्णो विअ वाणिओ अहं सुहं सुविस्सम् । [इदानीं विक्रीतपण्य इव वणिक् अहं सुखं स्वप्स्यामि ।] ३०

शर्विलकः—महाब्राह्मण स्वपिहि वर्षशतम् । कष्टमेवं मदनिकागणिकार्थे ब्राह्मणकुलं तमसि पातितम् । अथवा आत्मा पातितः । Rl. ३३

[that is, I have brought great disgrace on] our Brāhmaṇa family! For, I, the son of one well-versed in the four Vedas and [a Gṛhastha] not accepting any gifts, a Brāhmaṇa, Śarvilaka by name, am doing this ignoble deed for the sake of the courtezan Madanikā! Now, I shall grant the request of the Brāhmaṇa.
[*Is about to take it*

Vidūṣaka :—O friend, cold [is] your fore-part of the hand [that is, the fingers]!

Śarvilaka :—Fie upon [this] carelessness [of mine]! The fore-part of my hand has become cold owing to the contact with water! Well, I shall push [my] hand in the [two] armpits. [*Gesticulating the warming up of his right hand, takes the suvarṇabhāṇḍa*

Vidūṣaka :—[Have you] taken [it]?

Śarvilaka :—This request of a Brāhmaṇa ought not to be transgressed; so [I have] taken [it].

Vidūṣaka :—Now I shall sleep peacefully, like a merchant who has sold off [his] merchandise.

Śarvilaka :—Great Brāhmaṇa, sleep on for a hundred years! Alas! Thus, for the sake of the courtezan Madanikā, has been thrown [by me my] Brāhmaṇa family in darkness [that is, disgraced]! Or rather, [my own] self has been thrown [in darkness]. Rl.

धिगस्तु खलु दारिद्र्यमनिर्वेदितपौरुषम् ।
यदेतद्गर्हितं कर्म निन्दामि च करोमि च ॥ १९ ॥

तद्यावन्मदनिकाया निष्क्रयणार्थं वसन्तसेनागृहं गच्छामि । (परिक्रम्यावलोक्य च) अये पदशब्द इव । मा नाम रक्षिणः । भवतु । स्तम्भीभूत्वा तिष्ठामि । ³ अथवा ममापि नाम शार्विलकस्य रक्षिणः । योऽहं

मार्जारः क्रमणे मृगः प्रसरणे श्येनो ग्रहालुञ्चने
सुप्तासुप्तमनुष्यवीर्यतुलने श्वा सर्पणे पन्नगः ।
माया रूपशरीरवेशरचने वाग्देशभाषान्तरे
दीपो रात्रिषु संकटेषु डुडुभो वाजी स्थले नौर्जले ॥ २० ॥

खच्चर घोड़ा

अपि च

गरुड़

भुजग इव गतौ गिरिः स्थिरत्वे पतगपतेः परिसर्पणे च तुल्यः ।
शश इव भुवनावलोकनेऽहं वृक इव च ग्रहणे बले च सिंहः ॥ २१॥

भेड़िया

Fie indeed upon penury where manly valour is subjected to humiliation [or, disparagement], in that I condemn this shameful deed, but still do [it]. (19)

Well, I shall now go to Vasantasena's house to redeem Madanikā by paying off the price. (*Moving about and beholding*) Ah ! [Something] like the noise of foot-steps ! I hope [they are] not the guards ! All right; I shall stand [stiff] like [lit. becoming] a pillar. Or rather, could there be guards even for [that is, capable of overcoming] me, Śarvilaka ? I, who [am]

Simile
animal
imagery

a cat in leaping off, a deer in running, a hawk in holding fast and rending, a dog in judging the strength of a person asleep or awake, a serpent in crawling, Māyā [juggler's magic] in assuming [various] forms, bodies or dresses, [Goddess of] speech in [making use of] the various languages of countries, a lamp during nights, a mule (*ḍuḍuma*) in crowded [or intricate] places, a horse on land, a boat on water ! (20)

And further,

In movement like a snake, a mountain in firmness; and equal to the lord of birds in heading off ; like a hare in looking about the world I [am]; and like a wolf, in capturing and a lion, in strength. (21)

१...निवेदितपौरुषम् । २ डुडुभो ।

(प्रविश्य) **रदनिका**—हद्धी हद्धी बाहिरदुआरसालाए पसुत्तो वड्ढमाणओ। सोवि एत्थ ण दीसइ। भोदु। अज्जमित्तेअं सद्दावेमि। [हा धिक् हा धिक् बहिर्द्वारशालायां प्रसुप्तो वर्धमानकः। सोऽप्यत्र न दृश्यते। भवतु। आर्यमैत्रेयं शब्दापयामि।]

(इति परिक्रामति)

शर्विलकः—(रदनिकां हन्तुमिच्छति। निरूप्य) कथं स्त्री। भवतु। गच्छामि।]

(इति निष्क्रान्तः)

रदनिका—(गत्वा सत्रासम्) हद्धी हद्धी अम्हाणं गेहे संधिं कप्पिअ चोरो णिक्कमति। भोदु। मित्तेअं गदुअ पबोधेमि। (विदूषकमुपगम्य) अज्जमित्तेअ उट्ठेहि उट्ठेहि। अम्हाणं गेहे संधिं कप्पिअ चोरो णिक्कन्तो। [हा धिक् हा धिक् अस्माकं गृहे संधिं कर्तयित्वा चौरो निष्क्रामति। भवतु। मैत्रेयं गत्वा प्रबोधयामि।...आर्यमैत्रेय उत्तिष्ठोत्तिष्ठ। अस्माकं गेहे संधिं कर्तयित्वा चौरो निष्क्रान्तः।]

विदूषकः—(उत्थाय) आः दासीए धीए किं भणासि—चोरं कप्पिअ संधी णिक्कन्तो। [आः दास्याःपुत्रिके किं भणसि—चौरं कर्तयित्वा संधिर्निष्क्रान्तः।]

रदनिका—हदास अलं परिहासेण। किं ण पेक्खसि एणम्। [हताश अलं परिहासेन। किं न प्रेक्षस एनम्।]

विदूषकः—आः दासीए धीए किं भणासि—दुदीअं विअ दुआरअं उग्घाडिदं त्ति। भो वअस्स चारुदत्त उट्ठेहि उट्ठेहि। अम्हाणं गेहे संधिं दइअ

(*Entering*) **Radanikā** :—Oh fie! Alas! Vardhamānaka had been asleep [or, was sleeping] in the hall near the outer door! He too is not to be seen here! Well, I shall shout out for the noble Maitreya!

[*Moves about*

Śarvilaka :—(*Wishes to strike* Radanikā ; *observing*) What, a woman! All right! I shall go.

[*Exit*

Radanikā :—(*Going, with fear*) Oh, fie! Alas! Having bored a hole in our house, the thief is getting away! Well, going to Maitreya, I shall awaken [him]. (*Approaching* Vidūṣaka) Noble Maitreya, get up, get up. Having bored a hole in our house, the thief has got away!

Humour

Vidūṣaka :—(*Getting up*) Ah! [You] daughter of a whore! What do you say—'Having bored a thief, the hole has got away!'

Radanikā :—Wretch, enough of joking! Can you not see this [hole]?

Vidūṣaka :—Ha! [You] daughter of a whore! What do you say—'A second door as though has been in evidence [lit.

चोरो णिक्कन्तो । [आः दास्याःपुत्रिके किं भणसि—द्वितीयमिव द्वारमुद्घाटि इति। भो वयस्य चारुदत्त उत्तिष्ठोत्तिष्ठ । अस्माकं गेहे संधिं दत्त्वा चौरो निष्क्रान्तः।

चारुदत्तः—भवतु । भोः अलं परिहासेन ।

विदूषकः—भो ण परिहासो। पेक्खदु भवम्। [भोः न परिहासः । प्रेक्षत भवान्।]

चारुदत्तः—कस्मिन्नुद्देशे ।

विदूषकः—भो एसो । [भोः एषः ।]

चारुदत्तः—(विलोक्य) अहो दर्शनीयोऽयं संधिः ।

[illegible]

उपरितल[1]निपातितेष्टकोऽयं शिरसि तनुर्विपुलश्च मध्यदेशे ।
असदृशजनसंप्रयोगभीरोर्हृदयमिव स्फुटितं महागृहस्य ॥ २२ ॥

कथमस्मिन्नपि कर्मणि कुशलता ।

विदूषकः—भो वअस्स अअं संधी दुवेहिं ज्जेव दिण्णो भवे। आगु आगन्तुएण सिक्खिदुकामेण वा । अण्णधा इध उज्जइणीए को अम्हाणं घरविहवं ण जाणादि । [भो वयस्य अयं संधिर्द्वाभ्यामेव दत्तो भवेत् । अथवागन्तुकेन शिक्षितुकामेन वा । अन्यथात्रोज्जयिन्यां कोऽस्माकं गृहविभवं न जानाति ।]

---

opened up] !' O friend Cārudatta, get up, get up. Having put up a hole in our house, a thief has got away

Cārudatta :—All right. Oh, enough of joking !

Vidūṣaka :—Oh, [this is] no joke. See you [yourself].

Cārudatta :—In what part ?

Vidūṣaka :—Oh, this [here].

Cārudatta :—(*Observing*) Oh ! [How] charming to look at [is] this hole ?

With the bricks pulled out from the top part, downwards slender [or narrow] at the top, and wide enough in the central region, this [hole is] as though the heart of [our] big house, split up, [being] afraid of association with an unworthy person ! (22)

What, [there exists] skill even in such [kind of] work ?

Vidūṣaka :—O friend, this hole could have been made only by two [kinds of persons]—either by a stranger [thief] or by a [novice thief] desirous of learning [his trade]. Otherwise, who here in Ujjayinī does not know [what kind of] prosperity [or wealth we have] in our house ?

---

[1] उपरितन ।

चारुदत्तः—

अपने व्यापार का अभ्यास

[illegible] वैदेश्येन कृतो भवेन्मम गृहे व्यापारमभ्यस्यता
नासौ वेदितवान्धनैर्विरहितं विस्रब्धसुप्तं जनम् ।
दृष्ट्वा प्राङ्महतीं निवासरचनामस्माकमाशान्वितः
संधिच्छेदनखिन्न एव सुचिरं पश्चान्निराशो गतः ॥ २३ ॥ Imp.

[ततः सुहृद्भ्यः किमसौ कथयिष्यति तपस्वी—सार्थवाहसुतस्य गृहं प्रविश्य न किंचिन्मया[1] समासादितम् इति ।]

विदूषकः—भो कधं तं ज्जेव चोरहदअं अणुसोचासि । तेण चिन्तिदं महन्तं एदं गेहम् । इदो रअणभण्डअं सुवण्णभण्डअं वा णिक्कामइस्सामि । (स्मृत्वा सविषादमात्मगतम्) कहिं तं सुवण्णभण्डअम् । (पुनरनुस्मृत्य प्रकाशम्) भो वअस्स तुमं सव्वकालं भणासि—मुक्खो मित्तेअओ अपण्डिदो मित्तेअओ त्ति । सुट्ठु मए किदं तं सुवण्णभण्डअं भवदो हत्थे समप्पअन्तेण । अण्णधा दासीए पुत्तेण अवहिदं भवे । [भोः कथं तमेव चौरहतकमनुशोचसि । तेन चिन्तितं महदेतद्गृहम् । इतो रत्नभाण्डं सुवर्णभाण्डं वा निष्कामयिष्यामि ।...कुत्र तत्सुवर्णभाण्डम् । ...भो वयस्य त्वं सर्वकालं भणसि—मूर्खो मैत्रेयः अपण्डितो मैत्रेयः इति । सुष्ठु मया कृतं तत्सुवर्णभाण्डं भवतो हस्ते समर्पयता । अन्यथा दास्याःपुत्रेणापहृतं भवेत् ।]

Cārudatta :—

[This hole] must have been made by a foreigner practicing [his] trade at my house; he did not realise [that there were] people [here] bereft of riches [and therefore] sleeping soundly; seeing first [or, in front] the huge structure of our abode, full of hope, he must have gone afterwards disappointed, quite [or, merely] fatigued with boring a hole for a long time ! (23)

Then what would that poor man be telling to his friends—'Entering the house of the son of a big merchant, nothing whatever was secured by me'!

Vidūṣaka :—Oh ! what, you are bewailing [the lot of] that same wretched thief. He [must have] thought—'Here [is] a big house; from here, I shall purloin a treasure of gems or a treasure of gold.' (*Remembering, with dejection; to himself*) Where [is] that bunch of gold ornaments ? (*Again recollecting, aloud*) O friend, you are for all time [given to] saying 'Maitreya [is] a fool, Maitreya [is] an ignorant [boor]'. I did well in placing that bunch of gold ornaments in your hands. Otherwise, [it] would have been carried off by [that] son of a whore !

---

[1] मयासादितम् ।

चारुदत्तः—अलं परिहासेन ।

विदूषकः—भो जह णाम अहं मुक्खो ता किं परिहासस्स वि देशआलं ण जाणामि । [भोः यथा नामाहं मूर्खस्तत्किं परिहासस्यापि देशकालं न जानामि ।]

चारुदत्तः—कस्यां वेलायाम् ।

विदूषकः—भो जदा तुमं मए भणिदो सि—शीदलो दे अग्गहत्थो । [भोः यदा त्वं मया भणितोऽसि—शीतलस्तेऽग्रहस्तः ।]

चारुदत्तः—कदाचिदेवमपि स्यात् । (सर्वतो निरूप्य सहर्षम्) वयस्य दिष्ट्या ते प्रियं निवेदयामि ।

विदूषकः—किं ण अवहिदम् । [किं नापहृतम् ।]

चारुदत्तः—हृतम् ।

विदूषकः—तधा वि किं पिअम् । [तथापि किं प्रियम् ।]

चारुदत्तः—यदसौ कृतार्थो गतः ।

विदूषकः—णासो क्खु सो । [न्यासः खलु सः ।]

चारुदत्तः—कथं न्यासः ।

(मोहमुपगतः)

विदूषकः—समस्ससदु भवम् । जइ णासो चोरेण अवहिदो तुमं किं मोहं उवगदो । [समाश्वसितु भवान् । यदि न्यासश्चौरेणापहृतस्त्वं किं मोहमुपगतः ।]

Cārudatta :—Away with joking.

Vidūṣaka :—Oh, even though I [may be] a fool, still, do I not know the [proper] place and time even for joking ?

Cārudatta :—At what time ?

Vidūṣaka :—Oh, when you were told by me—‘ The fore-part of your hand [is] cold ’.

Cārudatta :—Perhaps, it might have been even thus (*Observing on all sides, with joy*) Friend, luckily, I [can] tell you [something] very agreeable.

Vidūṣaka :—What, [it is] not carried off !

Cārudatta :—Carried off.

Vidūṣaka :—Then still, what [is it that is] very agreeable ?

Cārudatta :—That he went away, with [his] purpose accomplished.

Vidūṣaka :—[But it [was] indeed a deposit !

Cārudatta :—What, a deposit !

[*Falls into a swoon*

Vidūṣaka :—Be you composed. If the deposit is carried off by the thief, why did you fall into a faint ?

चारुदत्तः—(समाश्वस्य) वयस्य

कः श्रद्धास्यति भूतार्थं सर्वो मां तूलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥ २४ ॥

भोः कष्टम् ।

यदि तावत्कृतान्तेन प्रणयोऽर्थेषु मे कृतः ।
किमिदानीं नृशंसेन चारित्रमपि दूषितम् ॥ २५ ॥

विदूषकः—अहं क्खु अवलविस्सम् केण दिण्णम् केण गहिदम् को वा सक्खि त्ति । [अहं खल्वपलपिष्यामि केन दत्तम् केन गृहीतम् को वा साक्षी इति ।]

चारुदत्तः—अहमिदानीमनृतमभिधास्ये ।

भैक्ष्येणाप्यर्जयिष्यामि पुनर्न्यासप्रतिक्रियाम् ।
अनृतं नाभिधास्यामि चारित्रभ्रंशकारणम् ॥ २६ ॥

रदनिका—ता जाव अज्जाधूदाए गदुअ णिवेदेमि । [तद्यावदार्याधूतायै गत्वा निवेदयामि ।]

(इति निष्क्रान्ता)

(ततः प्रविशति चेट्या सह चारुदत्तवधूः)

Cārudatta :—(*Recovering*) Friend,

Who would be believing in the real state of things? Every one would look down upon me. For, in this world, poverty void of [all] dignity [or, exploit] is fit to be suspected [of any crime] ! (24)

Oh, alas!

If indeed, was contracted by fate intimacy with my riches—why now has [my] character also been tarnished by the wicked one! (25)

Vidūṣaka :—I shall indeed [or, am prepared to] deny [the whole thing, saying]—'By whom [was it] given? By whom, taken? Who again [was] the witness?'

Cārudatta :—Would I be telling a lie now?

Even by begging [if it comes to that] shall I again secure the requital of the deposit; [but] falsehood shall I not utter, [which would be] the cause of the loss of [my] character! (26)

Radanikā :—Well, having gone to the noble Dhūtā, I shall inform [her of all this]. [*Exit*

(*Then enter* Cārudatta's wife *with a* Ceṭī)

---

१ तुलयिष्यति । २ सक्षेपा ।

वधूः—(ससंभ्रमम्) अइ सच्चं अवरिक्खदसरीरो अज्जउत्तो अज्जमित्तेएण सह। [अयि सत्यमपरिक्षतशरीर आर्यपुत्र आर्यमैत्रेयेण सह।]

चेटी—भट्टिणि सच्चम्। किं तु जो सो वेस्साजणकेरको अलंकारओ सो अवहिदो। [भर्त्रि सत्यम्। किं तु यः स वेश्याजनस्यालंकारकः सोऽपहृतः।]

(वधूर्मोहं नाटयति)

चेटी—समस्ససदु अज्जा धूदा। [समाश्वसित्वार्या धूता।]

वधूः—(समाश्वस्य) हञ्जे किं भणासि—अवरिक्खदसरीरो अज्जउत्तो त्ति। वरं दाणिं सो सरीरेण परिक्खदो ण उण चारित्तेण। संपदं उज्जइणीए जणो एव्वं मन्तइस्सदि—दलिद्ददाए अज्जउत्तेण ज्जेव ईदिसं अकज्जं अणुचिट्ठिदम् त्ति। (ऊर्ध्वमवलोक्य निःश्वस्य च) भअवं कअन्त पोक्खरवत्तपडिदजलबिन्दुचञ्चलेहिं कीलसि दलिद्दपुरिसभाअधेएहिं। इअं च मे एक्का मादुघरलद्धा रअणावली चिट्ठदि। एदं पि अदिसोण्डीरदाए अज्जउत्तो ण गेण्हिस्सदि। हञ्जे अज्जमित्तेअं दाव सद्दावेहि। [चेटि किं भणासि—अपरिक्षतशरीर आर्यपुत्रः इति। वरमिदानीं स शरीरेण परिक्षतः न पुनश्चारित्रेण। सांप्रतमुज्जयिन्यां जन एवं मन्त्रयिष्यति—दरिद्रतयार्यपुत्रेणैवेदृशमकार्यमनुष्ठितम् इति।... भगवन्कृतान्त पुष्करपत्रपातितजलबिन्दुचञ्चलैः क्रीडसि दरिद्रपुरुषभागधेयैः। इयं च म एका मातृगृहलब्धा रत्नावली तिष्ठति। एतामप्यतिशौण्डीरतयार्यपुत्रो न ग्रहीष्यति। चेटि आर्यमैत्रेयं तावच्छब्दापय।]

extremely proud
अतीव अभिमानी

Wife :—(*Excitedly*) Well, is my Lord [husband], with the noble Maitreya really uninjured in body!

Ceṭī :—My Lady, [that is] true. But those ornaments belonging to the courtezan—well, those have been carried off.

[Wife *gesticulates a faint*

Ceṭī :—Be composed, Noble Dhūtā!

Wife :—(*Recovering*) Ceṭī, what did you say 'My Lord [is] uninjured in body?'—Better now if he were injured in body, but not in character. On the present occasion, people in Ujjayinī would be talking thus—'Owing to [his] poverty, such vile deed was done by my Lord himself.' (*Looking upwards and sighing*) Divine Fate! You play with the fortunes of poor people, fickle like the drops of water fallen on a lotus-leaf! Now here remains with me only one jewel-necklace got from [my] mother's family. My Lord [however], would

चेटी—जं अज्जा धूदा आणवेदि। (विदूषकमुपगम्य) अज्जमित्तेअ धूदा दे सद्दावेदि। [यदार्या धूताज्ञापयति। ...आर्यमैत्रेय धूता त्वां शब्दापयति।]

विदूषकः—कहिं सा। [कुत्र सा।]

चेटी—एसा चिट्ठदि। उवसप्प। [एषा तिष्ठति। उपसर्प।]

विदूषकः—(उपसृत्य) सोत्थि भोदीए। [स्वस्ति भवत्याः।]

वधूः—अज्ज वन्दामि। अज्ज पुरत्थिआमुहो होहि। [आर्य वन्दे आर्य पुरस्तान्मुखो भव।] पूर्वाभिमुखः होइ.

विदूषकः—एसो भोदि पुरत्थिआमुहो संवुत्तो म्हि। [एष भवति पुरस्तान्मुखः संवृत्तोऽस्मि।]

वधूः—अज्ज पडिच्छ इमम्। [आर्य प्रतीच्छ इमाम्।]

विदूषकः—किं ण्णेदम्। [किं न्विदम्।]

वधूः—अहं क्खु रअणसट्ठिं उववसिदा आसि। तहिं जधाविहवाणुसारेण बम्हणो पडिग्गाहिदव्वो। सो अ ण पडिग्गाहिदो ता तस्स किदे पडिच्छ इमं रअणमालिअम्। [अहं खलु रत्नषष्ठीमुपोषितासम्। तत्र यथाविभवानुसारेण ब्राह्मणः प्रतिग्राहितव्यः। स च न प्रतिग्राहितः तत्तस्य कृते प्रतीच्छेमां रत्नमालिकाम्।]

---

not take even this, owing to [his] being extremely proud. Ceṭī, just call out the noble Maitreya.

Ceṭī :—As the noble Dhūtā commands. (*Approaching Vidūṣaka*) Noble Maitreya, Dhūtā is calling you.

Vidūṣaka :—Where [is] she ?

Ceṭī :—Here stays [she]. Approach [her].

Vidūṣaka :—(*Approaching*) Welfare to you !

Wife :—Sir, I salute [you]. Sir, stay [lit. be] with [your] face towards the East.

Vidūṣaka :—Here, lady, I have turned [my] face towards the East.

Wife :—Sir, accept this [necklace].

Vidūṣaka :—What possibly [is] this ?

Wife :—I indeed had observed a fast on the Ratnaṣaṣṭhī [day]. There, a Brāhmaṇa had to be made to accept [or, given] a gift, commensurate with [my] wealth. But, he has not yet been made to accept a gift. So, on his account, accept this jewel-necklace.

विदूषकः—(गृहीत्वा) सोत्थि । गमिस्सम् । पिअवअस्सस्स णिवेदेमि । [स्वस्ति । गमिष्यामि । प्रियवयस्यस्य निवेदयामि ।]

३९ **वधूः**—अज्जमित्तेअ मा क्खु मं लज्जावेहि । [आर्यमैत्रेय मा खलु मां लज्जितां कुरु ।]

(इति निष्क्रान्ता)

विदूषकः—(सविस्मयम्) अहो से महाणुभावदा । [अहो अस्या महानुभावता ।]
४२

चारुदत्तः—अये चिरयति मैत्रेयः । मा नाम वैक्लव्यादकार्यं कुर्यात् । मैत्रेय मैत्रेय ।

४५ **विदूषकः**—(उपसृत्य) एसो म्हि । गेण्ह एदम् । [एषोऽस्मि । गृहाणैताम् ।]

(रत्नावलीं दर्शयति)

चारुदत्तः—किमेतत् ।

४८ **विदूषकः**—भो जं दे सरिसदारसंगहस्स फलम् । [भोः यत्ते सदृशदारसंग्रहस्य फलम् ।]

चारुदत्तः—कथम् । ब्राह्मणी मामनुकम्पते । कष्टम् । इदानीमस्मि दरिद्रः ।

आत्मभाग्यक्षतद्रव्यः स्त्रीद्रव्येणानुकम्पितः ।
अर्थतः पुरुषो नारी या नारी सार्थतः पुमान् ॥ २७ ॥

अथवा । नाहं दरिद्रः । यस्य मम

Vidūṣaka :—(*Taking it*) Welfare [to you] ! I shall go [and] deliver [this] to [my] dear friend.

Wife :—Noble Maitreya, do not indeed make me feel ashamed !

[*Exit*

Vidūṣaka :—(*With amazement*) Oh, her magnanimity !

Cārudatta :—Ah, Maitreya is tarrying ! I hope he does not do anything unbecoming through distraction. Maitreya, Maitreya !

Vidūṣaka :—(*Apprcaching*) Here am [I] ! Take this.

[*Shows the jewel-necklace*

Cārudatta :—What [is] this ?

Vidūṣaka :—Oh, what [is] the fruit of your marrying a worthy wife !

Cārudatta :—What, [even my] wife [lit. Brāhmaṇa woman] feels pity for me ! Alas ! *Now* am I [really] poor,

whose wealth is lost through my [ill] luck, and who I [am] pitied by a woman's wealth. [It is] through money [that] a man [becomes] a woman ; [and] through money, a woman, man. (27)

Or rather, I am *not* poor, who I have

औदार्य भाव वाली स्त्री तुम्हारे जैसा मित्र

विभवानुगता भार्या सुखदुःखसुहृद्भवान् । सत्य से अलग न होना (जो)
सत्यं च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम् ॥ २८ ॥ कि दरिद्रों में [illegible]

मैत्रेय गच्छ रत्नावलीमादाय वसन्तसेनायाः सकाशम् । वक्तव्या च सा मद्वचनात्—यत्खल्वस्माभिः सुवर्णभाण्डमात्मीयमिति कृत्वा विश्रम्भाद्द्यूते हारितम् । तस्य कृते गृह्यतामियं रत्नावली इति । //M · 3.

विदूषकः—मा दाव अक्खाइदस्स अभुत्तस्स अप्पमुल्लस्स चोरेहिं अवहिदस्स कारणादो चतुःसमुद्दसारभूदा रअणावली दीअदि । [मा तावदखादितस्याभुक्तस्याल्पमूल्यस्य चौरैरपहृतस्य कारणाच्चतुःसमुद्रसारभूता रत्नावली दीयते ।] ६

चारुदत्तः—वयस्य मा मैवम् ।

यं समालम्ब्य विश्वासं न्यासोऽस्मासु तया कृतः ।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते ॥ २९ ॥

[तद्वयस्य अस्मच्छरीरस्पृष्टिकया शापितोऽसि नैनामग्राहयित्वात्रागन्तव्यम् । वर्धमानक]

---

a wife endowed with magnanimity, you a dear friend in prosperity and in adversity [or, happiness and grief], and who have not swerved from truth [rectitude] which is difficult to have among the poor. (28)

Maitreya, go, taking the jewel-necklace to Vasantasenā. And she should be addressed in my name [as follows]—'Please accept this jewel-necklace in place of the bunch of gold ornaments, which was indeed gambled away at play freely by us, thinking (*kṛtvā*) that it belonged to us.'

Vidūṣaka:—Let not, for the matter of that, be given the jewel-necklace which is the essence [that is, most costly object, treasure] of the four oceans, for the sake of [that object of] small value, which has been neither eaten, nor enjoyed, [but was simply] carried off by thieves !

Cārudatta:—Friend, no, not so.

Depending upon which confidence [or, faith], the deposit was made with us,—of that great trust itself, is this price paid. (29)

So, friend, you are abjured by the touch of our body—you should not come back, without having made [Vasantasenā] accept this ! Vardhamānaka,

३-३०-प्र०]

एताभिरिष्टकाभिः संधिः क्रियतां सुसंहतः शीघ्रम् ।
परिवादबहलदोषान्न यस्य रक्षां परिहरामि ॥ ३० ॥

वयस्य मैत्रेय भवताप्यकृपणशौण्डीर्यमभिधातव्यम् ।

विदूषकः—भो दलिद्दो किं अकिविणं मन्तेदि । [भोः दरिद्रः किमकृपणं ३ मन्त्रयते ।]

चारुदत्तः—अदरिद्रोऽस्मि सखे यस्य मम । [विभवानुगता भार्या (३।२८) इत्यादि पुनः पठति ।] तद्गच्छतु भवान् । अहमपि कृतशौचः संध्यामुपासे ।

६

(इति निष्क्रान्ताः सर्वे)

इति संधिच्छेदो नाम तृतीयोऽङ्कः ।

Let the hole be properly filled up with these bricks quickly, the care of which I cannot avoid, owing to the many evils [accruing] from scandal. (30)

Friend Maitreya, you too should speak [to her] in an exalted and dignified manner.

Vidūṣaka :—Oh ! Does a poor man [necessarily] speak in a miserly way ?

Cārudatta :—I am *not* poor, friend, who I have (*Repeats again* (*III.28*) '*A wife endowed with magnanimity*' *etc.*) So, you may go. I too, going through ablutions, shall offer the morning prayers.

[*Exeunt Omnes*

Here ends the Third Act called ' Saṁdhiccheda '
[*the Boring of a Hole*]

---

१ न्नयस्य, न्नृपस्य ।

चतुर्थोऽङ्कः ।

(ततः प्रविशति चेटी)

चेटी—आणत्तम्हि अत्ताए अज्जआए सआसं गन्तुम् । एसा अज्जआ चित्तफलआणिसण्णदिट्ठी मदणिआए सह किंपि मन्तअन्ती चिट्ठदि । ता जाव उवसप्पामि । [आज्ञप्तास्मि मात्रार्यायाः सकाशं गन्तुम् । एषार्या चित्रफलकानिषण्णदृष्टिर्मदनिकया सह किमपि मन्त्रयमाणा तिष्ठति । तद्यावदुपसर्पामि ।](इति परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टा वसन्तसेना मदनिका च)

वसन्तसेना—हञ्जे मदणिए अवि सुसदिसी इअं चित्ताकिदी अज्जचारुदत्तस्स । [चेटि मदनिके अपि सुसदृशीयं चित्राकृतिरार्यचारुदत्तस्य ।]

मदनिका—सुसदिसी । [सुसदृशी ।]

वसन्तसेना—कधं तुमं जाणासि । [कथं त्वं जानासि ।]

मदनिका—जेण अज्जआए सुसिणिद्धा दिट्ठी अणुलग्गा । [येनार्यायाः सुस्निग्धा दृष्टिरनुलग्ना ।]

वसन्तसेना—हञ्जे किं वेसवासदाक्खिण्णेण मदणिए एव्वं भणासि । [चेटि किं वेशवासदाक्षिण्येन मदनिके एवं भणसि ।]

ACT IV

(*Then enter* Ceṭī)

Ceṭī :—I have been ordered by [Vasantasenā's] mother to go to Madam. Here is Madam with [her] eyes resting on the picture-board, talking about something or other with Madanikā. So, I shall approach [her].

(*Then enter* Vasantasenā *as referred to, and* Madanikā)

Vasantasenā :—O Madanikā, is this quite a faithful portrait of the noble Cārudatta ?

Madanikā :—Quite faithful.

Vasantasenā :—How do you know ?

Madanikā :—Because Madam's extremely affectionate glance is sticking to [it].

Vasantasenā :—O Madanikā, do you speak thus [merely] on account of courtesy associated with residence in the Courtezan-quarter ?

मदनिका—अज्जए किं जो ज्जेव जणो वेसे पडिवसदि सो ज्जेव अलीअदक्खिणो भोदि। [आर्ये किं य एव जनो वेशे प्रतिवसति स एवालीकदक्षिणो भवति ।]

वसन्तसेना—हञ्जे णाणापुरिससङ्गेण वेस्साजणो अलीअदक्खिणो भोदि। [चेटि नानापुरुषसङ्गेन वेश्याजनोऽलीकदक्षिणो भवति ।]

मदनिका—जदो दाव अज्जआए दिट्ठी इध अभिरमदि हिअअं च तस्स कारणं किं पुच्छीअदि । [यतस्तावदार्याया दृष्टिरिहाभिरमते हृदयं च तस्य कारणं किं पृच्छ्यते ।]

वसन्तसेना—हञ्जे सहीजणादो उवहसणीअदां रक्खामि । [चेटि सखीजनादुपहसनीयतां रक्षामि ।]

मदनिका—अज्जए एव्वं णेदम् । सहीजणचित्ताणुवत्ती अबलाअणो भोदि । [आर्ये एवं नेदम् । सखीजनचित्तानुवर्त्यबलाजनो भवति ।]

प्रथमा चेटी—(उपसृत्य) अज्जए अत्ता आणवेदि—गहिदावगुण्ठणं पक्खदुआरए सज्जं पवहणम्। ता गच्छ त्ति। [आर्ये माताज्ञापयति—गृहीतावगुण्ठनं पक्षद्वारे सज्जं प्रवहणम् । तद्गच्छ इति ।]

वसन्तसेना—हञ्जे किं अज्जचारुदत्तो मं णइस्सदि । [चेटि किमार्यचारुदत्तो मां नेष्यति ।]

Madanikā :—Madam, is it that whosoever person resides in the Courtezan-quarter, that same is [necessarily] falsely courteous ?

Vasantasenā :—Ceṭī, owing to association with different men, the courtezan-class does become falsely courteous.

Madanikā :—When indeed the glance of Madam as well as [her] heart take delight here [in this portrait], why should the reason thereof be asked ?

Vasantasenā :—Ceṭī, I [want to] avoid being ridiculed by [my female] companions.

Madanikā :—Madam, it [is] not so. Women [in general], are wont to act in accordance with the desires [or, intentions, minds] of [their] friends.

First Ceṭī :—(*Approaching*) Madam, Mother orders—'The car [is] ready, covered up, at the side-door. So, go.'

Vasantasenā :—Ceṭī, what, [is it] the noble Cārudatta [who] would be taking me [that is, has sent this car for me to go to his house] ?

चेटी—अज्जए जेण पवहणेण सुवण्णदससाहस्सिओ अलंकारओ अणुप्पेसिदो। [आर्ये येन प्रवहणेन सह सुवर्णदशसाहस्रिकोऽलंकारोऽनुप्रेषितः।]

वसन्तसेना—को उण सो। [कः पुनः सः।]

चेटी—एसो ज्जेव राअस्सालो संठाणओ। [एष एव राजश्यालः संस्थानकः।]

वसन्तसेना—(सक्रोधम्) अवेहि। मा पुणो एव्वं भणिस्ससि। [अपेहि। मा पुनरेवं भणिष्यसि।]

चेटी—पसीदहु पसीदहु अज्जआ। संदेसेण म्हि पेसिदा। [प्रसीदतु प्रसीदत्वार्या। संदेशेनास्मि प्रेषिता।]

वसन्तसेना—अहं संदेसस्स ज्जेव कुप्पामि। [अहं संदेशस्यैव कुप्यामि।]

चेटी—ता किंति अत्तं विण्णविस्सम्। [तत्किमिति मातरं विज्ञापयिष्यामि।]

वसन्तसेना—एव्वं विण्णाविदव्वा—जइ मं जीअन्तीं इच्छसि ता एव्वं ण पुणो अहं अत्ताए आण्णाविदव्वा। [एवं विज्ञापयितव्या—यदि मां जीवन्तीमिच्छसि तदेवं न पुनरहं मात्राज्ञापयितव्या।]

चेटी—जधा दे रोआदि। [यथा ते रोचते।] (इति निष्क्रान्ता)

(प्रविश्य) **शर्विलकः**—

Ceṭī :—Madam, [he] by whom has been sent along with the car an ornament [or, ornaments] worth ten thousand suvarṇas.

Vasantasenā :—Who again [is] he ?

Ceṭī :—This same, king's brother-in-law Saṁsthānaka !

Vasantasenā :—(*With indignation*) Get away ! Do not talk thus [ever] again !

Ceṭī :—Pardon, Madam, pardon ! I have been sent with a message [for the contents of which I am not responsible] !

Vasantasenā :—I am angry with the message itself.

Ceṭī :—Well then, what shall I submit to Mother ?

Vasantasenā :—[She] should be thus addressed—'If you wish me to live, then I should not be again directed [or, ordered] by [my] mother in this way'.

Ceṭī :—As you like. [*Exit*

(*Entering*) **Śarvilaka** :—

Censure दत्त्वा निशाया वचनीयदोषं निद्रां च जित्वा नृपतेश्च रक्षान् ।
स एष सूर्योदयमन्दरश्मिः क्षपाक्षयाच्चन्द्र इवास्मि जातः ॥ १ ॥

अपि च

यः कश्चित्त्वरितगतिर्निरीक्षते मां
संभ्रान्तं द्रुतमुपसर्पति स्थितं वा ।
guilty तं सर्वं तुलयति दूषितोऽन्तरात्मा apprehensive
स्वैर्दोषैर्भवति हि शङ्कितो मनुष्यः ॥ २ ॥

मया खलु मदनिकायाः कृते साहसमनुष्ठितम् ।

परिजनकथासक्तः कश्चिन्नरः समुपेक्षितः
क्वचिदपि गृहं नारीनाथं निरीक्ष्य विवर्जितम् ।
नरपतिबले पार्श्वायाते स्थितं गृहदारुव-
द्व्यवसितशतैरेवंप्रायैर्निशा दिवसीकृता ॥ ३ ॥

(इति परिक्रामति)

वसन्तसेना —हञ्जे इमं दाव चित्तफलअं मम सअणीए ठाविअ तालवेण्टअं गेण्हिअ लहु आअच्छ । [चेटि इमं तावच्चित्रफलकं मम शयनीये स्थापयित्वा तालवृन्तं गृहीत्वा लघ्वागच्छ ।]

Having given over the sin of censure to the night and conquered [or, overreached] sleep as well as the king's guards, here have I become at the passing away of night, like the moon with [his] rays dimmed at the rise of the sun. (1)

And again,

Whosoever going hastily, looks at me, or quickly gets near me excited and standing by—[my] guilty inner self is apprehensive of all of them. For, a man becomes suspicious, owing to [or, in consideration of] his own faults. (2)

By me indeed has been carried out a rash deed for the sake of Madanikā.

Some person engaged in conversation with [his] retinue, was ignored [by me]; somewhere, I kept away from a house, observing [it] to be occupied by women [alone]; when the king's guards passed near, I stood like a house-pillar; mostly by such like hundreds of attempts, I turned night into day ! (3)

[*Moves about*

Vasantasenā :—Ceṭī, just placing this picture-board on my bed [and] taking a fan, come [here] quickly .

---

१ रक्ष्यान् । २ त्वरितगतिं निरी... ।

मदनिका—जं अज्जआ आणवेदि। [यदार्याज्ञापयति।] (इति फलकं गृहीत्वा निष्क्रान्ता)

शर्विलकः—इदं वसन्तसेनाया गृहम्। तद्यावत्प्रविशामि। (प्रविश्य) क्व नु मया मदनिका द्रष्टव्या। ६.

(ततः प्रविशति तालवृन्तहस्ता मदनिका)

शर्विलकः—[दृष्ट्वा] अये इयं मदनिका। ९

मदनमपि गुणैर्विशेषयन्ती रतिरिव मूर्तिमती विभाति येयम्।
मम हृदयमनङ्गवह्नितप्तं भृशमिव चन्दनशीतलं करोति ॥ ४ ॥

मदनिके।

मदनिका—[दृष्ट्वा] अम्मो कधं सव्विलओ। सव्विलअ साअदं दे। कहिं तुमम्। [आश्चर्यम् कथं शर्विलकः। शर्विलक स्वागतं ते। कुत्र त्वम्।] ३

शर्विलकः—कथयिष्यामि। (इति सानुरागमन्योन्यं पश्यतः)

वसन्तसेना—चिरआदि मदणिआ। ता कहिं णु क्खु सा। (गवाक्षेकेन दृष्ट्वा) कधम्। एसा केनावि पुरिसकेण सह मन्तअन्ती चिट्ठदि। जधा अदिसिणिद्धाए णिच्चलदिट्ठीए आपिबन्ती विअ एदं णिज्झाअदि तधा तक्केमि एसो सो जणो एदं इच्छादि अभुजिस्सं कादुम्। ता रमदु रमदु। मा कस्सावि पीदिच्छेदो ६.

Madanikā :—As Madam commands. [*Taking the board, exit*

Sarvilaka :—This [is] Vasantasenā's house. So, I shall enter [it]. (*Entering*) Where indeed could Madanikā be seen by me?

(*Then enter* Madanikā, *fan in hand*)

Śarvilaka :—(*Seeing*) Oh, this [is] Madanikā,

this one, who surpassing even Madana by [her] qualities, appears like Rati [herself] in bodily form, makes my heart heated by the fire of love, extremely cool as it were with sandal [paste]. (4)

Madanikā !

Madanikā :—(*Seeing*) Oh ! What, Śarvilaka ! Śarvilaka, welcome to you ! Where [or, what for are] you [here] ?

Śarvilaka :—I shall tell [you].

[*Both look at each other affectionately*

Vasantasenā :—Madanikā is taking a long time [to come back]. Well, where indeed [is] she? (*Looking through the window*) What ! Here is she conversing with some man ! As she is intently looking at him, as though drinking [him] with

भोदु। ण क्खु सद्दाविस्सम्। [चिरयति मदनिका। तत्कुत्र नु खलु सा। ...कथम्। एषा केनापि पुरुषकेण सह मन्त्रयमाणा तिष्ठति। यथातिस्निग्धया निश्चलदृष्ट्यापिबन्तीवैतं निध्यायति तथा तर्कयामि एष स जन एतामिच्छत्यभुजिष्यां कर्तुम्। तद्रमताम् रमताम्। मा कस्यापि प्रीतिच्छेदो भवतु। न खल्वाकारयिष्यामि।]

मदनिका—सव्विलअ कधेहि। [शर्विलक कथय।]

(शर्विलकः सशङ्कं दिशोऽवलोकयति)

मदनिका—सव्विलअ किं ण्णेदम्। ससङ्को विअ लक्खीअसि। [शर्विलक किं न्विदम्। सशङ्क इव लक्ष्यसे।]

शर्विलकः—वक्ष्ये त्वां किंचिद्रहस्यम्। तद्विविक्तमिदम्।

मदनिका—अध इं। [अथ किम्।]

वसन्तसेना—कधं परमरहस्सम्। ता ण सुणिस्सम्। [कथं परमरहस्यम्। तन्न श्रोष्यामि।]

शर्विलकः—मदनिके किं वसन्तसेना मोक्ष्यति त्वां निष्क्रयेण।

वसन्तसेना—कधं मम संबन्धिणी कधा। ता सुणिस्सं इमिणा गवक्खेण ओवारिदसरीरा। [कथं मम संबन्धिनी कथा। तच्छ्रोष्याम्यनेन गवाक्षेणापवारितशरीरा।]

---

her] extremely affectionate fixed gaze, I guess that this [is the] same person [who] wishes to make her a free woman. So, let [her] enjoy, enjoy. Let there be no interruption of love-course] of any one whatsoever. I will not indeed call her.

Madanikā :—Śarvilaka, tell [me].

[Śarvilaka *looks about in all directions, with apprehension*

Madanikā:—Śarvilaka, what possibly [is] this? You appear to be as though apprehensive [of something].

Śarvilaka :—I shall tell you some secret. So, is this a secluded place [where no one can overhear us] ?

Madanikā :—Just so.

Vasantasenā :—What, a very close secret! Then I do not want to [lit. will not] hear.

Śarvilaka :—Madanikā, would Vasantasenā release you from bondage] for a ransom ?

Vasantasenā :—What, [some] talk concerning myself! Well, I shall then hear, with [my] person hidden behind this window.

मदनिका—सव्विलअ भणिदा मए अज्जआ। तदो भणादि—जइ मम छन्दो तदा विणा अत्थं सव्वं परिजणं अभुजिस्सं करइस्सम्। अध सव्विलअ कुदो दे एत्तिओ विहवो जेण मं अज्जआसआसादो मोआइस्सासि। [शर्विलक २७ भणिता मयार्या। तदा भणाति—यदि मम छन्दस्तदा विनार्थं सर्वं परिजनमभुजिष्यं करिष्यामि। अथ शर्विलक कुतस्त एतावान्विभवः येन मामार्यासकाशान्मोचयिष्यसि।]

शर्विलकः—दारिद्र्येणाभिभूतेन त्वत्स्नेहानुगतेन च।
अद्य रात्रौ मया भीरु त्वदर्थे साहसं कृतम् ॥ ५ ॥

वसन्तसेना—पसण्णा से आकिदी। साहसकम्मदाए उण उव्वेअणीआ। [प्रसन्नास्याकृतिः। साहसकर्मतया पुनरुद्वेजनीया।]

मदनिका—सव्विलअ इत्थीकल्लवत्तस्स कारणेण उहअं पि संसए विणिक्खित्तम्। [शर्विलक स्त्रीकल्यवर्तस्य कारणेनोभयमपि संशये विनिक्षिप्तम्।] ३ //RC.

शर्विलकः—किं किम्।

मदनिका—सरीरं चारित्तं अ। [शरीरं चारित्रं च।]

शर्विलकः—अपण्डिते साहसे श्रीः प्रतिवसति। F//RC ६

Madanikā :—Śarvilaka, Madam was spoken to by me [about it]. Then she said—'If [I had] my will, I shall make all servants free [from bondage] without any money [paid as ransom].' Now [or, but], Śarvilaka, whence so much wealth with you, by which you would free me from [slavery to] Madam ?

Śarvilaka :—

Overwhelmed with poverty and goaded by [or, endowed with] love for you, by me, [O] timid one, was committed for your sake a rash deed, to-day [last] night ! (5)

Vasantasenā :—His appearance [is] peaceful ; owing to [his] having done a rash deed, [it ought to have been] again one capable of causing terror [or, excitement] !

Madanikā :—Śarvilaka, for the sake of a mere trifle [or, bagatelle] viz. a woman, even both have been jeopardised by you !

Śarvilaka :—What, what ?

Madanikā :—[Your] body and [your] character.

Śarvilaka :—Ignorant one, fortune resides in rashness [or, adventures ; fortune favours the brave].

मदनिका—सव्विलअ अखण्डिदचारित्तो सि । ता ण खु ते मम कार-
१ णादो साहसं करन्तेण अच्चन्तविरुद्धं आचरिदम् । [शर्विलक अखण्डितचारि-
त्रोऽसि । तत्र खलु त्वया मम कारणात्साहसं कुर्वतात्यन्तविरुद्धमाचरितम् ।]

शर्विलकः—नो मुष्णाम्यबलां विभूषणवतीं फुल्लामिवाहं लतां
विप्रस्वं न हरामि काञ्चनमथो यज्ञार्थमभ्युद्धृतम् ।
धात्र्युत्सङ्गगतं हरामि न तथा बालं धनार्थी क्वचि-
त्कार्याकार्यविचारिणी मम मतिश्चौर्येऽपि नित्यं स्थिता॥

तद्विज्ञाप्यतां वसन्तसेना—

अयं तव शरीरस्य प्रमाणादिव निर्मितः ।
अप्रकाशो ह्यलंकारो मत्स्नेहाद्धार्यतामिति॥ ७ ॥

मदनिका—सव्विलअ अप्पकाशो अलंकारओ । अअं अ जणो त्ति दुवे
वि ण जुज्जदि । ता उवणेहि दाव । पेक्खामि एदं अलंकारअम् । [शर्विलक
३ अप्रकाशोऽलंकारः । अयं च जन इति द्वयमपि न युज्यते । तदुपनय तावत् ।
पश्याम्येतमलंकारम् ।]

Madanikā :—Śarvilaka, you are [so far] possessed of a stainless character [or, is your character unsullied or in tact]? So, while committing a rash deed for my sake, [I hope] you indeed did not do [something] very very objectionable !

Śarvilaka :

I do not rob [any helpless] woman with [her] ornaments on, like a creeper fully blossomed ; I do not take away the possessions of a Brāhmaṇa, or gold amassed for the purpose of [performing] a sacrifice ; I seeking wealth do not likewise carry away any time [or anywhere] a child lying on the nurse's lap. [Thus] even in [the matter of] stealing, my mind has always been given to considering what ought to be done, and what ought not to be done. *(6)*

So, respectfully submit to Vasantasenā :—

Let these ornaments [lit. this ornament], as though [specially] made to suit the measure of your body, be worn [by you] out of consideration [lit. love] for me, not [in] public [or, openly]. *(7)*

Madanikā :—Śarvilaka, the ornaments [to be worn] not in] public, and this person [Vasantasenā]—well, these two again cannot go together [or, harmonise]. So, bring [them] to me for the present. I shall see these ornaments.

शर्विलकः—इदमलंकरणम् । (इति साशङ्कं समर्पयति)

मदनिका–(निरूप्य) दिट्ठपुरुव्वो विअ अअं अलंकारओ । ता भणेहि ६
कुदो दे एसो । [दृष्टपूर्व इवायमलंकारः । तद्भण कुतस्त एषः ।]

शर्विलकः—मदनिके किं तवानेन । गृह्यताम् ।

मदनिका—(सरोषम्) जइ मे पच्चअं ण गच्छसि ता किंणिमित्तं मं ९
णिक्किणासि । [यदि मे प्रत्ययं न गच्छसि तत्किंनिमित्तं मां निष्क्रीणासि ।]

buy me off

शर्विलकः—अयि प्रभाते मया श्रुतं श्रेष्ठिचत्वरे यथा—सार्थवाहस्य
चारुदत्तस्य इति । (वसन्तसेना मदनिका च मूर्च्छां नाटयतः) १२

शर्विलकः—मदनिके समाश्वसिहि । किमिदानीं त्वं

विषादस्रस्तसर्वाङ्गी संभ्रमभ्रान्तलोचना ।
नीयमाना[1]भुजिष्यात्वं कम्पसे नानुकम्पसे ॥ ८ ॥

reedom.

मदनिका—(समाश्वस्य) साहसिअ ण क्खु तुए मम कारणादो इमं
अकज्जं करन्तेण तस्सिं गेहे कोवि वावादिदो परिक्खदो वा । [साहसिक
न खलु त्वया मम कारणादिदमकार्यं कुर्वता तस्मिन्गेहे कोऽपि व्यापादितः ३
परिक्षतो वा ।]

Śarvilaka :—These [are] the ornaments.

[*Hands them over apprehensively*

Madanikā :—(*Scrutinising*) These ornaments [are] like [those] seen before. So, tell [me] whence these [came] to you.

Śarvilaka :—Madanikā, what have you to do with this? Take [them].

Madanikā :—(*With anger*) If you are not [going to the extent of] trusting me, then, for what reason are you buying me off ?

Śarvilaka :—Oh, in the morning, I heard at the Merchant-square that [they] belonged to the big merchant Cārudatta.

[Vasantasenā *and* Madanikā *gesticulate fainting away*

Śarvilaka :—Madanikā, be composed! Why now, you with all [your] limbs getting relaxed owing to dejection, with [your] eyes rolling about through excitement, [and] being given the status of one not a slave, shake away [but] show not sympathy [for me]? (8)

Madanikā :—(*Recovering*) [You] adventurer, while committing this ignoble deed for my sake, [I hope] you indeed did not kill or wound any one in that house ?

---

[1] नीयमाना भजिष्यात्वं ।

शर्विलकः—मदनिके भीते सुप्ते न शर्विलकः प्रहरति । तन्मया न कश्चिद्व्यापादितो नापि परिक्षतः ।

मदनिका—सच्चम् । [सत्यम् ।]

शर्विलकः—सत्यम् ।

वसन्तसेना—(संज्ञां लब्ध्वा) अम्महे पच्चुवजीविदम्हि । [आश्चर्यम् प्रत्युपजीवितास्मि ।]

मदनिका—पिअम् । [प्रियम् ।]

शर्विलकः—(सेर्ष्यम्) मदनिके किं नाम प्रियमिति ।

त्वत्स्नेहबद्धहृदयो हि करोम्यकार्यं
सद्वृत्तपूर्वपुरुषेऽपि कुले प्रसूतः ।
रक्षामि मन्मथविपन्नगुणोऽपि मानं
मित्रं च मां व्यपदिशस्यपरं च यासि ॥ ९ ॥

self-respect

Good simile etc.

(साकूतम्) इह सर्वस्वफलिनः कुलपुत्रमहाद्रुमाः ।
निष्फलत्वमलं यान्ति वेश्याविहगभक्षिताः ॥ १० ॥

Śarvilaka :—Madanikā, Śarvilaka does not strike at one afraid or asleep. So, no one was killed by me, nor even wounded.

Madanikā :—[Is this] true ?

Śarvilaka :—True.

Vasantasenā :—(*Gaining consciousness*) Oh ! I am [now] brought back to life !

Madanikā :—Very agreeable !

Śarvilaka :—(*Jealously*) Madanikā, what indeed [is this] 'very agreeable '?

With [my] heart bound down by love for you, I again do an ignoble deed, even though born in a family in which the ancestors were of righteous conduct. I preserve [my] self-respect, though [other] qualities of mine have been destroyed by love. You designate me as [your] friend and yet go after another ! (9)

(*Meaningly*) Here [in this world], the big trees in the form of nobly-born men, with fruits in the form of [their] all-in-all, become completely bereft of fruits, [when] eaten up by birds in the form of courtezans ! (10)

अयं च सुरतज्वालः कामाग्निः प्रणयेन्धनः ।
नराणां यत्र हूयन्ते यौवनानि धनानि च ॥ ११ ॥

वसन्तसेना—(सस्मितम्) अहो से अत्थाणे आवेओ । [अहो अस्यास्थान आवेगः ।]

शर्विलकः—सर्वथा

अपण्डितास्ते पुरुषा मता मे ये स्त्रीषु च श्रीषु च विश्वसन्ति ।
श्रियो हि कुर्वन्ति तथैव नार्यो भुजङ्गकन्यापरिसर्पणानि ॥ १२ ॥ good simile
स्त्रीषु न रागः कार्यो रक्तं पुरुषं स्त्रियः परिभवन्ति ।
रक्तैव हि रन्तव्या विरक्तभावा तु हातव्या ॥ १३ ॥

सुष्ठु खल्विदमुच्यते—

एता हसन्ति च रुदन्ति च वित्तहेतो-
र्विश्वासयन्ति पुरुषं न तु विश्वसन्ति ।
तस्मान्नरेण कुलशीलसमन्वितेन
वेश्याः श्मशानसुमना इव वर्जनीयाः ॥ १४ ॥

अपि च

And this [is] the fire of love with flames in the form of enjoyment, [and] fuel in the form of courting, in which are sacrificed the youth and riches of men! (11)

Vasantasenā :—(*Smilingly*) Oh, his unjustified vehemence!

Śarvilaka :—Completely [or, in every way]

unwise are, in my opinion, those men who place [their] trust in women and in riches; for, riches and exactly likewise women do [their] movements [like those] of snake-maidens! (12)

No attachment should be made to women; women insult a person attached [to them]. Only that [woman, who is herself] attached should be sported with, but [when] devoid of emotion, [she] should be thrown overboard. (13)

It has been indeed well said :—

These [women] laugh and weep as well, for the sake of wealth; [they] make a man confide [in them] but do not confide [in him]. Therefore, by a man endowed with a noble birth [lit. family] and character, should be kept at arm's length [or, avoided] courtezans, like flowers in a cemetery. (14)

And further,

समुद्रवीचीव चलस्वभावाः संध्याभ्रलेखेव मुहूर्तरागाः ।
स्त्रियो हृतार्थाः पुरुषं निरर्थं निष्पीडितालक्तकवत्त्यजन्ति ॥ १५ ॥

स्त्रियो नाम चपलाः

अन्यं मनुष्यं हृदयेन कृत्वा अन्यं ततो दृष्टिभिराह्वयन्ति ।
अन्यत्र मुञ्चन्ति मदप्रसेकमन्यं शरीरेण च कामयन्ते ॥ १६ ॥

सूक्तं खलु कस्यापि—

न पर्वताग्रे नलिनी प्ररोहति न गर्दभा वाजिधुरं वहन्ति ।
यवाः प्रकीर्णा न भवन्ति शालयो न वेशजाताः शुचयस्तथाङ्गनाः ॥ १७ ॥

आः दुरात्मन् चारुदत्तहतक अयं न भवसि । (इति कतिचित्पदानि गच्छति)

मदनिका—(अञ्चले गृहीत्वा) अइ असंबद्धभासअ असंभावणीए कुप्पसि।
१ [अयि असंबद्धभाषक असंभावनीये कुप्यसि ।]

शर्विलकः— कथमसंभावनीयं नाम ।

Fickle-natured like a sea-wave, displaying [lit. having] affection for a short time [only, also displaying redness] like the evening cloud-line, women after taking [lit. who have taken] away the wealth [of a man] abandon the man bereft of wealth, like the Alaktaka pressed out. (15)

Women [are] indeed fickle [or, Frailty ! thy name is woman !]

Having got one man in their heart, [they] invite [some one other than him by [their] eyes ; they pour out [their] effusion of passion for a third [lit. elsewhere], and carnally love a fourth [lit. another] ! (16)

[This is] a fine saying of some one—

Not on the mountain-top does a lotus-plant grow ; donkeys do not bear the yoke of horses ; barley-seeds scattered do not become [that is, grow into] rice-crop ; likewise, women born in the Courtezan-quarter [are] not chaste. (17)

Ah ! Rascal ! Accursed Cārudatta ! Here you are no more ! [*Goes a few steps*

Madanikā :—(*Taking hold of him by the hem of his garment*) O talker of nonsense, you are enraged at something unthinkable [or, inconceivable] !

Śarvilaka :—How indeed unthinkable !

मदनिका—एसो क्खु अलंकारओ अज्जआकेरओ। [एष खल्वलंकार आर्यासंबन्धी ।] ६

शर्विलकः—ततः किम् ।

मदनिका—स च तस्स अज्जस्स हत्थे विणिक्खित्तो। [स च तस्यार्यस्य हस्ते विनिक्षिप्तः ।] ९

शर्विलकः—किमर्थम् ।

मदनिका—(कर्णे) एव्वं विअ । [एवमिव ।]

शर्विलकः—(सवैलक्ष्यम्) भोः कष्टम् । १२

छाया[1]र्थं ग्रीष्मसंतप्तो यामेवाहं समाश्रितः ।
अजानता मया सैव पत्रैः शाखा वियोजिता ॥ १८ ॥

वसन्तसेना—कधं एसो वि संतप्पदि ज्जेव । ता अजाणन्तेण एदिणा एव्वं अणुचिट्ठिदम् । [कथमेषोऽपि संतप्यत एव । तदजानतैतेनैवमनुष्ठितम् ।]

शर्विलकः—मदनिके किमिदानीं युक्तम् । ३

मदनिका—इत्थं तुमं ज्जेव पण्डिओ । [अत्र त्वमेव पण्डितः ।]

शर्विलकः—नैवम् । पश्य

Madanikā :—These ornaments indeed [are] Madam's own.

Śarvilaka :—What then ?

Madanikā :—Those again were deposited in the hands of that noble one.

Śarvilaka :—What for ?

Madanikā :—(*In his ear*) Like this.

Śarvilaka :—(*With embarrassment*) Oh, alas !

That same branch to which I had resorted for the sake of shade, being quite heated up by summer [heat]—that same has been divested of leaves by me unconsciously [lit. not knowing] ! (18)

Vasantasenā :—How, even this one is verily tormented. So, he [or, this one] must have done this, surely unknowingly.

Śarvilaka :—What [is] now proper [to be done] ?

Madanikā :—In this case, you yourself [are] clever [enough to devise something].

Śarvilaka :—Not so. See—

---

[1] छायार्थी।

स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः ।
पुरुषाणां तु पाण्डित्यं शास्त्रैरेवोपदिश्यते ॥ १९ ॥

मदनिका—सव्विलअ जइ मम वअणं सुणीअदि ता तस्स ज्जेव महाणुभावस्स पडिणिज्जादेहि । [शर्विलक यदि मम वचनं श्रूयते तदा तस्यैव महानु-
३ भावस्य प्रतिनिर्यातय ।]

शर्विलकः—मदनिके यद्यसौ राजकुले मां कथयति ।

मदनिका—ण चन्दादो आदवो होदि । [न चन्द्रादातपो भवति ।]

वसन्तसेना—साहु मदणिए साहु । [साधु मदनिके साधु ।]

शर्विलकः—मदनिके

न खलु मम विषादः साहसेऽस्मिन्भयं वा
कथयसि हि किमर्थं तस्य साधोर्गुणांस्त्वम् ।
जनयति मम वेदं कुत्सितं कर्म लज्जां
नृपतिरिह शठानां मादृशां किं नु कुर्यात् ॥ २० ॥

तथापि नीतिविरुद्धमेतत् । अन्य उपायश्चिन्त्यताम् ।

मदनिका—सो अअं अवरो उवाओ । [सोऽयमपर उपायः ।]

These women, to be sure, [are] indeed clever through [their] very nature; the cleverness of men, on the other hand, is imparted [to them] only by the [study of the] Śāstras. (19)

Madanikā :—Śarvilaka, if you hear [that is, act according to] my words, then, return [these] to that same illustrious one.

Śarvilaka :—Madanikā, [but] if he lodges a complaint against me at the court!

Madanikā :—Not from the moon comes heat!

Vasantasenā :—Good, Madanikā, good!

Śarvilaka :—[O] Madanikā!

Not indeed [is there] any dejection or fear on my part in [respect of] this rash deed; for what purpose are you enumerating to me the qualities of that saintly man? Does this infamous deed again create in me [any sense] of shame? What possibly can the king do to rascals like me here? (20)

Still, this [act would be] contrary to prudence. Think of [some] other remedy.

Madanikā :—Here [is] that another remedy.

वसन्तसेना—को क्खु अवरो उवाओ हुविस्सदि। [कः खल्वपर उपायो भविष्यति ।]

मदनिका—तस्स ज्जेव अज्जस्स केरओ भविअ एदं अलंकारअं अज्जआए उवणेहि । [तस्यैवार्यस्य संबन्धी भूत्वेममलंकारकमार्याया उपनय ।]

शर्विलकः—एवं कृते किं भवति ।

मदनिका—तुमं दाव अचोरो सो वि अज्जो अरिणो अज्जआए सकं अलंकारअं उवगदं भोदि। [त्वं तावदचौरः सोऽप्यार्योऽनृणः आर्यया स्वकोऽलंकार उपगतो भवति ।]

शर्विलकः—नन्वतिसाहसमेतत् ।

मदनिका—अइ उवणेहि । अण्णधा अदिसाहसम् । [अयि उपनय । अन्यथातिसाहसम् ।]

वसन्तसेना—साहु मदणिए साहु । अभुजिस्साए विअ मन्तिदम् । [साधु मदनिके साधु । अभुजिष्ययेव मन्त्रितम् ।]

शर्विलकः—मयाप्ता महती बुद्धिर्भवतीमनुगच्छता ।
निशायां नष्टचन्द्रायां दुर्लभो मार्गदर्शकः ॥ २१ ॥

Vasantasenā :—What indeed could the other remedy be ?

Madanikā :—Having become [that is, assumed the role of] one connected with that noble one himself, bring these ornaments to Madam.

Śarvilaka :—What would happen if this be done ?

Madanikā :—You, to start with [would be] no thief, that noble one too [would be] free from debt ; [and] her own ornaments [would be] secured by Madam.

Śarvilaka :—I say (*nanu*), this [is] a very risky business.

Madanikā :—Oh, [do] bring [them to her]; otherwise [only, it would be] a very risky business.

Vasantasenā :—Good ! Madanikā ! Good. You have spoken out [or, suggested] like one not a slave [that is, a high-born lady].

Śarvilaka :—

By me following you, has been obtained great wisdom ! At night with the moon set, [it is] difficult to secure one pointing out the way. (21)

मदनिका—तेण हि तुमं इमस्सिं कामदेवगेहे मुहुत्तअं चिट्ठ जाव अज्जआए तुह आगमणं णिवेदेमि। [तेन हि त्वमस्मिन्कामदेवगेहे मुहूर्तकं तिष्ठ यावदार्यायै तवागमनं निवेदयामि ।]

शर्विलकः—एवं भवतु ।

मदनिका—(उपसृत्य) अज्जए एसो क्खु चारुदत्तस्स सआसादो बम्हणो आअदो । [आर्ये एष खलु चारुदत्तस्य सकाशाद्ब्राह्मण आगतः ।]

वसन्तसेना—हञ्जे तस्स केरअं त्ति कधं तुमं जाणासि । [चेटि तस्य संबन्धीति कथं त्वं जानासि ।]

मदनिका—अज्जए अत्तणकेरअं वि ण जाणामि । [आर्ये आत्मसंबन्धिनमपि न जानामि ।]

वसन्तसेना—(स्वगतं सशिरःकम्पं विहस्य) जुज्जदि । (प्रकाशम्) पविसदु । [युज्यते । ...प्रविशतु ।]

मदनिका—जं अज्जआ आणवेदि । (उपगम्य) पविसदु सव्विलओ। [यदार्याज्ञापयति । ...प्रविशतु शर्विलकः।]

शर्विलकः—(उपसृत्य सवैलक्ष्यम्) स्वस्ति भवत्यै ।

वसन्तसेना—अज्ज वन्दामि । उवविसदु अज्जो । [आर्य वन्दे। उपविशत्वार्यः ।]

Madanikā :—In that case, do you stand [or, wait] in this Kāmadeva temple, for a while, while I shall announce your arrival to Madam,

Śarvilaka :—Let it be so.

Madanikā :—(*Approaching*) Madam, here [has] indeed come, a Brāhmaṇa from Cārudatta.

Vasantasenā :—Ceṭī, how do you know that he is connected with him [Cārudatta] ?

Madanikā :—Madam, do I not know even one connected with myself [or, us] ?

Vasantasenā :—(*To herself, laughing with a shaking of her head*) [That] is proper. (*Aloud*) Let [him] enter.

Madanikā :—As Madam commands. (*Approaching*) Let Śarvilaka enter.

Śarvilaka :—(*Approaching, with embarrassment and shame*) Welfare to your ladyship !

Vasantasenā :—I salute [you], Sir ! Let the noble one sit down.

शर्विलकः—सार्थवाहस्त्वां विज्ञापयति—जर्जरत्वाद्गृहस्य दूरक्ष्यमिदं भाण्डम् । तद्गृह्यताम् । (इति मदनिकायाः समर्प्य प्रस्थितः)

वसन्तसेना—अज्ज ममावि दाव पडिसंदेसं तहिं अज्जो णेदु । [आर्य ममापि तावत्प्रतिसंदेशं तत्रार्यो नयतु ।]

शर्विलकः—(स्वगतम्) कस्तत्र यास्यति । (प्रकाशम्) कः प्रतिसंदेशः ।

वसन्तसेना—पडिच्छदु अज्जो मदणिअम् । [प्रतीच्छत्वार्यो मदनिकाम् ।]

शर्विलकः—भवति न खल्ववगच्छामि ।

वसन्तसेना—अहं अवगच्छामि । [अहमवगच्छामि ।]

शर्विलकः—कथमिव ।

वसन्तसेना—अहं अज्जचारुदत्तेण भणिदा—जो इमं अलंकारअं समप्पइस्सदि तस्स तुए मदणिआ दादव्वा । ता सो ज्जेव एदं दे देदित्ति एव्वं अज्जेण अवगच्छिदव्वम् । [अहमार्यचारुदत्तेन भणिता—य इममलंकारकं समर्पयिष्यति तस्य त्वया मदनिका दातव्या । तत्स एवैतां ते ददातीत्येवमार्येणावगन्तव्यम् ।]

शर्विलकः—(स्वगतम्) अये विज्ञातोऽहमनया । (प्रकाशम्) साधु आर्यचारुदत्त साधु ।

Śarvilaka :—The big merchant respectfully submits [or, sends word] to you—'On account of the dilapidated state of the house, this treasure is difficult to be guarded. So, please, take [it].'

[*Handing them over to* Madanikā, *starts off*

Vasantasenā :—Sir, let the noble one, for the matter of that, carry there a return-message from me as well !

Śarvilaka :—(*To himself*) Who [the devil] would be going there ? (*Aloud*) What return-message ?

Vasantasenā :—Let the noble one accept [this] Madanikā.

Śarvilaka :—Madam, I surely do not understand [what you mean].

Vasantasenā :—I understand [what I am saying all right].

Śarvilaka :—How possibly ?

Vasantasenā :—I was told by the noble Cārudatta—' He who would hand over these ornaments, to him should be given Madanikā by you !' So, the noble one [you] should understand that it is he [Cārudatta] himself who is presenting this [Madanikā] to him [you].

Śarvilaka :—(*To himself*) Oh, I have been known [as a suitor for Madanikā's hand] by her ! (*Aloud*) Bravo ! Noble Cārudatta ! Bravo !

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥ २२ ॥

अपि च

गुणेषु यत्नः पुरुषेण कार्यो न किंचिदप्राप्यतमं गुणानाम् ।
गुणप्रकर्षादुडुपेन शंभोरलङ्घ्यमुल्लङ्घितमुत्तमाङ्गम् ॥ २३ ॥

वसन्तसेना—को एत्थ पवहणिओ । [कोऽत्र प्रवहणिकः ।]

(प्रविश्य सप्रवहणः) **चेटः**— अज्जए सज्जं पवहणम् । [आर्ये सज्जं प्रवहणम् ।]

वसन्तसेना—हञ्जे मअणिए सुदिट्ठं मं करेहि । दिण्णासि । आरुह पवहणम् । सुमरेसि मम् । [चेटि मदनिके सुदृष्टां मां कुरु । दत्तासि । आरोह प्रवहणम् । स्मरसि माम् ।]

मदनिका—(रुदती) परिच्चत्तम्हि अज्जआए । [परित्यक्तास्म्यार्यया ।]

(इति पादयोः पतति)

वसन्तसेना—संपदं तुमं ज्जेव वन्दणीआ संवुत्ता । ता गच्छ । आरुह पवहणम् । सुमरेसि मम् । [सांप्रतं त्वमेव वन्दनीया संवृत्ता । तद्गच्छ । आरोह प्रवहणम् । स्मरसि माम् ।]

An endeavour should always be made by men for [securing] virtues; one endowed with virtues, even though poor [is] not equal to [that is, is far superior to] the rich bereft of virtues ! [22]

And further,

An effort should be made by a man for [securing] virtues; [there is] nothing [that is] exceedingly unattainable by virtues. Owing to the excellence of virtues was occupied [lit. transgressed] by the moon [even] the head of Śiva, [which is] beyond the reach [of any one] ! [23]

Vasantasenā :—Who [is] here, the car-driver !

(*Entering with the car*) **Ceṭa** :—Madam, the car [is] ready!

Vasantasenā :—O [Ceṭī] Madanikā, look at me closely. You [are now] given away. Ascend the car. [I hope] you [would] remember me.

Madanikā :—(*Weeping*) I have been abandoned by Madam !

[*Falls at her feet*

Vasantasenā :—Now you yourself have become fit to be saluted. So, go. Ascend the car. [I hope] you [would] remember me.

---

१ गुणैर्युक्तो ।

शर्विलकः—स्वस्ति भवत्यै । मदनिके

सुदृष्टः क्रियतामेष शिरसा वन्द्यतां जनः ।
यत्र ते दुर्लभं प्राप्तं वधूशब्दावगुण्ठनम् ॥ २४ ॥

(इति मदनिकया सह प्रवहणमारुह्य गन्तुं प्रवृत्तः)

(नेपथ्ये) कः कोऽत्र भोः । राष्ट्रियः समाज्ञापयति—एष खल्वार्यको गोपालदारको राजा भविष्यतीति सिद्धादेशप्रत्ययपरित्रस्तेन पालकेन राज्ञा घोषादानीय घोरे बन्धनागारे बद्धः । ततः स्वेषु स्वेषु स्थानेष्वप्रमत्तैर्भवद्भिर्भवितव्यम् । ३

2nd evidence

शर्विलकः—(आकर्ण्य) कथं राज्ञा पालकेन प्रियसुहृदार्यको मे बद्धः । कलत्रवांश्चास्मि संवृत्तः । आः कष्टम् । अथवा ६

द्वयमिदमतीव लोके प्रियं नराणां सुहृच्च वनिता च ।
संप्रति तु सुन्दरीणां शतादपि सुहृद्विशिष्टतमः ॥ २५ ॥

भवतु । अवतरामि । (इत्यवतरति)

Śarvilaka:—Welfare to you! [O] Madanikā!

Let this person [Vasantasenā] be looked at closely [and] bowed down to with [your] head, from whom was secured by you the [right to wear a] veil associated with [or, of] the title 'Vadhū' [a law-fully wedded bride], difficult to secure! (24)

[*Having ascended the car, along with* Madanikā *starts off to go*

(*Behind the curtain*) Who, who [is] here? Oh! The Rāṣṭriya [Police Commissioner] orders:—By King Pālaka, quite uneasy at the knowledge of the prophecy of a seer—'The cow-herd boy would be a king'—has been indeed clapped down this Āryaka in a terrible prison-house, after being brought from the station of cow-herds. Therefore, [all of] you should be on guard at your respective posts.

Śarvilaka:—(*Hearing*) What! by King Pālaka has been bound down [my] dear friend Āryaka! And I have [now] become possessed of a wife! Ah! alas! Or rather,

This pair [is] exceedingly dear in the world to men,—a friend and a loving wife; but *now* [in the present circumstances], a friend [has become] by far the most prominent, compared to a hundred lovely women! (25)

Well, I shall alight. [*Alights*

मदनिका—(सास्रमञ्जलिं बद्ध्वा) एव्वं ण्णेदम्। ता परं णेदु मं अज्जउ-
७ समीवं गुरुअणाणम्। [एवं न्विदम्। तत्परं नयतु मामार्यपुत्रः समीपं गुरुजनानाम्।]

शर्विलकः—साधु प्रिये साधु। अस्मच्चित्तसदृशमभिहितम्। (चेटमुद्दिश्य) भद्र जानीषे रेभिलस्य सार्थवाहस्योदवासितम् ।

६ **चेटः**—अध इं । [अथ किम् ।]

शर्विलकः—तत्र प्रापय प्रियाम् ।

चेटः—जं अज्जो आणवेदि । [यदार्य आज्ञापयाति ।]

३ **मदनिका**—जधा अज्जउत्तो भणादि । अप्पमत्तेण दाव अज्जउत्तेण होदव्वम् । [यथार्यपुत्रो भणति । अप्रमत्तेन तावदार्यपुत्रेण भवितव्यम् । (इति निष्क्रान्ता)

शर्विलकः—अहमिदानीं

ज्ञातीन्विटान्स्वभुजविक्रमलब्धवर्णा-
न्राजापमानकुपितांश्च नरेन्द्रभृत्यान् ।
उत्तेजयामि सुहृदः परिमोक्षणाय
यौगन्धरायण इवोदयनस्य राज्ञः ॥ २६ ॥ ○

अपि च

Madanikā :—(*With tears, folding her hands*) It [should be] indeed thus. Then, let my Lord take me further to the elders.

Śarvilaka :—Good, beloved, good ! You have said in accordance with our [or, my own] idea. (*Addressing* Ceṭa) Good man, do you know the residence of the big merchant Rebhila ?

Ceṭa :—Oh, yes.

Śarvilaka :—Take [my] beloved there.

Ceṭa :—As the noble one commands.

Madanikā :—As my Lord says ; my Lord again should be careful [or, not negligent in his acts]. [*Exit*

Śarvilaka :—I [shall] now

incite, for the release of [my] friend, like Yaugandharāyaṇa, of King Udayana, kinsmen, [or, caste men], parasites, those who have secured fame through the prowess of their own arms, [and] king's servants enraged owing to the insult [done to them] by the king ! (26)

And further,

---

१ शब्दान् ।

प्रियसुहृदमकारणे गृहीतं रिपुभिरसाधुभिराहितात्मशङ्कैः ।
सरभसमभिपत्य मोचयामि स्थितमिव राहुमुखे शशाङ्कबिम्बम् ॥२७॥

(इति निष्क्रान्तः)

(प्रविश्य) चेटी—अज्जए दिट्ठिआ वड्ढसि । अज्जचारुदत्तस्स सआसादो बम्हणो आअदो। [आर्ये दिष्ट्या वर्धसे। आर्यचारुदत्तस्य सकाशाद्ब्राह्मण आगतः।]

वसन्तसेना—अहो रमणीअदा अज्ज दिवसस्स । ता हञ्जे सादरं बन्धुलेण समं पवेसेहि णम्। [अहो रमणीयताद्य दिवसस्य। तच्चेटि सादरं बन्धुलेन समं प्रवेशयैनम् ।]

चेटी—जं अज्जआ आणवेदि। [यदार्याज्ञापयति।] (इति निष्क्रान्ता)

(विदूषको बन्धुलेन सह प्रविशति)

विदूषकः—ही ही भोः तवच्चरणकिलेसविणिज्जिदेण रक्खसराआ रावणो पुप्फकेण विमाणेण गच्छदि । अहं उण बम्हणो अकिदतवच्चरणकिलेसो वि णरणारीजणेण गच्छामि । [आश्चर्यं भोः तपश्चरणक्लेशविनिर्जितेन राक्षसराजो रावणः पुष्पकेण विमानेन गच्छति । अहं पुनर्ब्राह्मणोऽकृततपश्चरणक्लेशोऽपि नरनारीजनेन गच्छामि ।]

चेटी—पेक्खदु अज्जो अम्हकेरकं गेहदुआरम् । [प्रेक्षतामार्योऽस्मदीयं गेहद्वारम् ।]

[My] dear friend, captured without reason, by enemies [that are] wicked and entertaining fear in themselves, shall I release, attacking suddenly [or, with great force], like the disc of the moon lying in Rāhu's mouth! (27)

[*Exit*

(*Entering*) **Ceṭī** :—Madam, congratulations to you! A Brāhmaṇa has come from Cārudatta.

Vasantasenā :—Oh, the charming nature of this to-day! So, Ceṭī, bring him in, with [due] respect with [that is, escorted by] the bastard [guide].

Ceṭī :—As Madam commands. [*Exit*

(*Enter* Vidūṣaka, *with a bastard-guide*)

Vidūṣaka :—Ha! Ha! Oh! Rāvaṇa, the king of Rākṣasas, used to move in the air-car Puṣpaka won by [undergoing] the troubles of practising penance; while, I, [a mere] Brāhmaṇa, though having undergone no troubles of practising penance, [have the good fortune to] move in the company of a crowd of men and women [or, a male and a female]!

Ceṭī :—Look, Sir, at the [entrance] gate of our house!

विदूषकः—(अवलोक्य सविस्मयम्) अहो सलिलसित्तमज्जिदकिदहरिदोवलेवणस्स विविहसुअन्धिकुसुमोवहारचित्तलिहिदभूमिभाअस्स गअणतलाअलोअणकोदूहलदूरुण्णामिदसीसस्स दोलाअमाणावलम्बिदैरावणहत्थब्भमाइदमल्लिआदामगुणालंकिदस्स समुच्छिददन्तिदन्ततोरणावभासिदस्स महारअणोवराओवसोहिणा पवणबलन्दोलणाललन्तचञ्चलग्गहत्थेण इदो एहि त्ति वाहरन्तेण विअ मं सोहग्गपडाआणिवहेणोवसोहिदस्स तोरणधरणत्थम्भवेदिआणिक्खित्तसमुल्लसन्तहरिदचूदपल्लवललामफटिहमङ्गलकलसाभिरामोहअपास्सस्स महासुरवक्खत्थलदुब्भेज्जवज्जणिरन्तरपडिबद्धकणअकवाडस्स दुग्गदजणमणोरहाआसकरस्स वसन्तसेणाभवणदुआरस्स सस्सिरीअदा। जं सच्चं मज्झत्थस्स वि जणस्स बलाद्दिट्ठिं आआरेदि। [अहो सलिलसिक्तमार्जितकृतहरितोपलेपनस्य विविधसुगन्धिकुसुमोपहारचित्रलिखितभूमिभागस्य गगनतलावलोकनकौतूहलदूरोन्नामितशीर्षस्य दोलायमानावलम्बितैरावणहस्तभ्रमायितमल्लिकादामगुणालंकृतस्य समुच्छ्रितदन्तिदन्ततोरणावभासितस्य महारत्नोपरागोपशोभिना पवनचलान्दोलनाललच्चञ्चलाग्रहस्तेन इत एहि इति व्याहरतेव मां सौभाग्यपताकानिवहेनोपशोभितस्य तोरणधरणस्तम्भवेदिकानिक्षिप्तसमुल्लसद्धरितचूतपल्लवललामस्फटिकमङ्गलकलशाभिरामोभयपार्श्वस्य महासुरवक्षःस्थलदुर्भेद्य-

---

Vidūṣaka :—(*Beholding in amazement*) Oh, the loveliness of the gate [–region] of Vasantasenā's mansion—[the gate-region which is] sprinkled over with water, swept and smeared with green paint; the ground-region of which is shown up in various ways with the offerings of various fragrant flowers; the top of which is raised up high, [as though] through curiosity to have a look at the sky-region; adorned with the string of a garland of Mallikā flowers, swinging to and fro and hanging down from it, causing [one] to mistake it for the trunk of [the elephant] Airāvaṇa; made brilliant with a lofty arch of ivory [lit. elephant's tusks]; adorned with a cluster of auspicious banners, as though uttering to me [the words] 'Come this way,' with a fore-part of the hand [that is, the ends] quick and moving gracefully owing to the tossing caused by the force of the wind, and shining with the splendour of costly jewels; both sides of which are attractive on account of the auspicious crystal jars [full of water] decorated with green mango-leaves flashing up, [and] placed on the pedestals of the pillars supporting the arch; whose panels of gold are closely studded with diamonds

वज्रनिरन्तरप्रतिबद्धकनककपाटस्य दुर्गतजनमनोरथायासकरस्य वसन्तसेनाभवनद्वारस्य सश्रीकता । यत्सत्यं मध्यस्थस्यापि जनस्य बलाद्दृष्टिमाकारयति ।]

चेटी—एदु एदु । इमं पढमं पओट्ठं पविसदु अज्जो । [एत्वेतु । इमं प्रथमं प्रकोष्ठं प्रविशत्वार्यः ।]

विदूषकः—(प्रविश्यावलोक्य च) ही ही भोः इधो वि पढमे पओट्ठे ससिसङ्खमुणालसच्छाहाओ विणिहिदचुण्णमुट्ठिपाण्डुराओ विविहरअणपडिबद्धकञ्चणसोवाणसोहिदाओ पासादपन्तिओ ओलम्बिदमुत्तादामेहिं फटिहवादाअणमुहचन्देहिं णिज्झाअन्ती विअ उज्जइणिम् । सोत्तिओ विअ सुहोवविट्ठो णिद्दाअदि दोवारिओ । सदहिणा कलमोदणेण पलोहिदा ण भक्खन्ति वायसा वलिं सुधासवण्णदाए । आदिसदु भोदी । [आश्चर्यं भोः इहापि प्रथमे प्रकोष्ठे शशिशङ्खमृणालसच्छाया विनिहितचूर्णमुष्टिपाण्डुरा विविधरत्नप्रतिबद्धकाञ्चनसोपानशोभिताः प्रासादपङ्क्तयोऽवलाम्बितमुक्तादामभिः स्फटिकवातायनमुखचन्द्रैर्निध्यायन्तीवोज्जयिनीम् । श्रोत्रिय इव सुखोपविष्टो निद्राति दौवारिकः । सदध्ना कलमोदनेन प्रलोभिता न भक्षयन्ति वायसा बलिं सुधासवर्णतया । आदिशतु भवती ।]

चेटी—एदु एदु अज्जो । इमं दुदिअं पओट्ठं पविसदु अज्जो । [एत्वेत्वार्यः । इमं द्वितीयं प्रकोष्ठं प्रविशत्वार्यः ।]

and unbreakable like the broad chest of a big demon ; [and] which causes distress to the desires of persons in bad circumstances. To tell the truth, [it] forcibly attracts the eye of even an indifferent person.

Ceṭī :—Come, come. May the noble one enter this first quadrangle.

Vidūṣaka :—(*Entering and beholding*) Ha ! Ha ! Oh ! Here too, in the first quadrangle, the rows of mansions, of lustre similar to that of the moon, conch and lotus-stalk, white with the handfuls of powder laid on, adorned with stair-cases of gold inlaid with various jewels, are as though gazing intently at Ujjayinī by the moon-like faces in the form of the crystal windows, with pearl-garlands hanging down [from them]. [Here] is sleeping the door-keeper, like a Brāhmaṇa well-versed in the Vedas, sitting comfortably ! The crows though tempted by the Kalama-rice mixed with curds do not eat the oblations owing to [their being possessed of] the same colour as the white-wash.

Direct me on, lady.

Ceṭī :—Come, come on, Sir ! May the noble one enter this second quadrangle.

विदूषकः—(प्रविश्यावलोक्य च) ही ही भोः इधो वि दुदिए पओट्ठे पज्जन्तोवणीदजवसबुसकवलसुपुट्ठा तेल्लब्भङ्गिदाविसाणा बद्धा पवहणबइल्ला। अअं अण्णदरो अवमाणिदो विअ कुलीणो दीहं णीससदि सेरिहो। इदो अ अवणीदजुज्झस्स मल्लस्स विअ मद्दीअदि गीवा मेसस्स। इदो इदो अवराणं अस्साणं केसकप्पणा करीअदि। अअं अवरो पाडच्चरो विअ दिढबद्धो मन्दुराए साहामिओ। (अन्यतोऽवलोक्य) इदो अ कूरच्चुअतेल्लमिस्सं पिण्डं हत्थी पडिच्छावीअदि मेत्थपुरिसेहिं। आदिसदु भोदी। [आश्चर्यं भोः इहापि द्वितीये प्रकोष्ठे पर्यन्तोपनीतयवसबुसकवलसुपुष्टास्तैलाभ्यक्तविषाणा बद्धाः प्रवहणबलीवर्दाः। अयमन्यतरोऽवमानित इव कुलीनो दीर्घं निःश्वसिति सैरिभः। इतश्चापनीतयुद्धस्य मल्लस्येव मर्द्यते ग्रीवा मेषस्य। इत इतोऽपरेषामश्वानां केशकल्पना क्रियते। अयमपरः पाटच्चर इव दृढबद्धो मन्दुरायां शाखामृगः।...इतश्च कूरच्युततैलमिश्रं पिण्डं हस्ती प्रतिग्राह्यते मात्रपुरुषैः। आदिशतु भवती।]

चेटी—एदु एदु अज्जो। इमं तइअं पओट्ठं पविसदु अज्जो। [एत्वेत्वार्यः। इमं तृतीयं प्रकोष्ठं प्रविशत्वार्यः।]

विदूषकः—(प्रविश्य दृष्ट्वा च) ही ही भोः इधो वि तइए पओट्ठे इमाइं दाव कुलउत्तजणोववेसणणिमित्तं विरचिदाइं आसणाइं। अद्धवाचिदो पासअपीढे

Vidūṣaka :—(*Entering and beholding*) Ha ! Ha ! Oh ! Here too, in the second quadrangle, are tied up the carriage-bulls well nourished with [or, fattened on] mouthfuls of grass and husk brought right near [to them], with [their] horns anointed with oil. Here is a buffalo heaving up deep sighs, like a nobly-born man [when] insulted. And on this side is being rubbed the neck of a ram, with the fight over, like [that of] a wrestler. Here and there is being gone through, the dressing of the hair of various horses. Here is another [or, again a] monkey firmly tied up in the stable, like a thief. (*Looking in another direction*) And here is an elephant made [that is, coaxed] to take by the mahouts, balls [of rice] mixed with oil extracted from Kūra.

Direct me on, lady.

Ceṭī :—Come, come on, Sir ! May the noble one enter this third quadrangle.

Vidūṣaka :—(*Entering and seeing*) Ha ! Ha ! Oh ! Here too, in the third quadrangle, [are] first these seats arranged for the purpose of seating nobly-born men. There is a book [lying

चिट्ठइ पोत्थओ। एसो अ साहीणमणिमअसारिआसहिदो पासअपीठो। इमे अ अवरे मअणसंधिविरगहचदुरा विविहवण्णिआविलित्तचित्तफलहअग्गहत्था इदो तदो परिब्भमन्ति गणिआ वुड्ढविडा अ। आदिसदु भोदी। [आश्चर्यं भोः इहापि तृतीये प्रकोष्ठे इमानि तावत्कुलपुत्रजनोपवेशननिमित्तं विरचितान्यासनानि। अर्धवाचितं पाशकपीठे तिष्ठति पुस्तकम्। एतच्च स्वाधीनमणिमयसारिकासहितं पाशकपीठम्। इमे चापरे मदनसंधिविग्रहचतुरा विविधवर्णिकाविलिप्तचित्रफलकाग्रहस्ता इतस्ततः परिभ्रमन्ति गणिका वृद्धविटाश्च। आदिशतु भवती।]

चेटी—एदु एदु अज्जो। इमं चउट्ठं पओट्ठं पविसदु अज्जो। [एत्वेत्वार्यः। इमं चतुर्थं प्रकोष्ठं प्रविशत्वार्यः।]

विदूषकः—(प्रविश्यावलोक्य च) ही ही भोः इधो वि चउट्ठे पओट्ठे जुवदिकरताडिदा जलधरा विअ गम्भीरं णदन्ति मुदङ्गा। हीणपुण्णाओ विअ गअणादो तारआओ णिवडन्ति कंसतालआ। महुअरविरुअं विअ महुरं वज्जदि वंसो। इअं अवरा ईसाप्पणअकुविदकामिणी विअ अङ्कारोविदा कररुहपरामरिसेण सारिज्जदि वीणा। इमाओ अवराओ कुसुमरसमत्ताओ विअ महुअरिओ अदिमहुरं पगीदाओ गणिआदारिआओ णच्चीअन्ति णट्टअं पठीअन्ति ससिङ्गारअं। ओवग्गिदा गवक्खेसु वादं गेण्हन्ति सलिलगग्गरीओ। आदिसदु भोदी।

open] half-read on the gaming-table. Here again [is] this gaming-table furnished with peculiar [*svādhīna* or, easy to move] jewelled chess-men [or, 'Songaṭis']. And here are further, wandering about here and there courtezans and old parasites, experts in [bringing about] love-unions and love-quarrels, with painting boards besmeared with various colours in [their] fore-parts of the hands.

Direct [me] on, lady.

Ceṭī :—Come, come on, Sir ! May the noble one enter this fourth quadrangle.

Vidūṣaka :—(*Entering and beholding*) Ha ! Ha ! Oh ! Here too, in the fourth quadrangle, are sounding deeply, like clouds, the drums struck by the hands of young women ; the strikings of musical instruments made of bell-metal are falling [quickly] like the stars from the sky, with [their] merit [entitling them to stay there] exhausted ; the bamboo-flute is being played upon sweetly, like the humming of bees. Here is further being played upon by the touch of the nails, a lute placed on the lap, like a

---

१ साहीण dropped.

[आश्चर्यं भोः इहापि चतुर्थे प्रकोष्ठे युवतिकरताडिता जलधरा इव गम्भीरं नदन्ति मृदङ्गाः। क्षीणपुण्या इव गगनात्तारका निपतन्ति कांस्यतालाः। मधुकरविरुतमिव मधुरं वाद्यते वंशः। इयमपरेर्ष्याप्रणयकुपितकामिनीवाङ्कारोपिता कररुहपरामर्शेन सार्यते वीणा। इमा अपराः कुसुमरसमत्ता इव मधुकर्योऽतिमधुरं प्रगीता गणिकादारिका नर्त्यन्ते नाट्यं पाठ्यन्ते सशृङ्गारम्। अपवलिगता गवाक्षेपु वातं गृह्णन्ति सलिलगर्गर्यः। आदिशतु भवती।]

चेटी—एदु एदु अज्जो। इमं पञ्चमं पओट्ठं पविसदु अज्जो। [एत्वेत्वार्यः। इमं पञ्चमं प्रकोष्ठं प्रविशत्वार्यः।]

विदूषकः—(प्रविश्य दृष्ट्वा च) ही ही भोः इधो वि पञ्चमे पओट्ठे अअं दलिद्दजणलोहुप्पादणअरो आहरइ उवचिदो हिङ्गुतेल्लगन्धो। विविहसुरहिधूमुग्गरेहिं णिच्चं संताविज्जमाणं णीससदि विअ महाणसं दुवारमुहेहिं। अधिअं उसुसावेदि मं साहिज्जमाणबहुविहभक्खभोअणगन्धो। अअं अवरो पडच्चरं विअ पोट्टिं धोआदि रूपिदारओ। बहुविहाहारविआरं उवसाहेदि सूवआरो। वज्झन्ति मोदआ पच्चन्ति अपूवआ। (आत्मगतम्) अवि दाणिं इह वड्ढिअं भुञ्जसु त्ति पादोदअं लहिस्सम्। (अन्यतोऽवलोक्य) इदो गन्धव्वच्छरगणेहिं विअ विविहालंकारसोहिदेहिं गणिआजणेहिं बन्धुलेहिं अ जं सच्चं सग्गीअदि एदं गेहम्। भो के तुम्हे बन्धुला णाम। [आश्चर्यं भोः इहापि पञ्चमे प्रकोष्ठेऽयं

loving lady angry owing to jealous love. Here [are] further courtezan-girls who have sung very sweetly like female bees intoxicated with [drinking] the juice of flowers, [and] who are being made to dance [and] taught acting full of the Śṛṅgāra [love] sentiment. [Here] are jars full of water, hanging at the windows upside down, receiving the breeze.

Direct [me] on, lady.

Ceṭī :—Come, come on, Sir! May the noble one enter this fifth quadrangle.

Vidūṣaka :—(*Entering and seeing*) Ha! Ha! Oh! Here too, in the fifth quadrangle, this odour of Hiṅgu and oil, causing the production of temptation in poor people, is pervading, gathering in volume. The kitchen, being constantly heated up [also, tormented] is, as though sighing by mouths in the form of doors from which is streaming out fragrant smoke of various kinds. The odour of the eatables for dinner, of various kinds, that are being prepared is exciting me very much. Here is further a butcher-boy washing off the entrails of a beast

दारिद्रजनलोभोत्पादनकर आहरत्युपाचितो हिङ्गुतैलगन्धः। विविधसुरभिधूमोद्गारैर्नित्यं संताप्यमानं निःश्वसितीव महानसं द्वारमुखैः। अधिकमुत्सुकायते मां साध्यमानबहु- १६
विधभक्ष्यभोजनगन्धः। अयमपरः पटच्चरमिव हतपशूदरपेशिं धावति रूपिदारकः। बहुविधाहारविकारमुपसाधयति सूपकारः। बध्यन्ते मोदकाः पच्यन्तेऽपूपकाः। ...अपीदानीमिह वर्धितं भुङ्क्ष्व इति पादोदकं लप्स्ये।...इह गन्धर्वाप्सरोगणैरिव विविधालंकार- १९
शोभितैर्गणिकाजनैर्बन्धुलैश्च यत्सत्यं स्वर्गायत एतत् गेहम्। भोः के यूयं बन्धुला नाम।]

बन्धुलाः—वयं खलु

परगृहललिताः परान्नपुष्टाः परपुरुषैर्जनिताः पराङ्गनासु।
परधननिरता गुणेष्ववाच्या गजकलभा इव बन्धुला ललामः ॥ २८॥

विदूषकः—आदिसदु भोदी। [आदिशतु भवती।]

चेटी—एदु एदु अज्जो। इमं छट्ठं पओट्ठं पविसदु अज्जो। [एत्वेत्वार्यः। इमं षष्ठं प्रकोष्ठं प्रविशत्वार्यः।] 3

विदूषकः—(प्रविश्यावलोक्य च) ही ही भोः इधो वि छट्ठे पओट्ठे अमुं दाव सुवण्णरअणाणं कम्मतोरणाइं णीलरअणविणिक्खित्ताइं इन्दाउहट्ठाणं विअ

---

slaughtered, like a tattered piece of cloth. The cook is preparing various kinds of eatables—Modakas are being formed up, Apūpas are being fried. Could I [or, how I hope I should] now be getting water for [washing] the feet, [followed by the request] with [the words] 'Eat [or, enjoy] the rich [or, seasoned] food.' To speak the truth, this house is as though transformed into [lit. acts like] heaven here with crowds of courtezans adorned with various ornaments and bastards, like the assemblage of Gandharvas and Apsarases. Oh, who [are] you Bandhulas, for the matter of that?

Bastards :—We indeed,

sporting at other [people's] houses, nourished on food of others, begotten by other men on others' wives, attached to the wealth of others and not to be spoken about in [the matter of] qualities—Bandhulas—play about like the young ones of an elephant. (28)

Vidūṣaka :—Direct [me] on, lady.

Ceṭī :—Come, come on, Sir! May the noble one enter this sixth quadrangle.

Vidūṣaka :—(*Entering and beholding*) Ha! Ha! Oh! Here too, in the sixth quadrangle, these artificial arches of jewels and

दरिसअन्ति। वेदुरिअमोत्तिअपवालअपुप्फराअइन्दणीलकक्केतरअपंमराअमरगअपहुदिआइं रअणविसेसाइं अण्णोण्णं विचारेन्ति सिप्पिणो। बज्झन्ति जादरूवेहिं माणिक्काइं। घडिज्जन्ति सुवण्णालंकारा। रत्तसुत्तेण गत्थीअन्ति मोत्तिआभरणाइं। घसीअन्ति धीरं वेदुरिआइं। छेदीअन्ति सङ्खआ। साणिज्जन्ति पवालआ। सुक्खविअन्ति ओल्लविदकुङ्कुमपत्थरा। सालीअदि सल्लज्जअम्। विस्साणीअदि चन्दणरसो। संजोईअन्ति गन्धजुत्तीओ। दीअदि गणिआकामुकाणं सकप्पूरं तम्चोलम्। अवलोईअदि सकडक्खअम्। पअट्टदि हासो। पिवीअदि अ अणवरअं ससिक्कारं मइरा। इमे चेडा इमा चेडिआओ इमे अवरे अवधीरिदपुत्तदारवित्ता मणुस्सा आसवकरआपीदमदिरेहिं गणिआजणेहिं जे मुक्का ते पिअन्ति। आदिसदु भोदी। [आश्चर्यं भोः इहापि षष्ठे प्रकोष्ठेऽमूनि तावत्सुवर्णरत्नानां कर्मतोरणानि नीलरत्नविनिक्षिप्तानीन्द्रायुधस्थानमिव दर्शयन्ति। वैदूर्यमौक्तिकप्रवालकपुष्परागेन्द्रनीलकर्केतरकपद्मरागमरकतप्रभृतीन्रत्नविशेषानन्योन्यं विचारयन्ति शिल्पिनः। बध्यन्ते जातरूपैर्माणिक्यानि। वट्यन्ते सुवर्णालंकाराः। रक्तसूत्रेण ग्रथ्यन्ते मौक्तिकाभरणानि। घृष्यन्ते धीरं वैदूर्याणि। छिद्यन्ते शङ्खाः। शाणैर्घृष्यन्ते प्रवालकाः। शोष्यन्त आर्द्रकुङ्कुमप्रस्तराः। सार्यते कस्तूरिका। विशेषेण घृष्यते चन्दनरसः। संयोज्यन्ते गन्धयुक्तयः। दीयते गणिकाकामुकानां सकर्पूरं ताम्बूलम्। अवलोक्यते सकटाक्षम्। प्रवर्तते हासः। पीयते चानवरतं ससीत्कारं मदिरा। इमे चेटाः इमाश्चेटिकाः इमे अपरेऽ

---

gold, inlaid with blue sapphires display as though a place [full] of rain-bows. Goldsmiths are mutually consulting about particular [or, excellent] jewels, such as lapis lazuli, pearls, corals, Puṣparāga, blue sapphires, Karketaraka, rubies, emeralds, etc. Rubies are being set in gold; gold ornaments are being fashioned out; pearl-ornaments are being strung with red-threads; the Vaidūryas are being patiently polished; conches are being split up; the corals are being polished on whetting stones. Masses of wet saffron are being dried up; Kastūrikā [musk] is being sifted; the sandal-juice is being particularly drawn; combinations of scents are being put together; Tāmbūla [Betel-nut-roll] with camphor is being offered to the gallants and courtezans. Side-glances are in vogue; laughter is proceeding; wine is being constantly drunk, with the Sit [noise, showing satisfaction]. [Here] are drinking [wine] these Caṭas, these Ceṭikās, these other men

वधीरितपुत्रदारवित्ता मनुष्या आसवकरकापीतमदिरैर्गणिकाजनैर्ये मुक्तास्ते पिबन्ति । आदिशतु भवती ।]

चेटी—एदु एदु अज्जो । इमं सत्तमं पओट्ठं पविसदु अज्जो । [एत्वेत्वार्यः । इमं सप्तमं प्रकोष्ठं प्रविशत्वार्यः ।]

विदूषकः—(प्रविश्यावलोक्य च) ही ही भोः इधं वि सत्तमे पओट्ठे सुसिलिट्ठविहङ्गवाडीसुहणिसण्णाइं अण्णोण्णचुम्बणपराइं सुहं अणुभवन्ति पारावदमिहुणाइं । दहिभत्तपूरिदोदरो बम्हणो विअ सुत्तं पढदि पञ्जरसुओ । इअं अवरा संमाणणालद्धपसरा विअ घरदासी अधिअं कुरुकुराअदि मदणसारिआ । अणेअफलरसास्सादपहुट्ठकण्ठा कुम्भदासी विअ कूअदि परपुट्ठा । आलम्बिदा णागदन्तेसु पञ्जरपरम्पराओ । जोधीअन्ति लावआ । आलवीअन्ति कविञ्जला । पेसीअन्ति पञ्जरकवोदा । इदो तदो विविहमणिचित्तलिदो विअ अअं सहरिसं णच्चन्तो रविकिरणसंतत्तं पक्खुक्खेवेहिं विधुवेदि विअ पासादं घरमोरो । (अन्यतोऽवलोक्य) इदो पिण्डीकिदा विअ चन्दपादा पदगदिं सिक्खन्ता विअ कामिणीणं पच्छादो परिब्भमन्ति राअहंसमिहुणा । एदे अवरे बुड्ढमहल्लका विअ इदो तदो संचरन्ति घरसारसा । ही ही भोः पसारणअं किदं गणिआए णाणापक्खिसमूहेहिं । जं सच्चं क्खु णन्दणवणं विअ मे गणिआघरं पडिभासदि । आदिसदु भोदी । [आश्चर्यं भोः इहापि सप्तमे प्रकोष्ठे सुश्लिष्टविहङ्गवाटीसुखनिषण्णान्यन्योन्यचुम्बनपराणि सुखमनुभवन्ति पारावतमिथुनानि । दधिभक्तपूरितोदरो ब्राह्मण इव सूक्तं

---

who have paid no attention to [their] sons, wives and riches, and who are left alone by courtezans after having drunk wine from wine-cups.

Direct [me] on, lady.

Ceṭī :—Come, come on, Sir ! May the noble one enter this seventh quadrangle.

Vidūṣaka :—(*Entering and beholding*) Ha ! Ha ! Oh ! Here too, in the seventh quadrangle, are enjoying happiness, pairs of pigeons, resting comfortably in the well-situated dove-cots, [and] intent on kissing each other. The parrot in the cage with [his] belly filled with rice mixed with curds, is repeating nice words like a Brāhmaṇa, a Vedic hymn. Here [is] further a Madanasārikā chirping a lot like a house-maid who has gained importance owing to regard [shown to her]. The cuckoo with her throat greatly at ease [or, delighted] owing to [her] having tasted the juice of many fruits, is cooing like a procuress. Rows

पठति पञ्जरशुकः। इयमपरा संमाननालब्धप्रसरेव गृहदासी अधिकं कुरकुरायते मदनसारिका। अनेकफलरसास्वादप्रहृष्टकण्ठा कुम्भदासीव कूजति परपुष्टा। आलम्बिता नागदन्तेषु पञ्जरपरम्पराः। योध्यन्ते लावकाः। आलाप्यन्ते कपिञ्जलाः। प्रेष्यन्ते पञ्जरकपोताः। इतस्ततो विविधमणिचित्रित इवायं सहर्षं नृत्यन्रविकिरणसंतप्तं पक्षोत्क्षेपैर्विधुवतीव प्रासादं गृहमयूरः।...इतः पिण्डीकृता इव चन्द्रपादाः पदगतिं शिक्षमाणानीव कामिनीनां पश्चात्परिभ्रमन्ति राजहंसमिथुनानि। एतेऽपरे वृद्धमहल्लका इव इतस्ततः संचरन्ति गृहसारसाः। आश्चर्यं भोः प्रसारणं कृतं गणिकया नानापक्षिसमूहैः। यत्सत्यं खलु नन्दनवनमिव मे गणिकागृहं प्रतिभासते। आदिशतु भवती।]

चेटी—एदु एदु अज्जो। इमं अट्ठमं पओट्ठं पविसदु अज्जो। [एत्वेत्वार्यः। इममष्टमं प्रकोष्ठं प्रविशत्वार्यः।]

विदूषकः—(प्रविश्यावलोक्य च) भोदि को एसो पट्टपावारअपाउदो अधिअदरं अच्चब्भुदपुणरुत्तालंकारालंकिदो अङ्गभङ्गेहिं परिक्खलन्तो इदो तदो परिब्भमदि। [भवति क एष पट्टप्रावारकप्रावृतोऽधिकतरमत्यद्भुतपुनरुक्तालंकारालंकृतोऽङ्गभङ्गैः परिस्खलन्नितस्ततः परिभ्रमति।]

---

of cages are hanging down from the pegs. The Lāvakas [quails] are being made to fight, Kapiñjalas are being made to talk, the cage-pigeons are being despatched [on errands]. [Here] a domestic peacock, as though variegated with various jewels, [and] dancing with joy, is as though fanning with the flappings of [his] plumage, the mansion greatly heated with the rays of the sun. (*Looking in another direction*) Here are pairs of royal swans, as though the moon's rays rolled up together, wandering about behind the charming ladies, as though learning the gait! Here are further moving about here and there, domestic Sārasas like old eunuchs. Ha! Ha! Oh! An exhibition is [as though] arranged by the courtezan, with the collection of various birds! To tell the truth, the courtezan's mansion appears indeed to me like the Nandana garden!

Direct [me] on, lady.

Ceṭī :—Come, come on, Sir! May the noble one enter this eighth quadrangle.

Vidūṣaka :—(*Entering and beholding*) Lady, who is this one wandering about here and there stumbling, giving various twists to [his] body, wrapped up in a silken cloak, [and] decked with densely packed plethora of exceedingly wonderful ornaments?

चेटी—अज्ज एसो अज्जआए भादा भोदि। [आर्य एष आर्याया भ्राता भवति ।]

विदूषकः—केत्तिअं तवच्चरणं कदुअ वसन्तसेणाए भादा भोदि। अथवा ५७

मा दाव जइ वि एसो उज्जलो सिणिद्धो अ सुअन्धो अ।
तह वि मसाणवीधीए जादो विअ चम्पअरुक्खो अणहिगमणीओ
लोअस्स ॥ २९ ॥

(अन्यतोऽवलोक्य) भोदि एसा उण का फुल्लपावारअपाउदा उवाणहजुअलणिक्खित्ततेल्लचिक्कणेहिं पादेहिं उच्चासणे उवविट्ठा चिट्ठदि। [कियत्तपश्चरणं कृत्वा वसन्तसेनाया भ्राता भवति । अथवा 3

मा तावद्यद्यप्येष उज्ज्वलः स्निग्धश्च सुगन्धश्च ।

तथापि श्मशानवीथ्यां जात इव चम्पकवृक्षोऽनभिगमनीयो लोकस्य ॥ // Rl

also. verse 18. [illegible] contain the same idea

...भवति एषा पुनः का पुष्पप्रावारकप्रावृतोपानद्युगलनिक्षिप्ततैलाचिक्कणाभ्यां पादाभ्यामुच्चासन उपविष्टा तिष्ठति ।] ६

चेटी—अज्जा एसा क्खु अम्हाणं अज्जआए अत्तिआ। [आर्य एषा खल्वस्माकमार्याया माता ।]

९ humour

विदूषकः—अहो से कवट्टुडाइणीए पोट्टवित्थारो । ता किं एदं पवेसिअ महादेवं विअ दुआरसोहा इह घरे णिम्मिदा। [अहो अस्याः कपर्दकडाकिन्या उदरविस्तारः। तात्किमेतां प्रवेश्य महादेवमिव द्वारशोभा इह गृहे निर्मिता।] // Rl १२

Ceṭī :—Sir, this one is the brother to Madam.

Vidūṣaka :—After practising how much penance, has [this one] become a brother to Vasantasenā? Or rather,

Not so. Even though he [is] gorgeous, and loving [also, charming] and scented all over, still, like a Campaka tree growing on the cemetery-path, [he is] not fit to be mixed with by the people. (29)

(*Looking in another direction*) Lady, who again is this [lady] sitting on a raised seat, wrapped in a flower-cloak, with her feet greasy with oil, encased in a pair of shoes?

Ceṭī :—Sir, this [one is] indeed our Madam's mother!

Humour

Vidūṣaka :—Oh, the expanse of the belly of this two-penny female goblin! Well, is it that the attractive door [lit. beauty of the door] for the house here, was constructed after having [first] put her inside, like [the idol of] Mahādeva!

चेटी—हदास मा एव्वं उवहस अम्हाणं अत्तिअम् । एसा क्खु चाउत्थिएण पीडीअदि। [हताश मैवमुपहसास्माकं मातरम्। एषा खलु चातुर्थिकेन पीड्यते ।]

विदूषकः—(सपरिहासम्)भअवं चाउत्थिअ एदिणा उवआरेण मं पि बम्हणं आलोएहि । [भगवंश्चातुर्थिक एतेनोपकारेण मामपि ब्राह्मणमवलोकय।]

चेटी—हदास मरिस्ससि । [हताश मरिष्यसि ।]

विदूषकः—(सपरिहासम्) दासीए धीए वरं ईदिसो शूणपीणजठरो मुदो ज्जेव ।

सीधुसुरासवमत्तिआ एआवत्थं गदा हि अत्तिआ ।
जइ मरइ एत्थ अत्तिआ भोदि सिआलसहस्सपज्जात्तिआ ॥ ३० ॥

भोदि किं तुम्हाणं जाणवत्ता वहन्ति ।

[दास्याःपुत्रि वरमीदृशः शूनपीनजठरो मृत एव ।
सीधुसुरासवमत्ता एतावदवस्थां गता हि माता ।
यदि म्रियतेऽत्र माता भवति शृगालसहस्रपर्याप्ता ॥
भवति किं युष्माकं यानपात्राणि वहन्ति ।]

चेटी—अज्ज णहि णहि । [आर्य नहि नहि ।]

विदूषकः—किं वा एत्थ पुच्छीअदि । तुम्हाणं क्खु पेम्मणिम्मलजले मअणसमुद्दे त्थणाणिअम्बजहणा ज्जेव जाणवत्ता मणहरणा । एव्वं वसन्तसेणाए

Ceṭī :—Wretch, jeer not in this way at our Mother. She is indeed harassed by the quartan [fever] !

Vidūṣaka :—(*Jokingly*) Divine quartan [fever] ! Look upon me too, a Brāhmaṇa, with *this* favour !

Ceṭī :—Wretch, you would [surely] die [in that case].

Vidūṣaka :—(*Jokingly*) Daughter of a whore ! Better that such a one with a bloated fattened belly is indeed dead !

For, Mother has come to such a state, dumped [lit. intoxicated] with wines, liquors and spirits. If now Mother dies, she would be [more than] sufficient for a thousand jackals! (30)

Lady, are there sailing boats of yours plying [for trade] ?

Ceṭī :—Sir, no, no.

Vidūṣaka :—Or, why should [a question] be asked [at all] in this matter ? In your case, indeed, [there are] breasts, hips and buttocks themselves the attractive sailing vessels in the sea of Madana, with clear waters in the form of love ! Having thus

बहुवुत्तन्तं अट्ठपओट्ठं भवणं पेक्खिअ जं सच्चं जाणामि एकत्थं विअ तिविट्ठअं दिट्ठम् । पसंसिदुं णत्थि मे वाआविहवो । किं दाव गणिआघरो अहवा कुबेरभवणपरिच्छेदो त्ति । कहिं तुम्हाणं अज्जआ । [किं वात्र पृच्छ्यते । युष्माकं खलु प्रेमनिर्मलजले मदनसमुद्रे स्तननितम्बजघनान्येव यानपात्राणि मनोहराणि । एवं वसन्तसेनाया बहुवृत्तान्तमष्टप्रकोष्ठं भवनं प्रेक्ष्य यत्सत्यं जानामि एकस्थमिव त्रिविष्टपं दृष्टम् । प्रशंसितुं नास्ति मे वाग्विभवः । किं तावद्गणिकागृहम् अथवा कुबेरभवनपरिच्छेद इति । कुत्र युष्माकमार्या ।]

चेटी—अज्ज एसा रुक्खवाडिआए चिट्ठदि । ता पविसदु अज्जो । [आर्य एषा वृक्षवाटिकायां तिष्ठति । तत्प्रविशत्वार्यः ।]

विदूषकः—(प्रविश्य दृष्ट्वा च) ही ही भोः अहो रुक्खवाडिआए सस्सिरीअदा । अच्छरीदिकुसुमपत्थारा रोविदा अणेअपादवा । णिरन्तरपादवतलणिम्मिदा जुवदिजहणप्पमाणा पट्टदोला । सुवण्णजूधिआसेहालिआमालईमल्लिआणोमालिआकुरबआअदिमोत्तअप्पहुदिकुसुमेहिं सअं णिवडिदेहिं जं सच्चं लहुकरेदि विअ णन्दणवणस्स सस्सिरीअदम् । (अन्यतोऽवलोक्य) इदो अ उदअन्तसूरसमप्पहेहिं कमलरत्तोप्पलेहिं संझाअदि विअ दीहिआ । अवि अ

विदूषकः—(स्वगतम्) ही ही भो जूदिअरो त्ति भणन्तीए अलंकिदो पिअवअस्सो। (प्रकाशम्) भोदि एसो क्खु सुक्खरुक्खवाडिआए । [आश्चर्यं भोः द्यूतकर इति भणन्त्यालंकृतः प्रियवयस्यः। ...भवति एष खलु शुष्कवृक्षवाटिकायाम्।]

वसन्तसेना—अज्ज का तुम्हाणं सुक्खरुक्खवाडिआ वुच्चदि । [आर्य का युष्माकं शुष्कवृक्षवाटिकोच्यते ।]

विदूषकः—भोदि जहिं ण खाईअदि ण पीईअदि । [भवति यत्र न खाद्यते न पीयते ।]

(वसन्तसेना स्मितं करोति)

विदूषकः—ता पविसदु भोदी । [तस्मात्प्रविशतु भवती ।]

वसन्तसेना—(जनान्तिकम्) एत्थ पविसिअ किं मए भणिदव्वम् । [अत्र प्रविश्य किं मया भणितव्यम् ।]

चेटी—जूदिअर अवि सुहो दे पदोसो त्ति । [द्यूतकर अपि सुखस्ते प्रदोष इति ।]

वसन्तसेना—अवि पारइस्सम् । [अपि पारयिष्यामि ।]

चेटी—अवसरो ज्जेव पारइस्सदि । [अवसर एव पारयिष्यति ।]

विदूषकः—पविसदु भोदी । [प्रविशतु भवती ।]

Vasantasenā :—Noble Maitreya, where [is] your gambler ?

Vidūṣaka :—(*To himself*) Ha ! Ha ! Oh ! In addressing [him] as a gambler, [my] dear friend has been [really] adorned [that is, commended] by her. (*Aloud*) Madam, here [is he] indeed in the dry grove of trees !

Vasantasenā :—Sir, what [is that] dry grove of trees of yours, so called ?

Vidūṣaka :—Madam, where nothing can be eaten or drunk.

[Vasantasenā *indulges in a smile*

Vidūṣaka :—So, let Madam enter.

Vasantasenā :—(*Aside*) On entering, what should be said by me here ?

Ceṭī :—Gambler, [is] the evening delightful for you ?

Vasantasenā :—Shall I have the courage [to say this] ?

Ceṭī :—The occasion itself will give [you] courage.

Vidūṣaka :—Let Madam enter.

वसन्तसेना—(प्रविश्योपसृत्य च । पुष्पैस्ताडयन्ती) अइ जूदिअर अवि सुहो दे पदोसो । [अयि द्यूतकर अपि सुखस्ते प्रदोषः ।]

२१ **चारुदत्तः**—(अवलोक्य) अये वसन्तसेना प्राप्ता । (सहर्षमुत्थाय) अयि प्रिये

सदा प्रदोषो मम याति जाग्रतः
सदा च मे निश्वसतो गता निशा ।
त्वया समेतस्य विशाललोचने
ममाद्य शोकान्तकरः प्रदोषकः ॥ ३७ ॥

तत्स्वागतं भवत्यै । इदमासनम् । अत्रोपविश्यताम् ।

विदूषकः—इदं आसणम् । उवविसदु भोदी । [इदमासनम् । उपविशतु
३ भवती ।]

(वसन्तसेनासीना । ततः सर्वे उपविशन्ति)

चारुदत्तः—वयस्य पश्य पश्य ।

वर्षोदकमुद्गिरता श्रवणान्तविलम्बिना कदम्बेन ।
एकः स्तनोऽभिषिक्तो नृपसुत इव यौवराज्यस्थः ॥ ३८ ॥

तद्वयस्य क्लिन्ने वाससी वसन्तसेनायाः । अन्ये प्रधानवाससी समुपनीयेतामिति ।

Vasantasenā :—(*Entering and approaching, striking with flowers*) O gambler, [is] the evening delightful for you ?

Cārudatta :—(*Observing*) Oh, Vasantasenā has come ! (*Rising up, in joy*) O beloved,

For me, the evening always passes in being awake, and for me, the night too has always gone by in sighing [heavily] ; for me united with you to-day, [O] long-eyed one, the evening [would be] the ender of [my] grief !

So welfare to Madam ! Here [is] the seat ! Pray, take a seat here.

Vidūṣaka :—Here [is] the seat, pray, sit down, Madam.

[Vasantasenā *is seated, then all sit down*

Cārudatta :—Friend, see, see—

By the Kadamba [flower] hanging down the end of [her] ear and dropping down rain-water, is one breast [of hers] sprinkled over, like a Prince occupying the position of a Heir-apparent. (38)

So, friend, Vasantasenā's [two] garments have become wet ; let other high-class garments be brought [for her use].

विदूषकः—जं भवं आणवेदि । [यद्भवानाज्ञापयति ।]

चेटी—अज्ज मित्तेअ चिट्ठ तुमम् । अहं ज्जेव अज्जअं सुस्सूसइस्सम् । [आर्य मैत्रेय तिष्ठ त्वम् । अहमेवार्यां शुश्रूषयिष्यामि ।] (तथा करोति)

विदूषकः—(अपवारितकेन) भो वअस्स पुच्छामि दाव तत्थभोदिं किंपि । [भो वयस्य पृच्छामि तावत्तत्रभवतीं किमपि ।]

चारुदत्तः—एवं क्रियताम् ।

विदूषकः—(प्रकाशम्) अथ किंणिमित्तं उण ईदिसे पणट्ठचन्दालोए दुद्दिणअन्धआरे आअदा भोदी । [अथ किंनिमित्तं पुनरीदृशे प्रनष्टचन्द्रालोके दुर्दिनान्धकार आगता भवती ।]

चेटी—अज्जए उजुओ बम्हणो । [आर्ये ऋजुको ब्राह्मणः ।]

वसन्तसेना—णं णिउणोत्ति भणाहि । [ननु निपुण इति भण ।]

चेटी—एसा क्खु अज्जआ एव्वं पुच्छिदुं आअदा—केत्तिअं ताए रअणावलीए मुल्लं त्ति । [एषा खल्वार्या एवं प्रष्टुमागता—कियत्तस्या रत्नावल्या मूल्यम् इति ।]

विदूषकः—(जनान्तिकम्) भो भणिदं मए जधा अप्पमुल्ला रअणावली बहुमुल्लं सुवण्णभण्डअम् । ण परितुट्ठा । अवरं मग्गिदुं आअदा । [भोः भणितं

Vidūṣaka :—As you command.

Ceṭī :—Noble Maitreya, do you stay. I myself shall be doing [the necessary] service to Madam. [*Does accordingly*

Vidūṣaka :—(*Aside*) O friend, I shall just ask something to her ladyship

Cārudatta :—Let this be done.

Vidūṣaka :—(*Aloud*) Now, for what reason again has her ladyship come in such cloudy-day-darkness with the moon-light gone away ?

Ceṭī :—Madam, the Brāhmaṇa [is too] straightforward.

Vasantasenā :—I say, [rather] say 'shrewd.'

Ceṭī :—This [our] Madam indeed has come to ask this—'How much [is] the price of that jewel-necklace ?'

Vidūṣaka :—(*Aside*) Oh, I did [already] say viz.'—the jewel-necklace [is] of small value, the bunch of gold ornaments

मया यथाल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभाण्डम् । न परितुष्टा । अपरं याचितुमागता ।]

चेटी—सा क्खु अज्जआए अत्तणकेरकेत्ति भणिअ जूदे हारिदा । सो अ सहिओ राअवत्थाहारी ण जाणीअदि कहिं गदो त्ति । [सा खल्वार्यया आत्मीयेति भणित्वा द्यूते हारिता । स च सभिको राजवार्ताहारी न ज्ञायते कुत्र गत इति।]

विदूषकः—भोदि मन्तिदं ज्जेव मन्तीअदि । [भवति मन्त्रितमेव मन्त्यते।]

चेटी—जाव सो अण्णेसीअदि ताव एदं ज्जेव गेण्ह सुवण्णभण्डअम् । [यावत्सोऽन्विष्यते तावदिदमेव गृहाण सुवर्णभाण्डम् ।] (इति दर्शयति)

(विदूषको विचारयति)

चेटी—अदिमेत्तं अज्जो णिज्झाअदि । ता किं दिट्ठपुव्वो दे । [अतिमात्रमार्यो निध्यायति । तत्किं दृष्टपूर्वं ते ।]

विदूषकः—भोदि सिप्पकुसलदाए ओबन्धेदि दिट्ठिम् । [भवति शिल्पकुशलतयावबध्नाति दृष्टिम् ।]

चेटी—अज्ज वञ्चिदोसि दिट्ठीए । तं ज्जेव एदं सुवण्णभण्डअम् । [आर्य वञ्चितोऽसि दृष्ट्या । तदेवेदं सुवर्णभाण्डम् ।]

[was] of great value—[so] not quite satisfied, she has come to demand [or, beg] more.'

Ceṭī :—That [jewel-necklace] indeed was gambled away by Madam at play, saying [that is, thinking] that it belonged to herself ; and no one knows [lit. it is not known] where that Sabhika going on king's errand has gone.

Vidūṣaka :—Lady, [by you] is being uttered simply what had been uttered [by me before] !

Ceṭī :—While he is being searched for, take this bunch of gold ornaments itself for the time being.

[*Shows it* ; Vidūṣaka *is absorbed in thought*

Ceṭī :—The noble one is gazing [at it] very intently. Is it then [something] seen before by you ?

Vidūṣaka :—Lady, it attracts [my] sight owing to the skill of craftsmanship.

Ceṭī :—Sir, you are deceived by [your] sight This [is] the same bunch of gold ornaments !

---

१ अतिमात्रमार्या ।

विदूषकः—(सहर्षम्) भो वअस्स तं ज्जेव एदं सुवण्णभण्डअम् जं अम्हाणं गेहे चोरेहिं अवहिदम् । [भो वयस्य तदेवेदं सुवर्णभाण्डम् यदस्माकं गृहे चौरैरपहृतम् ।]

चारुदत्तः—वयस्य

> योऽस्माभिश्चिन्तितो व्याजः कर्तुं न्यासप्रतिक्रियाम् ।
> स एव प्रस्तुतोऽस्माकं किं तु सत्यं विडम्बना ॥ ३९ ॥

विदूषकः—भो वअस्स सच्चं सवामि बम्हणेण । [भो वयस्य सत्यं शपे ब्राह्मण्येन ।]

चारुदत्तः—प्रियं नः प्रियम् ।

विदूषकः—(जनान्तिकम्) भो पुच्छामि णं कुदो एदं समासादिदं त्ति । [भोः पृच्छामि ननु कुत इदं समासादितमिति ।]

चारुदत्तः—को दोषः ।

विदूषकः—(चेट्याः कर्णे) एव्वं विअ । [एवमिव ।]

चेटी—(विदूषकस्य कर्णे) एव्वं विअ । [एवमिव ।]

चारुदत्तः—किमिदं कथ्यते । किं वयं बाह्याः ।

विदूषकः—(चारुदत्तस्य कर्णे) एव्वं विअ । [एवमिव ।]

Vidūṣaka :—(*With joy*) O friend, this [is] the same bunch of gold ornaments which had been carried off by thieves from our house !

Cārudatta :—Friend,

The same trick that was thought of by us to accomplish the return of the deposit, has been put into operation [or, started] regarding us ; but [is this] a fact [or, just] mockery ? (39)

Vidūṣaka :—O friend, [it is] a fact ; I swear by [my] Brāhmaṇa-hood !

Cārudatta :—[It is all] very agreeable to us, very agreeable !

Vidūṣaka :—(*Aside*) Oh, I shall ask—whence possibly has this been secured ?

Cārudatta :—What harm [is there in asking this] ?

Vidūṣaka :—(*In* Ceṭī's *ear*) Like this ?

Ceṭī :—(*In* Vidūṣaka's *ear*) Like this.

Cārudatta :—What [is] this [that is] being told ? [Are] we outsiders [not entitled to know what is going on] ?

Vidūṣaka :—(*In* Cārudatta's *ear*) Like this.

चारुदत्तः—भद्रे सत्यं तदेवेदं सुवर्णभाण्डम् ।

चेटी—अज्ज अध इं । [आर्य अथ किम् ।]

चारुदत्तः—भद्रे न कदाचित्प्रियनिवेदनं निष्फलीकृतं मया । तद्गृह्यतां पारितोषिकमिदमङ्गुलीयकम् । (इत्यनङ्गुलीयकं हस्तमवलोक्य लज्जां नाटयति)

वसन्तसेना—(आत्मगतम्) अदो ज्जेव कामीअसि । [अत एव काम्यसे ।]

चारुदत्तः—(जनान्तिकम्) भोः कष्टम् ।

धनैर्वियुक्तस्य नरस्य लोके किं जीवितेनादित एव तावत् ।
यस्य प्रतीकारनिरर्थकत्वात्कोपप्रसादा विफलीभवन्ति ॥ ४० ॥

अपि च पक्षविकलश्च पक्षी शुष्कश्च तरुः सरश्च जलहीनम् ।
सर्पश्चोद्धृतदंष्ट्रस्तुल्यं लोके दरिद्रश्च ॥ ४१ ॥

अपि च शून्यैर्गृहैः खलु समाः पुरुषा दरिद्राः
कूपैश्च तोयरहितैस्तरुभिश्च शीर्णैः ।

Cārudatta :—Good lady, [is it] true that this [is] the same bunch of gold ornaments ?

Ceṭī :—Sir, just so.

Cārudatta :—Good lady, by me has not at any time been rendered fruitless a welcome communication ! So, please take this ring as a reward.

[*On seeing the hand bereft of the ring, gesticulates shame*

Vasantasenā :—(*To herself*) [It is] for this very reason that you are loved [by me] !

Cārudatta :—(*Aside*) Oh ! Alas !

What is the use of life itself, to begin with, in the world, to a man bereft of riches, whose anger and favour are rendered futile, owing to [their] being useless for [the purpose of] counter-acting ? (40)

And further,

A bird deprived of [or, mutilated in] wings, and a tree dried up, and a lake void of water, and a serpent with [its] fangs taken out—[all these] and a poor man [are of] equal [status or importance] in the world. (41)

And further,

Poor people indeed [are] equal to houses unoccupied, wells void of water and trees shattered down, in that the occasions

यद्दृष्टपूर्वजनसंगमविस्मृताना-
मेवं भवन्ति विफलाः परितोषकालाः ॥ ४२ ॥

विदूषकः—भो अलं अदिमेत्तं संतप्पिदेण। (प्रकाशं सपरिहासम्) भोदि समप्पीअदु ममकेरिआ ण्हाणसाडिआ। [भोः अलमतिमात्रं संतप्तेन।...भवति समर्प्यतां मम स्नानशाटिका।] ३

वसन्तसेना—अज्ज चारुदत्त जुत्तं णेदं इमाए रअणावलीए इमं जणं तुलइदुम्। [आर्य चारुदत्त युक्तं नेदमनया रत्नावल्या इमं जनं तुलयितुम्।]

चारुदत्तः—(सविलक्षस्मितम्) वसन्तसेने पश्य पश्य ६

कः श्रद्धास्यति भूतार्थं सर्वो मां तूलयिष्यति।
शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥ ४३ ॥

विदूषकः—हञ्जे किं भोदीए इध ज्जेव सुविदव्वम्। [चेटि किं भवत्या इहैव स्वप्तव्यम्।]

चेटी—(विहस्य) अज्ज मित्तेअ अदिमेत्तं दाणिं उज्जुअं अत्ताणअं दंसेसि। [आर्यमैत्रेय अतिमात्रमिदानीमृजुकमात्मानं दर्शयसि।] ३

---

of gratification become thus futile for them who forget [their real state in the joy caused] by the union with persons seen before ! (42)

Vidūṣaka :—Oh, enough of being tormented too much. (*Aloud, with a laugh*) Lady, let my own bath-towel be returned !

Vasantasenā :—Noble Cārudatta, it· [was] not proper to treat me [lit. this person] lightly by [the offer of] this jewel-necklace [as a substitute for the stolen gold ornaments, implying thereby that I cared so much for wealth only].

Cārudatta :—(*With embarrassed smile*) Vasantasenā, see, see.

Who would be believing in the real state of things ? Every one would look down upon me. For, in this world, poverty void of [all] dignity [or exploit] is fit to be suspected [of any crime] ! (43)

Vidūṣaka :—Ceṭī, have you got [or, are you going] to sleep in this very place ?

Ceṭī :—(*Laughing*) Noble Maitreya, you are *now* showing yourself to be exceedingly straight-forward !

विदूषकः—भो वअस्स एसो क्खु ओसारअन्तो विअ सुहोवविट्ठं जणं पुणोवि वित्थारिवारिधाराहिं पवुट्ठो पज्जण्णो । [भो वयस्य एष खल्वपसारयन्निव सुखोपविष्टं जनं पुनरपि विस्तारिवारिधाराभिः प्रवृष्टः पर्जन्यः ।]

चारुदत्तः—सम्यगाह भवान् ।

अमूर्हि भित्त्वा जलदान्तराणि पङ्कान्तराणीव मृणालसूच्यः ।
पतन्ति चन्द्रव्यसनाद्विमुक्ता दिवोऽश्रुधारा इव वारिधाराः ॥ ४४ ॥

अपि च धाराभिरार्यजनचित्तसुनिर्मलाभि-
कठोर, भय उत्पन्न करने वाले
श्चण्डाभिरर्जुनशरप्रातिकर्कशाभिः ।
मेघाः स्रवन्ति बलदेवपटप्रकाशाः
मेघ बलदेव के चमकते हुए आंचल के समान [illegible] मोती लुटाते हुए)
शक्रस्य मौक्तिकनिधानमिवोद्गिरन्तः ॥ ४५ ॥

प्रिये पश्य पश्य

[illegible]
एतैः पिष्टतमालवर्णकनिभैरालिप्तमम्भोधरैः
संसक्तैरुपवीजितं सुरभिभिः शीतैः प्रदोषानिलैः ।

Vidūṣaka:—O friend! Here is indeed showering forth rain once again in extensive showers of water, as though driving away persons comfortably seated.

Cārudatta:—You have well remarked.

For, here are falling, on breaking through the interiors of clouds, like the pointed ends of lotus-stalks through the intervals of mud, the showers of water, as though the streams of tears shed by the sky on account of the suffering of the moon. (44)

And further,

In showers, exceedingly clear like the minds of honourable persons, terrifying [and] as hard as the arrows of Arjuna, are pouring forth clouds shining like Balarāma's mantle, as though throwing down Indra's pearl-treasure. (45)

Beloved, see, see—

Here this red [also, in love] lightning longing for union with [also, at the advent of] the cloud, and coming on freely [also, of her own accord] is embracing the sky, like a beloved [her] lover—[the sky which is] enveloped with clouds resem-

१७१

एषाम्भोदसमागमप्रणयिनी स्वच्छन्दमभ्यागता
रक्ता कान्तमिवाम्बरं प्रियतमा विद्युत्समालिङ्गति ॥ ४६ ॥

[illegible]

(वसन्तसेना शृङ्गारभावं नाटयन्ती चारुदत्तमालिङ्गति)

चारुदत्तः—(स्पर्शं नाटयन्प्रत्यालिङ्ग्य)

भो मेघ गम्भीरतरं नद त्वं तव प्रसादात्स्मरपीडितं मे।
संस्पर्शरोमाञ्चितजातरागं कदम्बपुष्पत्वमुपैति गात्रम् ॥ ४७ ॥

विदूषकः—दासीए पुत्त दुद्दिण अणज्जो दाणिं सि तुमम् जं अत्तभोदिं विज्जुआए भाआवेसि । [दास्याःपुत्र दुर्दिन अनार्य इदानीमसि त्वम् यदत्रभवतीं विद्युता भीषयसि ।]

चारुदत्तः—वयस्य नार्हस्युपालब्धुम् । बिजली

वर्षशतमस्तु दुर्दिनमविरतधारं शतह्रदा स्फुरतु ।
अस्मद्विधदुर्लभया यदहं प्रियया परिष्वक्तः ॥ ४८ ॥

---

bling [in colour] the paint of the crushed Tamāla [leaves] [and] fanned by the cool, fragrant evening breezes in close contact. (46)

[Vasantasenā *gesticulating the sentiment of love embraces* Cārudatta

Cārudatta :—(*Gesticulating the effects of the touch, embracing in return*)

O cloud, thunder you on deeper [still]! Through your favour my body tormented by love, attains to the condition of the Kadamba flowers, with horripilation set in and passion excited on account of the close touch! (47)

Vidūṣaka :—Son of a whore, Rainy day, you [are] now a [veritable] boor, in that you are frightening her ladyship with the lightning.

Cārudatta :—Friend, you should not [lit. do not deserve to] scold [the Durdina like that].

Let the Rainy day with ceaseless showers go on for a hundred years! Let the lightning flash forth; for [I owe to them that] I have been embraced by the beloved difficult to secure by [people] like us! (48)

अपि च । वयस्य

धन्यानि तेषां खलु जीवितानि ये कामिनीनां गृहमागतानाम् ।
आर्द्राणि मेघोदकशीतलानि गात्राणि गात्रेषु परिष्वजन्ते ॥४९॥

प्रिये वसन्तसेने

खंभों की आधार भूत वेदिका अपनी जगह से खिसक गई है।

स्तम्भेषु प्रचलितवेदिसंचयान्तं
शीर्णत्वात्कथमपि धार्यते वितानम् :
एषा च स्फुटितसुधाद्रवानुलेपा-
त्सक्लिन्ना सलिलभरेण चित्रभित्तिः ॥ ५० ॥

[illegible] प्लास्टर उखड़ गया है।

(ऊर्ध्वमवलोक्य) अये इन्द्रधनुः । प्रिये पश्य पश्य

इन्द्र के धनुष रूपी लम्बी ऊपर उठाई गई है

विद्युज्जिह्वेनेदं महेन्द्रचापोच्छ्रितायतभुजेन ।
जलधरविवृद्धहनुना विजृम्भितमिवान्तरीक्षेण ॥ ५१ ॥

तदेहि । अभ्यन्तरमेव प्रविशावः । (इत्युत्थाय परिक्रामति)

And further, friend,

Blessed indeed [are] the lives of those who with [their] bodies [closely] embrace the bodies wet and cool with rain [lit. cloud-] water, of lovely ladies come to [their] house [of their own accord] ! (49)

Beloved Vasantasenā,

The canopy, being tattered, is somehow [or, with great difficulty] supported on the pillars, with the ends of pedestal-masonry being dislocated ; and this painted wall too [is] completely wetted with the down-pour (*bhara*) of water, on account of the plaster-coating being cracked. (50)

(*Looking upwards*) Ah ! The Rain-bow ! Beloved, see, see—

Here is the sky as-though yawning, with [its] tongue in the form of lightning, long uplifted arms in the form of Indra's bow, [and] lengthened chin in the form of the clouds ! (51)

So, come ; let us enter the inside itself [of the house].
[*Rising up, moves about*

ताल पत्रों पर तेजी से गम्भीर ध्वनि सहित जोर की आवाज करते हुए,

तालीषु तारं विटपेषु मन्द्रं शिलासु रूक्षं सलिलेषु चण्डम् ।
संगीतवीणा इव ताड्यमानास्तालानुसारेण पतन्ति धाराः ॥५२॥

वीणाओं की ध्वनि के समान ताल का अनुसरण करती हुई । (इति निष्क्रान्ताः सर्वे)

इति दुर्दिनो नाम पञ्चमोऽङ्कः ।

Sharply on the Tāla leaves, deep-sounding on the branches, harshly on the slabs of stone [and] loudly [or, violently] on the waters, are falling down the showers, like lutes in musical concerts, being struck [or, played upon] in accordance with the keeping of time ! (52)

[*Exeunt omnes*

Here ends the Fifth Act called ' Durdina ' [Rainy Day]

षष्ठोऽङ्कः।

(ततः प्रविशति चेटी)

चेटी--कधं अज्ज वि अज्जआ ण विबुज्झदि। भोदु। पविसिअ पडिबोधइस्सम्। [कथमद्याप्यार्या न विबुध्यते। भवतु। प्रविश्य प्रतिबोधयिष्यामि।]

(इति नाट्येन परिक्रामति)

(ततः प्रविशत्याच्छादितशरीरा प्रसुप्ता वसन्तसेना)

चेटी—(निरूप्य) उत्थेदु उत्थेदु अज्जआ। पभादं संवुत्तम्। [उत्तिष्ठतूत्तिष्ठत्वार्या। प्रभातं संवृत्तम्।]

वसन्तसेना—(प्रतिबुध्य) कधं रत्ति ज्जेव पभादं संवुत्तम्। [कथं रात्रिरेव प्रभातं संवृत्तम्।]

चेटी—अम्हाणं एसो पभादो। अज्जआए उण रत्तिं ज्जेव। [अस्माकमेतत्प्रभातम्। आर्यायाः पुना रात्रिरेव।]

वसन्तसेना—हञ्जे कहिं उण तुम्हाणं जूदिअरो। [चेटि कुत्र पुनर्युष्माकं द्यूतकरः।]

ACT VI

(*Then enter* Ceṭī)

Ceṭī :—What, Madam has not awakened even now! Well, entering [her apartment] I shall awaken [her].

[*Gesticulates walking about*

(*Then is discovered* Vasantasenā, *asleep, with her body covered up*)

Ceṭī :—(*Scrutinising*) Rise up, rise up, Madam. It has dawned [or, morning has come] !

Vasantasenā :—(*Awakening*) What, the night itself has turned into dawn ?

Ceṭī :—To us it [is] dawn; to Madam however [it is] night itself.

Vasantasenā :—Ceṭī, where again [is] your gambler ?

चेटी—अज्जए वड्ढमाणअं समादिसिअ पुप्फकरण्डअं जिण्णुज्जाणं गदो अज्जचारुदत्तो। [आर्ये वर्धमानकं समादिश्य पुष्पकरण्डकं जीर्णोद्यानं गत आर्यचारुदत्तः।]

वसन्तसेना—किं समादिसिअ। [किं समादिश्य।]

चेटी—जोएहि रत्तीए पवहणम् वसन्तसेना गच्छदु त्ति। [योजय रात्रौ प्रवहणम् वसन्तसेना गच्छत्विति।]

वसन्तसेना—हञ्जे कहिं मए गन्तव्वम्। [चेटि कुत्र मया गन्तव्यम्।]

चेटी—अज्जए जहिं चारुदत्तो। [आर्ये यत्र चारुदत्तः।]

वसन्तसेना—(चेटीं परिष्वज्य) हञ्जे सुट्ठु ण णिज्झाइदो रत्तीए। तां अज्ज पच्चक्खं पेक्खिस्सम्। हञ्जे किं पविट्ठा अहं इह अब्भन्तरचदुस्सालअम्। [चेटि सुष्ठु न निध्यातो रात्रौ। तदद्य प्रत्यक्षं प्रेक्षिष्ये। चेटि किं प्रविष्टाहमिहाभ्यन्तरचतुःशालकम्।]

चेटी—ण केवलं अब्भन्तरचदुस्सालअम्। सव्वजणस्स वि हिअअं पविट्ठा। [न केवलमभ्यन्तरचतुःशालकम्। सर्वजनस्यापि हृदयं प्रविष्टा।] //

वसन्तसेना—अवि संतप्पदि चारुदत्तस्स परिअणो। [अपि संतप्यते चारुदत्तस्य परिजनः।]

चेटी—संतप्पिस्सादि। [संतप्स्यते।]

Ceṭī :—Madam, having directed Vardhamānaka, the noble Cārudatta has gone to the old garden Puṣpakaraṇḍaka.

Vasantasenā :—Directing what ?

Ceṭī :—Arrange for the car at [that is, while it is still] night [time], so that Vasantasenā might go.

Vasantasenā :—Ceṭī, where have I to go ?

Ceṭī :—Madam, where Cārudatta [is].

Vasantasenā :—(*Embracing* Ceṭī) Ceṭī, [Cārudatta] was not well gazed at intently [by me] at night. So, to-day I shall directly look at him. Ceṭī, what, have I here entered the inner quadrangle ?

Ceṭī :—Not merely the inner quadrangle ; [you have] entered the hearts as well of all people. //

Vasantasenā :—Are Cārudatta's servants fretting about ?

Ceṭī :—They would be fretting about.

वसन्तसेना—कदा । [कदा ।]

चेटी—जदो अज्जआ गमिस्सदि । [यदार्या गमिष्यति ।]

वसन्तसेना—तदो मए पढमं संतप्पिदव्वम् । (सानुनयम्) हञ्जे गेण्ह एदं रअणावलिम् । मम बहिणिआए अज्जाधूदाए गदुअ समप्पेहि । भणिदव्वं अ—अहं सिरिचारुदत्तस्स गुणणिज्जिदा दासी तदा तुम्हाणं पि । ता एसा तुह ज्जेव कण्ठाहरणं होदु रअणावली । [तदा मया प्रथमं संतप्तव्यम् । ...चेटि गृहाणेमां रत्नावलीम् । मम भगिन्या आर्याधूतायै गत्वा समर्पय। भणितव्यं च—अहं श्रीचारुदत्तस्य गुणनिर्जिता दासी तदा युष्माकमपि । तदेषा तवैव कण्ठाभरणं भवतु रत्नावली ।]

चेटी—अज्जए कुपिस्सदि चारुदत्तो अज्जाए दाव। [आर्ये कोपिष्यति चारुदत्त आर्यायै तावत् ।]

वसन्तसेना—गच्छ । ण कुपिस्सदि । [गच्छ । न कोपिष्यति ।]

चेटी—(गृहीत्वा) जं अज्जआ आणवेदि। (इति निष्क्रम्य पुनः प्रविशति) अज्जए भणादि अज्जा धूदा—अज्जउत्तेण तुम्हाणं पसादीकिदा । ण जुत्तं मम एदं गेण्हिदुम् । अज्जउत्तो ज्जेव मम आहरणविसेसो त्ति जाणादु भोदी। [यदार्याज्ञापयति। ...आर्ये भणत्यार्या धूता—आर्यपुत्रेण युष्माकं प्रसादीकृता। न युक्तं ममैतां ग्रहीतुम् । आर्यपुत्र एव ममाभरणविशेष इति जानातु भवती ।]

(ततः प्रविशति दारकं गृहीत्वा रदनिका)

Vasantasenā :—When ?

Ceṭī :—If Madam would be going.

Vasantasenā :—In that case, I ought to be fretting first. (*Imploringly*) Ceṭī, take this jewel-necklace. Go and [lit. having gone] deliver [it] over to my sister, the noble Dhūtā, and this should be said—'I [am] a slave to the illustrious (*śrī*) Cārudatta, won by [his] virtues, so [I am a slave] to you as well. So, let this jewel-necklace be the neck-ornament for you alone !'

Ceṭī :—Madam, Cārudatta might perhaps get angry with her ladyship !

Vasantasenā :—Go [or, no fear], he would not be angry.

Ceṭī :—(*Taking it*) As Madam commands. (*Going out, re-enters*) Madam, the noble Dhūtā says—'[This jewel-necklace] has been given to you as a favour by my Lord. It [is] not proper for me to take it. My Lord himself [is] my ornament *par excellence*—let Madam understand [this].'

(*Then enter* Radanikā, *taking with her a boy*)

रदनिका—एहि वच्छ सअडिआए कीलम्ह। [एहि वत्स शकटिकया क्रीडावः ।]

दारकः—(सकरुणम्) रदणिए किं मम एदाए मट्टिआसअडिआए। तं ५१
ज्जेव सोवण्णसअडिअं देहि। [रदानिके किं ममैतया मृत्तिकाशकटिकया। तामेव
सौवर्णशकटिकां देहि ।]

रदनिका—(सनिर्वेदं निःश्वस्य) जाद कुदो अम्हाणं सुवण्णववहारो। ५४
तादस्स पुणो वि रिद्धीए सुवण्णसअडिआए कीलिस्ससि। (स्वगतम्) ता जाव
विणोदेमि णम्। अज्जआए वसन्तसेणआए समीवं उवसप्पिस्सम्। (उपसृत्य)
अज्जए पणमामि। [जात कुतोऽस्माकं सुवर्णव्यवहारः। तातस्य पुनरपि ऋद्ध्या ५७
सुवर्णशकटिकया क्रीडिष्यसि ।...तद्यावद्विनोदयाम्येनम्। आर्याया वसन्तसेनायाः
समीपमुपसर्पिष्यामि । ...आर्ये प्रणमामि ।]

वसन्तसेना—रदणिए साअदं दे। कस्स उण अअं दारओ। अणलं- ६०
किदसरीरो वि चन्दमुहो आणन्देदि मम हिअअम्। [रदानिके स्वागतं ते। कस्य
पुनरयं दारकः। अनलंकृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।]

रदनिका—एसो क्खु अज्जचारुदत्तस्स पुत्तो रोहसेणो णाम। [एष ६३
खल्वार्यचारुदत्तस्य पुत्रो रोहसेनो नाम।]

वसन्तसेना—(बाहू प्रसार्य) एहि मे पुत्तअ आलिङ्ग। (इत्यङ्क उपवेश्य)
अणुकिदं अणेण पिदुणो रूवम्। [एहि मे पुत्रक आलिङ्ग। ...अनुकृतमनेन ६६
पितू रूपम्।]

Radanikā :—Come, dear one, let us play with [this] toy-cart.

Dāraka :—(*Plaintively*) Radanikā, what have I to do with this clay toy-cart? Give [me] that same golden toy-cart.

Radanikā :—(*Sighing in dejection*) Darling, whence dealing with gold on our part? With prosperity [returning] once again to [your] papa, you would be playing with a golden toy-cart. (*To herself*) So, I shall just [try to] divert him. I shall go to the noble Vasantasenā. (*Approaching*) Madam, I salute [you].

Vasantasenā :—Radanikā, welcome to you! Whose again [is] this boy? Though with a body unadorned with ornaments, the moon-faced one delights my heart!

Radanikā :—He [is] indeed the son of the noble Cārudatta, Rohasena by name.

Vasantasenā :—(*Stretching forth her arms*) Come, my dear boy, embrace [me]. (*Placing him on her lap*) By him has been imitated the [handsome] form of [his] father!

रदनिका—ण केवलं रूवम् सीलं पि तक्केमि । एदिणा अज्जचारुदत्तो अत्ताणअं विणोदेदि । [न केवलं रूपं शीलमपि तर्कयामि । एतेनार्यचारुदत्त आत्मानं विनोदयति ।]

वसन्तसेना—अध किंणिमित्तं एसो रोअदि । [अथ किंनिमित्तमेष रोदिति ।]

रदनिका—एदिणा पडिवेसिअगहवइदारअकेरिआए सुवण्णसअडिआए कीलिदम् । तेण अ सा णीदा । तदो उण तं मग्गन्तस्स मए इअं मट्टिआसअडिआ कदुअ दिण्णा । तदो भणादि—रदणिए किं मम एदाए मट्टिआसअडिआए । तं ज्जेव सोवण्णसअडिअं देहि त्ति । [एतेन प्रतिवेशिकगृहपतिदारकस्य सुवर्णशकटिकया क्रीडितम् । तेन च सा नीता । ततः पुनस्तां याचमानस्य मयेयं मृत्तिकाशकटिका कृत्वा दत्ता । ततो भणाति—रदनिके किं ममैतया मृत्तिकाशकटिकया । तामेव सौवर्णशकटिकां देहि इति ।]

neighbouring
landlord

वसन्तसेना—हद्धी हद्धी । अअं पि णाम परसंपत्तीए संतप्पादि । भअवं कअन्त पोक्खरवत्तपडिदजलबिन्दुसरिसेहिं कीलसि तुमं पुरिसभाअधेएहिं । (इति सास्रा) जाद मा रोद । सोवण्णसअडिआए कीलिस्ससि । [हा धिक् हा धिक् । अयमपि नाम परसंपत्त्या संतप्यते । भगवन्कृतान्त पुष्करपत्रपतितजलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः ।...जात मा रुदिहि । सौवर्णशकटिकया क्रीडिष्यसि ।]

दारकः—रदणिए का एसा । [रदनिके कैषा ।]

वसन्तसेना—पिदुणो दे गुणणिज्जिदा दासी । [पितुस्ते गुणानिर्जिता दासी ।]

Radanikā :—Not merely form, but character too, I think. The noble Cārudatta diverts himself with him.

Vasantasenā :—Now, for what reason has he been crying

Radanikā :—He played with the golden toy-cart of the [little] son of the neighbour-gentleman [lit. householder]. And that was taken away by him. Then when he asked for it, I made this clay toy-cart and gave [it to him], when he says—'Radanikā, what have I to do with this clay toy-cart? Give [me] that same golden toy-cart.'

Vasantasenā :—Oh fie ! Alas ! This one too is tormented by the wealth of others ! Divine Fate ! You play with the fortunes of people, resembling drops of water fallen on a lotus-leaf ! (*With tears*) Darling, weep not. You shall play with a golden toy-cart.

Dāraka :—Radanikā, who [is] this one ?

Vasantasenā :—Your father's slave won over by [his] virtues !

रदनिका— जाद अज्जआ दे जणणी भोदि। [जात आर्या ते जननी भवति।]

दारकः—रदणिए अलिअं तुमं भणासि। जइ अम्हाणं अज्जआ जणणी ९७
ता कीस अलंकिदा। [रदनिके अलीकं त्वं भणसि। यद्यस्माकमार्या जननी तत्कि- ch.
मर्थमलंकृता।]

वसन्तसेना—जाद मुद्धेण मुहेण अदिकरुणं मन्तेसि। (नाट्येनाभर- ९८
णान्यवतार्य रुदती) एसा दाणिं दे जणणी संवुत्ता। ता गेण्ह एदं अलंकारअम्।
सोवण्णसअडिअं घडावेहि। [जात मुग्धेन मुखेनातिकरुणं मन्त्रयसे। ...एषेदानीं good ch
ते जननी संवृत्ता। तद्गृहाणेतमलंकारम्। सौवर्णशकटिकां कारय।] ९९

दारकः—अवेहि। ण गेण्हिस्सम्। रोदसि तुमम्। [अपेहि। न ग्रही-
ष्यामि। रोदिषि त्वम्।]

वसन्तसेना—(अश्रूणि प्रमृज्य) जाद ण रोदिस्सम्। गच्छ। कील। १००
(अलंकारैर्मृच्छकटिकं पूरयित्वा) जाद कारेहि सोवण्णसअडिअम्। [जात न
रोदिष्यामि। गच्छ। क्रीड। ...जात कारय सौवर्णशकटिकाम्।]

(इति दारकमादाय निष्क्रान्ता रदनिका) १०१

(प्रविश्य प्रवहणाधिरूढः) **चेटः**—लदणिए लदणिए णिवेदेहि अज्जआए
वशन्तशेणाए—ओहालिअं पक्खदुआलए शज्जं पवहणं चिट्ठदि। [रदनिके
रदनिके निवेदयार्यायै वसन्तसेनायै—अपवारितं पक्षद्वारके सज्जं प्रवहणं तिष्ठति।] १०२

Radanikā :—Darling, Madam is your mother.

Dāraka :—Radanikā, you are speaking untruth. If Madam [is] our mother, then for what reason [is] she adorned with ornaments ?

Vasantasenā :—Dear boy, with [your] guileless face, you are talking very pitiably ! (*Gesticulating taking off the ornaments, weeping*) Here have I now become your mother ! So, take this heap of ornaments ; get a golden toy-cart made [out of them].

Dāraka :—Away with [it] ! I shall not take [them]. You are weeping !

Vasantasenā :—(*Wiping off her tears*) Darling, I shall not weep. Go, play on. (*Filling the clay toy-cart with the ornaments*) Darling, get a golden toy-cart made [out of them].

[*Taking the boy, exit* Radanikā

(*Entering, mounted on a car*) **Ceṭa** :—Radanikā, Radanikā ! Inform her ladyship Vasantasenā—' The car stands ready covered up, at the side-door '.

(प्रविश्य) **रदनिका**—अज्जए एसो वड्ढमाणओ विण्णवेदि—पक्खदुआरए सज्जं पवहणं त्ति। [आर्ये एष वर्धमानको विज्ञापयति—पक्षद्वारे सज्जं प्रवहणम् इति ।]

वसन्तसेना—हञ्जे चिट्ठदु मुहुत्तअम् जाव अहं अत्ताणअं पसाधेमि। [चेटि तिष्ठतु मुहूर्तकम् यावदहमात्मानं प्रसाधयामि ।]

रदनिका—(निष्क्रम्य) वड्ढमाणआ चिट्ठ मुहुत्तअम् जाव अज्जआ अत्ताणअं पसाधेदि । [वर्धमानक तिष्ठ मुहूर्तकम् यावदार्यात्मानं प्रसाधयति ।]

चेटः—ही ही भो मए वि जाणत्थलके विशुमलिदे । ता जाव गेण्हिअ आअच्छामि । एदे णश्शालज्जुकडुआ बइल्ला । भोदु । पवहणेण ज्जेव गदागदिं कलिश्शम् । [ही ही भोः मयापि यानास्तरणं विस्मृतम् । तद्यावद्गृहीत्वागच्छामि। एतौ नासिकारज्जुकटुकौ बलीवर्दौ । भवतु । प्रवहणेनैव गतागतिं करिष्यामि ।]

Impetient .

(इति निष्क्रान्तश्चेटः)

वसन्तसेना—हञ्जे उवणेहि मे पसाहणम् । अत्ताणअं पसाधइस्सम् । [चेटि उपनय मे प्रसाधनम्। आत्मानं प्रसाधयिष्यामि।] (इति प्रसाधयन्ती स्थिता)

(प्रविश्य प्रवहणाधिरूढः)

स्थावरकश्चेटः—आणत्तम्हि लाअशालअशंठाणएण—थावलआ पवहणं गेण्हिअ पुप्फकलण्डअं जिण्णुज्जाणं तुलिदं आअच्छेहि त्ति। भोदु। तहिं ज्जेव

(*Entering*) **Radanikā** :—Madam, here Vardhamānaka submits—'The car [is] ready at the side-door.'

Vasantasenā :—Ceṭī, let it wait for a while, while I do my toilet.

Radanikā :—(*Going out*) Vardhamānaka, wait for a while, while Madam does her toilet.

Ceṭa :—Ha ! Ha ! Oh ! I too have forgotten the car-cushions. So, I shall [go to] take them and come back. These bullocks [are however] impetuous [that is, not likely to stand still unattended] requiring the use of the nose-string. Well, I shall do the going and coming by the car itself. [*Exit Ceṭa*

Vasantasenā :—Ceṭī, bring me my toilet-requisites. I shall decorate myself. [*Stands decorating herself*

(*Entering, mounting the car*) **Sthāvaraka Ceṭa** :—I have been ordered by the king's brother-in-law Saṁsthānaka—' Sthāvaraka, taking the car, come quickly to the old garden Puṣpa-

गच्छामि। वहध बइल्ला वहध। (परिक्रम्यावलोक्य च) कधं गामशअडेहिं लुद्धे १२०
मग्गे। किं दाणिं एत्थ कलइश्शम्। (साटोपम्) अले ले ओशलध ओशलध
(आकर्ण्य) किं भणाध——एशे कश्शकेलके पहवणे त्ति। एशे लाअशालअशंठाणअ-
केलके पवहणे त्ति ता शिग्घं ओशलध। (अवलोक्य) कधम् एशे अवले शहिअं १२२
विअ मं पेक्खिअ शहश ज्जेव जूदपलाइदे विअ जूदिअले ओहालिअ अत्ता-
णअं अण्णदो अवक्कन्ते। ता के उण एशे। अधवा किं मम एदिणा। तुलिदं
गमिश्शम्। अले ले गामेलुआ ओशलध ओशलध। किं भणाध—मुहुत्तअं चिट्ठ १२६
चक्कपलिवट्टिं देहि त्ति। अले ले लाअशालअशंठाणअकेलके हग्गे शूले चक्कपलि-
वट्टिं दइश्शम्। अधवा एशे एआई तवश्शी। ता एव्वं कलेमि। एदं पवहणं
अज्जचालुदत्तश्श लुक्खवाडिआए पक्खदुआलए थावेमि। (इति प्रवहणं संस्थाप्य १२९
एशे म्हि आअदे। [आज्ञप्तोऽस्मि राजश्यालकसंस्थानके—स्थावरक प्रवहणं गृहीत्वा
पुष्पकरण्डकं जीर्णोद्यानं त्वरितमागच्छ इति। भवतु। तत्रैव गच्छामि। वहतं बली-
वर्दौ वहतम्।...कथं ग्रामशकटै रुद्धो मार्गः। किमिदानीमत्र करिष्यामि।...अरे रे १३२
अपसरत अपसरत।...किं भणथ–एतत्कस्य प्रवहणम् इति। एतद्राजश्यालकसंस्थानकस्य
प्रवहणमिति तच्छीघ्रमपसरत।...कथम् एषोऽपरः सभिकमिव मां प्रेक्ष्य सहसैव द्यूत-
पलायित इव द्यूतकरोऽपवार्यात्मानमन्यतोऽपक्रान्तः। तत्कः पुनरेषः। अथवा किं १३५
ममैतेन। त्वरितं गमिष्यामि। अरे रे ग्राम्याः अपसरत अपसरत। किं भणथ—मुहू-
र्तकं तिष्ठ चक्रपरिवृत्तिं देहि इति। अरे रे राजश्यालकसंस्थानकस्याहं शूरश्चक्रपरिवृत्तिं

---

karaṇḍaka.' Well, I shall go just there. Lead on, bullocks, lead on! (*Moving about and beholding*) What! The way is blocked up by the village carts! What shall I now do here? (*Arrogantly*) Aye, you, get out of the way, get out of the way! (*Listening*) What do you say—'Whose [is] this car?' This [is] the car of the king's brother-in-law Saṁsthānaka; and so, get out of the way quickly. (*Beholding*) What! Here [is] some one (*aparaḥ*) suddenly moving off in another direction, concealing himself, like a gambler running away from the game, on seeing me like the Sabhika! So, who again [is] he? Or rather, what have I to do with this? I shall go quickly. Oh, you rustics, get out of the way, get out of the way! What do you say—'Wait for a while; give a turn to the wheel'. Oh you! I, belonging to the king's brother-in-law Saṁsthānaka, [and so] august, should give a turn to the wheel! Or rather, this one [is] a poor fellow, all alone.

दास्यामि । अथवा एष एकाकी तपस्वी । तदेवं करोमि । एतत्प्रवहणमार्यचारुदत्तस्य वृक्षवाटिकायाः पक्षद्वारके स्थापयामि । ...एषोऽस्म्यागतः ।] (इति निष्क्रान्तः)

चेटी—अज्जए णेमिसद्दो विअ सुणीअदि । ता आअदो पवहणो । [आर्ये नेमिशब्द इव श्रूयते । तदागतं प्रवहणम् ।]

वसन्तसेना—हञ्जे गच्छ । तुवरदि मे हिअअम् । ता आदेसेहि पक्खदुआरअम् । [चेटि गच्छ । त्वरते मे हृदयम् । तदादेशय पक्षद्वारम् ।]

चेटी—एदु एदु अज्जआ । [एत्वेत्वार्या ।]

वसन्तसेना—(परिक्रम्य) हञ्जे वीसम तुमम् । [चेटि विश्राम्य त्वम् ।]

चेटी—जं अज्जआ आणवेदि । [यदार्याज्ञापयति ।] (इति निष्क्रान्ता)

वसन्तसेना—(दक्षिणाक्षिस्पन्दं सूचयित्वा प्रवहणमधिरुह्य च) किं ण्णेदं फुरादि दाहिणं लोअणम् । अधवा चारुदत्तस्स ज्जेव दंसणं अणिमित्तं पमज्जइस्सदि । [किं न्विदं स्फुरति दक्षिणं लोचनम् । अथवा चारुदत्तस्यैव दर्शनमनिमित्तं प्रमार्जयिष्यति ।]

(प्रविश्य) **स्थावरकश्चेटः**—ओशालिदा मए शअडा । ता जाव गच्छामि । (इति नाट्येनाधिरुह्य चालयित्वा । स्वगतम्) भालिके पवहणे । अधवा चक्कपलिवट्टिआए पलिश्शन्तश्श भालिके पवहणे पडिभाशेदि । भोदु । गामिश्शम् । जाध

So, I shall do this. I shall park this car at the side-door of the grove of trees belonging to the noble Cārudatta. (*Parking the car*) Here am I coming ! [*Exit*

Ceṭī :—Madam, [some noise] like the noise of the rims is heard. So, the car has arrived.

Vasantasenā :—Ceṭī, go ; my heart hastens [me] on ; so, direct [me to] the side-door.

Ceṭī :—Come, Madam, come.

Vasantasenā :—(*Moving about*) Ceṭī, rest you [yourself].

Ceṭī :—As Madam commands. [*Exit*

Vasantasenā :—(*Indicating the throbbing of the right eye, and mounting the car*) Why possibly is this [my] right eye throbbing ? Or rather, the sight of Cārudatta himself would wipe off [any] evil omen !

(*Entering*) **Sthāvaraka Ceṭa** :—The carts have been got out of the way by me. So, I shall go. (*Gesticulating mounting and driving ; to himself*) Heavy [is] the car ! Or rather, the car

गोणा जाध। [अपसारिता मया शकटाः। तद्यावद्गच्छामि। ...भारवत्प्रवहणम्। अथवा चक्रपरिवृत्त्या परिश्रान्तस्य भारवत्प्रवहणं प्रतिभासते। भवतु। गमिष्यामि। यातं गावौ यातम्।]

(नेपथ्ये) अरे रे दोवारिआ अप्पमत्ता सएसु सएसु गुम्मट्ठाणेसु होध। एसो अज्ज गोवालदारओ गुत्तिअं भञ्जिअ गुत्तिवालअं वावादिअ बन्धणं भेदिअ परिब्भट्ठो अवक्कमदि। ता गेण्हध गेण्हध। [अरे रे दौवारिकाः अप्रमत्ताः स्वेषु स्वेषु गुल्मस्थानेषु भवत। एषोऽद्य गोपालदारको गुप्तिं भङ्क्त्वा गुप्तिपालकं व्यापाद्य बन्धनं भित्त्वा परिभ्रष्टोऽपक्रामति। तद्गृह्णीत गृह्णीत।]

(प्रविश्यापटीक्षेपेण संभ्रान्त एकचरणलग्ननिगडोऽवगुण्ठित आर्यकः परिक्रामति)

चेटः—(स्वगतम्) महन्ते णअलीए शंभमे उप्पण्णे। ता तुलिदं तुलिदं गमिश्शम्। [महान्नगर्यां संभ्रम उत्पन्नः। तत्त्वरितं त्वरितं गमिष्यामि।]

(इति निष्क्रान्तः)

आर्यकः—

हित्वाहं नरपतिबन्धनापदेशव्यापत्तिव्यसनमहार्णवं महान्तम्। under the guise of.
पादाग्रस्थितनिगडैकपाशकर्षी प्रभ्रष्टो गज इव बन्धनाद्भ्रमामि॥ १॥

appears to be heavy [to me who am] quite fatigued owing to the turning of the wheel. Well, I shall go. Move on, bullocks, move on.

(*Behind the curtain*) O you gate-sentries! Be [you] watchful at your respective sentry-posts! Here to-day the cow-herd-boy, breaking through the prison, murdering the jailor [and] smashing [his] fetters, has slipped away and is moving off. So, capture [him], hold [him] up!

[*Entering, tossing aside the curtain, excited, with the chain clinging to one foot, and veiled,* Āryaka *moves about*

Ceṭa :—(*To himself*) A great commotion has started in the city! So, I shall go very quickly. [*Exit*

Āryaka :—

Having left off the vast big ocean in the form of death-disaster under the guise of the king's prison, [and] dragging away one fetter of the chain resting on [or, clinging to] the fore-part of the foot, do I wander like an elephant slipping away from the [tying] chain! (1)

---

१ नराणाम्।

भोः अहं खलु सिद्धादेशजनितपरित्रासेन राज्ञा पालकेन घोषादानीय विशसने गूढागारे बन्धनेन बद्धः । तस्माच्च प्रियसुहृच्छर्विलकप्रसादेन बन्धनात्परि-३भ्रष्टोऽस्मि । (अश्रूणि विसृज्य)

यदि मेरे भाग्य में राज्य लिखा है

wild elephant

[illegible] दैवी [illegible] राजा और कहा हूँ ?

भाग्यानि मे यदि तदा मम कोऽपराधो
यद्वन्यनाग इव संयमितोऽस्मि तेन ।
दैवी च सिद्धिरपि लङ्घयितुं न शक्या-
गम्यो नृपो बलवता सह को विरोधः॥ २ ॥

तत्कुत्र गच्छामि मन्दभाग्यः । (विलोक्य) इदं कस्यापि साधोरनावृतपक्षद्वारं गेहम् ।

no bolt

unclosed bolt(s)

इदं गृहं भिन्नमदत्तदण्डो विशीर्णसंधिश्च महाकपाटः ।
ध्रुवं कुटुम्बी व्यसनाभिभूतां दशां प्रपन्नो मम तुल्यभाग्यः ॥ ३ ॥

तदत्र तावत्प्रविश्य तिष्ठामि ।

(नेपथ्ये) जाध गोणा जाध । [यातं गावौ यातम् ।]

३ **आर्यकः**—(आकर्ण्य) अये प्रवहणमित एवाभिवर्तते ।

Oh, I was indeed, after being brought from the hamlet, bound down with a chain in the secret dungeon for being killed, by King Pālaka, on account of the fright caused by the [prophecy of the] sooth-sayer. And from that prison I slipped away through the favour of [my] dear friend Śarvilaka. (*Shedding tears*)

If [good] fortune [is] mine, then what [was] my fault that I was bound down by him, like a wild elephant ? The accomplishment too [of a desired object by] divine [agency] is again not possible to withstand [or, transgress]. Inaccessible [is] the king ; what [possible] opposition [can there be] to a powerful person ? (2)

So, where shall I go, luckless that I am ? (*Looking*) Here [is] the house with the side-door open, of some good man !

This house [is all] dilapidated ; [its] huge panel of the gate has no bolt fastened [to it] and is shattered at the joints. Surely [this] householder of equal fortune to that of myself, has attained to a state overcome with calamity ! (3)

So, entering just here, I shall stay on.

(*Behind the curtain*) Move on, bullocks, move on.

Aryaka :—(*Listening*) Ah ! The car is coming up just here !

---

१ शक्या गम्यो । २ भिन्नमनायतार्गलं ।

more commodious covered car.

भवेद्गोष्ठीयानं न च विषमशीलैरधिगतं
वधूसंयानं वा तदभिगमनोपस्थितमिदम् ।
बहिर्नेतव्यं वा प्रवरजनयोग्यं विधिवशा-
द्विविक्तत्वाच्छून्यं मम खलु भवेद्दैवविहितम् ॥ ४ ॥

वधू को ले जाने के लिए हो

उच्च कुल के योग्य

(ततः प्रवहणेन सह प्रविश्य)

वर्धमानकश्चेटः—हीमाणहे । आणीदे मए जाणत्थलके । लदणिए णिवेदेहि अज्जआए वशन्तशेणाए—अवत्थिदे शज्जे पवहणे अहिलुहिअ पुप्फकलण्डअं जिण्णुज्जाणं गच्छदु अज्जआ। [आश्चर्यम्। आनीतं मया यानास्तरणम्। रदनिके निवेदयार्यायै वसन्तसेनायै—अवास्थितं सज्जं प्रवहणमधिरुह्य पुष्पकरण्डकं जीर्णोद्यानं गच्छत्वार्या।]

आर्यकः—(आकर्ण्य) गणिकाप्रवहणमिदम् । बहिर्यानं च । भवतु । अधिरोहामि । (इति स्वैरमुपसर्पति)

चेटः—(श्रुत्वा) कधं णेउलशद्दे । ता आअदा क्खु अज्जआ । अज्जए इमे णश्शालज्जुकडुआ बइल्ला । ता पिट्ठदो ज्जेव आलुहदु अज्जआ । [कथं नूपुरशब्दः। तदागता खल्वार्या। आर्ये इमौ नासिकारज्जुकटुकौ बलीवर्दौ। तत्पृष्ठत एवारोहत्वार्या।] (आर्यकस्तथा करोति)

Would it be a public car, but not occupied by [people of] unbalanced [or, questionable] character? Or, this a bride's vehicle coming to take her away? Or, one to be taken outside, fit for high-class gentry, through the stroke of fortune? Or, could it be indeed for me, ordained by fate, unoccupied, owing to its being unattended? (4)

(*Then entering with the car*) **Vardhamānaka Ceṭa** :—Ha! Ha! I have brought the car-cushions. Radanikā, inform her ladyship Vasantasenā—'Mounting the car got ready and stationed here, let Madam proceed to the old garden Puṣpakaraṇḍaka.'

Āryaka :—(*Listening*) This [is] a courtesan's car! And a car going outside! Well, I shall mount [it]. [*Approaches slowly*

Ceṭa :—(*Hearing*) What, the noise of the anklets! Then Madam has indeed come! Madam, these [two] bullocks are fiery [-tempered] requiring the use of the nose-string! So, let Madam mount just from behind! [Āryaka *does accordingly*

भोः अहं खलु सिद्धादेशजनितपरित्रासेन राज्ञा पालकेन घोषादानीय विशसने गूढागारे बन्धनेन बद्धः । तस्माच्च प्रियसुहृच्छर्विलकप्रसादेन बन्धनात्परि-¹भ्रष्टोऽस्मि । (अश्रूणि विसृज्य)

यदि मेरे भाग्य में राज्य लिखा है

भाग्यानि मे यदि तदा मम कोऽपराधो
यद्वन्यनाग इव संयमितोऽस्मि तेन ।
दैवी च सिद्धिरपि लङ्घयितुं न शक्या-
गम्यो नृपो बलवता सह को विरोधः ॥ २ ॥

wild elephant

कौन रोकेगा शक्तिशाली राजा और कहाँ है ?

तत्कुत्र गच्छामि मन्दभाग्यः । (विलोक्य) इदं कस्यापि साधोरनावृत-पक्षद्वारं गेहम् ।

no bolt

unlocked bolt(s)

इदं गृहं भिन्नमदत्तदण्डो विशीर्णसंधिश्च महाकपाटः ।
ध्रुवं कुटुम्बी व्यसनाभिभूतां दशां प्रपन्नो मम तुल्यभाग्यः ॥ ३ ॥
तदत्र तावत्प्रविश्य तिष्ठामि ।

(नेपथ्ये) जाध गोणा जाध । [यातं गावौ यातम् ।]

आर्यकः—(आकर्ण्य) अये प्रवहणमित एवाभिवर्तते ।

Oh, I was indeed, after being brought from the hamlet, bound down with a chain in the secret dungeon for being killed, by King Pālaka, on account of the fright caused by the [prophecy of the] sooth-sayer. And from that prison I slipped away through the favour of [my] dear friend Śarvilaka. (*Shedding tears*)

If [good] fortune [is] mine, then what [was] my fault that I was bound down by him, like a wild elephant? The accomplishment too [of a desired object by] divine [agency] is again not possible to withstand [or, transgress]. Inaccessible [is] the king; what [possible] opposition [can there be] to a powerful person? (2)

So, where shall I go, luckless that I am? (*Looking*) Here [is] the house with the side-door open, of some good man!

This house [is all] dilapidated; [its] huge panel of the gate has no bolt fastened [to it] and is shattered at the joints. Surely [this] householder of equal fortune to that of myself, has attained to a state overcome with calamity! (3)

So, entering just here, I shall stay on.

(*Behind the curtain*) Move on, bullocks, move on.

Āryaka :—(*Listening*) Ah! The car is coming up just here!

---

१ शक्या गम्यो । २ भिन्न[illegible]र्गलं ।

most commodious covered car

अगर [illegible] चलने वाले हैं

पूरा [illegible] हैं तो भागना [illegible]

भवेद्गोष्ठीयानं न च विषमशीलैरधिगतं
वधूसंयानं वा तदभिगमनोपस्थितमिदम्। वधू को ले जाने के लिए हो और हो खाली
बहिर्नेतव्यं वा प्रवरजनयोग्यं विधिवशा- उच्च कुल के योग्य
द्विविक्तत्वाच्छून्यं मम खलु भवेद्दैवविहितम् ॥ ४ ॥

(ततः प्रवहणेन सह प्रविश्य)

वर्धमानकश्चेटः—हीमाणहे। आणीदे मए जाणत्थलके। लदणिए णिवेदेहि अज्जआए वशन्तशेणाए—अवत्थिदे शज्जे पवहणे अहिलुहिअ पुप्फकलण्डअं जिण्णुज्जाणं गच्छदु अज्जआ। [आश्चर्यम्। आनीतं मया यानास्तरणम्। रदनिके निवेदयार्यायै वसन्तसेनायै—अवस्थितं सज्जं प्रवहणमधिरुह्य पुष्पकरण्डकं जीर्णोद्यानं गच्छत्वार्या।] ६

आर्यकः—(आकर्ण्य) गणिकाप्रवहणमिदम्। बहिर्यानं च। भवतु। अधिरोहामि। (इति स्वैरमुपसर्पति)

चेटः—(श्रुत्वा) कधं णेउलशद्दे। ता आअदा क्खु अज्जआ। अज्जए ९ इमे णश्शालज्जुकडुआ बइल्ला। ता पिट्ठदो ज्जेव आलुहदु अज्जआ। [कथं नूपुरशब्दः। तदागता खल्वार्या। आर्ये इमौ नासिकारज्जुकटुकौ बलीवर्दौ। तत्पृष्ठत एवारोहत्वार्या।]
(आर्यकस्तथा करोति) १२

belonging to [illegible]

Would it be a public car, but not occupied by [people of] unbalanced [or, questionable] character? Or, this a bride's vehicle coming to take her away? Or, one to be taken outside, fit for high-class gentry, through the stroke of fortune? Or, could it be indeed for me, ordained by fate, unoccupied, owing to its being unattended? (4)

(*Then entering with the car*) **Vardhamānaka Ceṭa**:—Ha! Ha! I have brought the car-cushions. Radanikā, inform her ladyship Vasantasenā—'Mounting the car got ready and stationed here, let Madam proceed to the old garden Puṣpakaraṇḍaka.'

Āryaka:—(*Listening*) This [is] a courtesan's car! And a car going outside! Well, I shall mount [it]. [*Approaches slowly*

Ceṭa:—(*Hearing*) What, the noise of the anklets! Then Madam has indeed come! Madam, these [two] bullocks are fiery [-tempered] requiring the use of the nose-string! So, let Madam mount just from behind! [*Aryaka does accordingly*

चेटः—पादुप्फालचालिदाणं णेउलाणं वीशन्तो शद्दो। भलक्कन्ते पवहणे। तधा तक्केमि शंपदं अज्जआए आलूढाए होदव्वम्। ता गच्छामि १५ जाध गोणा जाध। [पादोत्फालचालितानां नूपुराणां विश्रान्तः शब्दः। भाराक्रान्तं च प्रवहणम्। तथा तर्कयामि सांप्रतमार्ययारूढया भवितव्यम्। तद्गच्छामि। यातं गावौ यातम्।]

(इति परिक्रामति)

१८ (प्रविश्य) **वीरकः**—अरे रे अरे जअ-जअमाण-चन्दणअ-मङ्गल-फुल्लभद्दप्पमुहा

किं अच्छध वीसद्धा जो सो गोवालदारओ बद्धो।
भेत्तूण समं वच्चइ णरवइहिअअं अ बन्धणं चावि ॥ ५ ॥

अले पुरत्थिमे पदोलीदुआरे चिट्ठ तुमम्। तुमं पि पच्छिमे तुमं पि दक्खिणे तुमं पि उत्तरे। जो वि एसो पाआरखण्डो एदं अहिरुहिअ चन्दणेण समं गदुअ ३ अवलोएमि। एहि चन्दणअ एहि। इदो दाव। [अरे रे अरे जय-जयमान-चन्दनक-मङ्गल-पुष्पभद्रप्रमुखाः

किं स्थ[1] विश्रब्धा यः स गोपालदारको बद्धः।
६ भित्त्वा समं व्रजति नरपतिहृदयं च बन्धनं चापि ॥

अरे पुरस्तात्प्रतोलीद्वारे तिष्ठ त्वम्। त्वमपि पश्चिमे त्वमपि दक्षिणे त्वमप्युत्तरे। योऽप्येष प्राकारखण्डः एतमाधिरुह्य चन्दनेन समं गत्वावलोकयामि। एहि चन्दनक एहि। ९ इतस्तावत्।]

Ceṭa :—The noise of the anklets set in motion by the rapid movement of the feet, has ceased; the car too has become loaded with a burden; So, I infer Madam must have by now mounted up. So, I shall go. Move on, bullocks, move on. [*Moves about*

(*Entering*) **Vīraka** :—Oh, you, you Jaya, Jayamāna, Candanaka, Maṅgala, Puṣpabhadra and others!

Why are you standing unconcerned? That cow-herd-boy who was imprisoned—he has escaped, breaking simultaneously the king's heart as also [his] chains [or, prison]! (5)

Oh, stand you at the Eastern main road gate! And you at the Western, you too at the Southern, you too at the Northern. And this portion of the rampart here—ascending this, and going there along with Candanaka, I shall be looking up. Come, Candanaka, come. Just this way.

---

[1] ग[illegible]।

(प्रविश्य संभ्रान्तः) चन्दनकः—अरे रे वीरअ-विसल्ल-भीमङ्गअ-दण्ड-कालअ दण्डसूर-प्पमुहा

आअच्छध वीसत्था तुरिअं जत्तेह लहुं करेज्जाह ।
लच्छी जेण ण रण्णो पहवइ गोत्तन्तरं गन्तुम् ॥ ६ ॥

अवि अ

उज्जाणेसु सहासु अ मग्गे णअरीअ आवणे घोसे ।
तं तं जोहह तुरिअं सङ्का वा जाअए जत्थ ॥ ७ ॥
रे रे वीरअ किं किं दरिसेसि भणाहि दाव वीसद्धम् ।
भेत्तूण अ बन्धणअं को सो गोवालदारअं हरइ ॥ ८ ॥
कस्सट्ठमो दिणअरो कस्स चउत्थो अ वट्टए चन्दो ।
छट्ठो अ भग्गवगहो भूमिसुओ पञ्चमो कस्स ॥ ९ ॥
भण कस्स जम्मछट्ठो जीवो णवमो तहेअ सूरसुओ ।
जीअन्ते चन्दणए को सो गोवालदारअं हरइ ॥ १० ॥

[अरे रे वीरक-विशल्य-भीमाङ्गद-दण्डकालक-दण्डशूरप्रमुखाः

(*Entering in excitement*) **Candanaka** :—Oh, you foremost among whom are Vīraka, Viśalya, Bhīmāṅgada, Daṇḍakālaka [and] Daṇḍaśūra !

Come on without fear [or, hesitation]; get things going quickly, make haste, so that Royal Glory would not be able to pass on to another dynasty ! (6)

And further,

In the gardens, in assemblies, on the roads, in the city, in the market-place and in hamlets, quickly search on every body (*tam tam*) or where [any] suspicion is aroused ! (7)

Oh, you Vīraka, what [and] what are you pointing out to me ? You may speak without hesitation—who [is] he [that] is carrying off the cowherd-boy after breaking through the prison ? (8)

[In] whose [horoscope] [is] the sun [in] the eighth [mansion]? And whose is the Moon the fourth, and the planet Venus the sixth, [and] Mars [the son of the Earth] the fifth ? (9)

Tell [me] whose [is] Jupiter sixth from the birth mansion, and like-wise too Saturn, the ninth ? When Candanaka is alive, who [is] he [who] would carry off the cow-herd-boy ? (10)

ढोंगा करके

आगच्छत विश्वस्तास्त्वरितं यतध्वं लघु कुरुत ।
लक्ष्मीर्येन न राज्ञः प्रभवति गोत्रान्तरं गन्तुम् ॥
अपि च उद्यानेषु सभासु च मार्गे नगर्यामापणे घोषे ।
तं तमन्वेषयत त्वरितं शङ्का वा जायते यत्र ॥
रे रे वीरक किं किं दर्शयासि भण तावद्विश्रब्धम् ।
भित्त्वा च बन्धनकं कः स गोपालदारकं हरति ॥
कस्याष्टमो दिनकरः कस्य चतुर्थश्च वर्तते चन्द्रः ।
षष्ठश्च भार्गवग्रहो भूमिसुतः पञ्चमः कस्य ॥
भण कस्य जन्मषष्ठो जीवो नवमस्तथैव सूरसुतः ।
जीवति चन्दनके कः स गोपालदारकं हरति ॥]

शुक्र

गुरु

The Son of the Sun.

Author is acquainted with Astrology. knowledge of Astrology.

वीरकः—भड चन्दणआ

अवहरइ कोवि तुरिअं चन्दणअ सवामि तुज्झ हिअएण ।
जह अद्धुइददिणअरे गोवालअदारओ खुडिदो ॥ ११ ॥

[भट चन्दनक

अपहरति कोऽपि त्वरितं चन्दनक शपे तव हृदयेन ।
यथार्धोदितदिनकरे गोपालकदारकः खुटितः ।]

चेटः—जाध गोणा जाध । [यातं गावौ यातम् ।]

चन्दनकः—(दृष्ट्वा) अरे रे पेक्ख पेक्ख ।

ओहारिओ पवहणो वच्चइ मज्झेण राअमग्गस्स ।
एदं दाव विआरह कस्स कहिं पवासिओ पवहणो त्ति ॥ १२ ॥

[अरे रे पश्य पश्य ।

अपवारितं प्रवहणं व्रजाति मध्येन राजमार्गस्य ।
एतत्तावद्विचारय कस्य कुत्र प्रोषितं प्रवहणमिति ॥]

Viraka :—Soldier [or, Captain] Candanaka !

Somebody is quickly carrying him away ; Candanaka, I swear by your heart, for [that] cowherd-boy broke loose when the sun had half risen. (11)

Ceṭa :—Move on, bullocks, move on.

Candanaka :—(*Seeing*) Aye, you ! See, see—

A closed car is passing along the middle of the king's highway. Just investigate this, whose [and] where, the car is being sent. (12)

वीरकः—(अवलोक्य) अरे पवहणवाहआ मा दाव एवं पवहणं वाहेहि। कस्सकेरकं एदं पवहणम्। को वा इध आरूढो। कहिं वा वज्जइ। [अरे प्रवहणवाहक मा तावदेतत्प्रवहणं वाहय। कस्यैतत्प्रवहणम्। को वा इहारूढः। कुत्र वा व्रजति।]

चेटः—एशे क्खु पवहणे अज्जचालुदत्ताहकेलके। इध अज्जआ वशन्तशेणा आलूढा। पुप्फकरण्डअं जिण्णुज्जाणं कीलिदुं चालुदत्तश्श णीअदि। [एतत्खलु प्रवहणमार्यचारुदत्तस्य। इहार्या वसन्तसेनारूढा। पुष्पकरण्डकं जीर्णोद्यानं क्रीडितुं चारुदत्तस्य नीयते।]

वीरकः—(चन्दनकमुपसृत्य) एसो पवहणवाहओ भणादि—अज्जचारुदत्तस्स पवहणम्। वसन्तशेणा आलूढा। पुप्फकरण्डअं जिण्णुज्जाणं णीअदि त्ति। [एष प्रवहणवाहको भणाति—आर्यचारुदत्तस्य प्रवहणम्। वसन्तसेनारूढा। पुष्पकरण्डकं जीर्णोद्यानं नीयते इति।]

चन्दनकः—ता गच्छदु। [तद्गच्छतु।]

वीरकः—अणवलोइदो ज्जेव। [अनवलोकित एव।]

चन्दनकः—अध इं [अथ किम्।]

वीरकः—कस्स पच्चएण। [कस्य प्रत्ययेन।]

चन्दनकः—अज्जचारुदत्तस्स। [आर्यचारुदत्तस्य।]

Viraka :—(*Beholding*) O car-driver ! Do not just drive the car [further]. To whom does this car belong ? And who again [is] mounted [or, seated] here ? And where is [it] going ?

Ceṭa :—This [is] indeed the car of the noble Cārudatta : Lady Vasantasenā is seated up here ; [and she] is being taken to the old garden Puṣpakaraṇḍaka, to sport with Cārudatta.

Viraka :—(*Approaching* Candanaka) This car-driver says —'The car [is] noble Cārudatta's ; Vasantasenā [is] seated up ; [she] is being carried to the old garden Puṣpakaraṇḍaka.

Candanaka :—Then let it pass.

Viraka :—Without even being inspected ?

Candanaka :—Just so.

Viraka :—Trusting whom ?

Candanaka :—The noble Cārudatta.

वीरकः—को अज्जचारुदत्तो का वा वसन्तसेणा जेण अणवलोइदं वज्जइ । [क आर्यचारुदत्तः का वा वसन्तसेना येनानवलोकितं व्रजति ।]

चन्दनकः—अरे अज्जचारुदत्तं ण जाणासि ण वा वसन्तसेणिअम् । जइ अज्जचारुदत्तं वसन्तसेणिअं वा ण जाणासि ता गअणे जोण्हासहिदं चन्दं पि तुमं ण जाणासि ।

को तं गुणारविन्दं सीलमिअङ्कं जणो ण जाणादि ।
आवण्णदुक्खमोक्खं चउसाअरसारअं रअणम् ॥ १३ ॥
दो ज्जेव पूअणीआ इह णअरीए तिलअभूदा अ ।
अज्जा वसन्तसेणा धम्माणिही चारुदत्तो अ ॥ १४ ॥

[अरे आर्यचारुदत्तं न जानासि न वा वसन्तसेनाम् । यद्यार्यचारुदत्तं वसन्तसेनां वा न जानासि तदा गगने ज्योत्स्नासहितं चन्द्रमपि त्वं न जानासि ।

कमलके समान गुण चन्द्रके समान चरित वाले.

कस्तं गुणारविन्दं शीलमृगाङ्कं जनो न जानाति ।
आपन्नदुःखमोक्षं चतुःसागरसारं रत्नम् ॥ चारे समुद्रो के रत्न समान
द्वावेव पूजनीयाविह नगर्यां तिलकभूतौ च ।
आर्या वसन्तसेना धर्मनिधिश्चारुदत्तश्च ॥]

दुखियों का दुःख दूर करने वाले

repute

वीरकः—अरे चन्दणआ

Vīraka :—Who [is] the noble Cārudatta, or who, Vasantasenā either, that [the car] goes uninspected ?

Candanaka :—Oh, do you not know the noble Cārudatta, nor again Vasantasenā ? If you do not know the noble Cārudatta or Vasantasenā either, then you do not [as well] know even the moon along with the moon-light in the sky !

What person does not know him, with lotus-like virtues, moon-like character, [from whom comes] the relief of the grief of the distressed [and who is] the gem—the essence of the four oceans ! (13)

Only two [are] worthy of adoration and the ornament [that is, most distinguished] here in the city,—Lady Vasantasenā and Cārudatta, the treasure of piety [or, righteousness]. (14)

Vīraka :—O Candanaka,

जाणामि चारुदत्तं वसन्तसेणं अ सुट्ठु जाणामि ।
पत्ते अ राअकज्जे पिदरं पि अहं ण जाणामि ॥ १५ ॥

[अरे चन्दनक
जानामि चारुदत्तं वसन्तसेनां च सुट्ठु जानामि ।
प्राप्ते च राजकार्ये पितरमप्यहं न जानामि ॥] ३

आर्यकः—(स्वगतम्) अयं मे पूर्ववैरी । अयं मे पूर्वबन्धुः । यतः

एककार्यनियोगेऽपि नानयोस्तुल्यशीलता ।
विवाहे च चितायां च यथा हुतभुजोर्द्वयोः ॥ १६ ॥

चन्दनकः—तुमं तन्तिलो सेणावई रण्णो पच्चइदो । एदे धारिदा मए द्दा । अवलोएहि । [त्वं तन्त्रिलः सेनापती राज्ञः प्रत्ययितः । एतौ धारितौ मया वर्दौ । अवलोकय ।] ३

वीरकः—तुमं पि रण्णो पच्चइदो बलवई । ता तुमं ज्जेव अवलोएहि । [तमपि राज्ञः प्रत्ययितो बलपतिः । तस्मात्त्वमेवावलोकय ।]

चन्दनकः—मए अवलोइदं तुए अवलोइदं भोदि । [मयावलोकितं त्वयाव- ६ कितं भवति ।]

I know Cārudatta, and I know Vasantasenā [also] quite well. But when the King's business is in question, I know not even my [own] father ! (15)

Āryaka :—(*To himself*) This [Vīraka] [was surely] my enemy in last birth ; this [Candanaka] my friend in last birth ; for—

Even in regard to the office for the same business, there [is] no equal disposition of these two, like [that] of the two fires,—[one] at the wedding and [one] at the funeral pyre. (16)

Candanaka :—You [are] the administrative head, Police-Chief trusted by the King. Here are these bullocks held by me ; inspect [now].

Vīraka :—You also [are] the Captain [or, Colonel] of the Guards, trusted by the King. So, inspect you yourself.

Candanaka :—Would the inspection [carried out] by me be [as good as] an inspection by you ?

आगच्छत विश्वस्तास्त्वरितं यतध्वं लघु कुरुत।
लक्ष्मीर्येन न राज्ञः प्रभवति गोत्रान्तरं गन्तुम् ॥
अपि च उद्यानेषु सभासु च मार्गे नगर्यामापणे घोषे।
तं तमन्वेषयत त्वरितं शङ्का वा जायते यत्र॥
रे रे वीरक किं किं दर्शयासि भण तावद्विश्रब्धम्।
भित्त्वा च बन्धनकं कः स गोपालदारकं हरति॥
कस्याष्टमो दिनकरः कस्य चतुर्थश्च वर्तते चन्द्रः।
षष्ठश्च भार्गवग्रहो भूमिसुतः पञ्चमः कस्य॥
भण कस्य जन्मषष्ठो जीवो नवमस्तथैव सूरसुतः।
जीवति चन्दनके कः स गोपालदारकं हरति॥]

Author is acquainted with Astrology.
Knowledge of Astrology

शुक्र

गुरु

The Son of the Sun.

Picture of com
the escape
scene of a

वीरकः—भड चन्दणआ

अवहरइ कोवि तुरिअं चन्दणअ सवामि तुज्झ हिअएण।
जह अद्धुइददिणअरे गोवालअदारओ खुडिदो॥ ११॥

[भट चन्दनक

अपहरति कोऽपि त्वरितं चन्दनक शपे तव हृदयेन।
यथार्धोदितदिनकरे गोपालकदारकः खुटितः।]

चेटः—जाध गोणा जाध। [यातं गावौ यातम्।]

चन्दनकः—(दृष्ट्वा) अरे रे पेक्ख पेक्ख।

ओहारिओ पवहणो वच्चइ मज्झेण राअमग्गस्स।
एदं दाव विआरह कस्स कहिं पवसिओ पवहणो त्ति॥ १२॥

[अरे रे पश्य पश्य।

अपवारितं प्रवहणं व्रजति मध्येन राजमार्गस्य।
एतत्तावद्विचारय कस्य कुत्र प्रोषितं प्रवहणमिति॥]

Vīraka :—Soldier [or, Captain] Candanaka!

Somebody is quickly carrying him away; Candanaka, I swear by your heart, for [that] cowherd-boy broke loose when the sun had half risen. (11)

Ceṭa :—Move on, bullocks, move on.

Candanaka :—(*Seeing*) Aye, you! See, see—

A closed car is passing along the middle of the king's highway. Just investigate this, whose [and] where, the car is being sent. (12)

वीरकः—(अवलोक्य) अरे पवहणवाहआ मा दाव एवं पवहणं वाहेहि। कस्सकेरकं एदं पवहणम् । को वा इध आरूढो । कहिं वा वज्जइ । [अरे प्रवहणवाहक मा तावदेतत्प्रवहणं वाहय। कस्यैतत्प्रवहणम्। को वा इहारूढः। कुत्र वा व्रजाति ।]

चेटः—एशे क्खु पवहणे अज्जचालुदत्ताहकेलके । इध अज्जआ वशन्तशेणा आलूढा । पुप्फकरण्डअं जिण्णुज्जाणं कीलिदुं चालुदत्तश्श णीआदि। [एतत्खलु प्रवहणमार्यचारुदत्तस्य । इहार्या वसन्तसेनारूढा । पुष्पकरण्डकं जीर्णोद्यानं क्रीडितुं चारुदत्तस्य नीयते ।]

वीरकः—(चन्दनकमुपसृत्य) एसो पवहणवाहओ भणादि—अज्जचालुदत्तस्स पवहणम् । वसन्तशेणा आलूढा । पुप्फकरण्डअं जिण्णुज्जाणं णीअदि त्ति । [एष प्रवहणवाहको भणाति—आर्यचारुदत्तस्य प्रवहणम् । वसन्तसेनारूढा । पुष्पकरण्डकं जीर्णोद्यानं नीयते इति ।]

चन्दनकः—ता गच्छदु । [तद्गच्छतु।]

वीरकः—अणवलोइदो ज्जेव । [अनवलोकित एव।]

चन्दनकः—अध इं [अथ किम् ।]

वीरकः—कस्स पच्चएण । [कस्य प्रत्ययेन ।]

चन्दनकः—अज्जचारुदत्तस्स । [आर्यचारुदत्तस्य ।]

Viraka :—(*Beholding*) O car-driver ! Do not just drive the car [further]. To whom does this car belong ? And who again [is] mounted [or, seated] here ? And where is [it] going ?

Ceṭa :—This [is] indeed the car of the noble Cārudatta : Lady Vasantasenā is seated up here ; [and she] is being taken to the old garden Puṣpakaraṇḍaka, to sport with Cārudatta.

Vīraka :—(*Approaching* Candanaka) This car-driver says —'The car [is] noble Cārudatta's ; Vasantasenā [is] seated up ; [she] is being carried to the old garden Puṣpakaraṇḍaka.

Candanaka :—Then let it pass.

Vīraka :—Without even being inspected ?

Candanaka :—Just so.

Vīraka :—Trusting whom ?

Candanaka :—The noble Cārudatta.

वीरकः—को अज्जचारुदत्तो का वा वसन्तसेणा जेण अणवलोइदं वज्जइ । [क आर्यचारुदत्तः का वा वसन्तसेना येनानवलोकितं व्रजति ।]

चन्दनकः—अरे अज्जचारुदत्तं ण जाणासि ण वा वसन्तसेणिअम् । जइ अज्जचारुदत्तं वसन्तसेणिअं वा ण जाणासि ता गअणे जोण्हासहिदं चन्दं पि तुमं ण जाणासि ।

को तं गुणारविन्दं सीलमिअङ्कं जणो ण जाणादि ।
आवण्णदुक्खमोक्खं चउसाअरसारअं रअणम् ॥ १३ ॥
दो ज्जेव पूअणीआ इह णअरीए तिलअभूदा अ ।
अज्जा वसन्तसेणा धम्मणिही चारुदत्तो अ ॥ १४ ॥

[अरे आर्यचारुदत्तं न जानासि न वा वसन्तसेनाम् । यद्यार्यचारुदत्तं वसन्तसेनां वा न जानासि तदा गगने ज्योत्स्नासहितं चन्द्रमपि त्वं न जानासि ।

कमल के समान गुण, चन्द्र के समान चरित्र वाले.

कस्तं गुणारविन्दं शीलमृगाङ्कं जनो न जानाति ।
आपन्नदुःखमोक्षं चतुःसागरसारं रत्नम् ॥ चारे समुद्रों के रत्न के समान
द्वावेव पूजनीयाविह नगर्यां तिलकभूतौ च ।
आर्या वसन्तसेना धर्मनिधिश्चारुदत्तश्च ॥]

दुखियों का दुःख दूर करने वाले

वीरकः—अरे चन्दणआ

Vīraka :—Who [is] the noble Cārudatta, or who, Vasantasenā either, that [the car] goes uninspected ?

Candanaka :—Oh, do you not know the noble Cārudatta, nor again Vasantasenā ? If you do not know the noble Cārudatta or Vasantasenā either, then you do not [as well] know even the moon along with the moon-light in the sky !

What person does not know him, with lotus-like virtues, moon-like character, [from whom comes] the relief of the grief of the distressed [and who is] the gem—the essence of the four oceans ! (13)

Only two [are] worthy of adoration and the ornament [that is, most distinguished] here in the city,—Lady Vasantasenā and Cārudatta, the treasure of piety [or, righteousness]. (14)

Vīraka :—O Candanaka,

जाणामि चारुदत्तं वसन्तसेणं अ सुट्ठु जाणामि ।
पत्ते अ राअकज्जे पिदरं पि अहं ण जाणामि ॥ १५ ॥

[अरे चन्दनक

जानामि चारुदत्तं वसन्तसेनां च सुष्ठु जानामि ।
प्राप्ते च राजकार्ये पितरमप्यहं न जानामि ॥] ३

आर्यकः—(स्वगतम्) अयं मे पूर्ववैरी । अयं मे पूर्वबन्धुः । यतः

एककार्यनियोगेऽपि नानयोस्तुल्यशीलता ।
विवाहे च चितायां च यथा हुतभुजोर्द्वयोः ॥ १६ ॥

चन्दनकः—तुमं तन्तिलो सेणावई रण्णो पच्चइदो । एदे धारिदा मए बइल्ला । अवलोएहि । [त्वं तन्त्रिलः सेनापती राज्ञः प्रत्ययितः । एतौ धारितौ मया बलीवर्दौ । अवलोकय ।] ३

वीरकः—तुमं पि रण्णो पच्चइदो बलवई । ता तुमं ज्जेव अवलोएहि । [त्वमपि राज्ञः प्रत्ययितो बलपतिः । तस्मात्त्वमेवावलोकय ।]

चन्दनकः—मए अवलोइदं तुए अवलोइदं भोदि । [मयावलोकितं त्वयाव- ६ लोकितं भवति ।]

I know Cārudatta, and I know Vasantasenā [also] quite well. But when the King's business is in question, I know not even my [own] father ! (15)

Āryaka :—(*To himself*) This [Vīraka] [was surely] my enemy in last birth; this [Candanaka] my friend in last birth; for—

Even in regard to the office for the same business, there [is] no equal disposition of these two, like [that] of the two fires,—[one] at the wedding and [one] at the funeral pyre. (16)

Candanaka :—You [are] the administrative head, Police-Chief trusted by the King. Here are these bullocks held by me; inspect [now].

Viraka :—You also [are] the Captain [or, Colonel] of the guards, trusted by the King. So, inspect you yourself.

Candanaka :—Would the inspection [carried out] by me be [as good as] an inspection by you ?

वीरकः—जं तुए अवलोइदं तं रण्णा पालएण अवलोइदम् । [यत्त्वया-
ऽवलोकितं तद्राज्ञा पालकेनावलोकितम् ।]

चन्दनकः—अरे उण्णामेहि धुरम् । [अरे उन्नामय धुरम् ।]

(चेटस्तथा करोति)

१२ **आर्यकः**—(स्वगतम्) अपि रक्षिणो मामवलोकयन्ति । अशस्त्रश्चास्मि
मन्दभाग्यः । अथवा

संग्राम भीमस्यानुकरिष्यामि बाहुः शस्त्रं भविष्यति ।
वरं व्यायच्छतो मृत्युर्न गृहीतस्य बन्धने ॥ १७ ॥

अथवा साहसस्य तावदनवसरः ।

(चन्दनको नाट्येन प्रवहणमारुह्यावलोकयति)

आर्यकः—शरणागतोऽस्मि ।

चन्दनकः—(संस्कृतमाश्रित्य) अभयं शरणागतस्य ।

आर्यकः—

त्यजति किल तं जयश्रीर्जहति च मित्राणि बन्धुवर्गश्च ।
भवति च सदोपहास्यो यः खलु शरणागतं त्यजति ॥ १८ ॥

Vīraka :—An inspection by you [would be] an inspection by King Pālaka [himself] !

Candanaka :—Oh, raise up the yoke ! [Ceṭa *does accordingly*

Āryaka :—(*To himself*) Would the guards find me out? I am again without a weapon, luckless that I am ! Or rather,

I shall act like Bhīma ; [my] arm would be the weapon ; better death while fighting, but not in a prison when captured ! (17)

Or rather, [this is] not just [the proper] time for a rash act.

[Candanaka, *gesticulating mounting the car, beholds*

Āryaka :—I approach [you] for protection !

Candanaka :—(*Resorting to Sanskrit*) [I promise] safety to one approaching for protection !

Āryaka :—

The goddess of victory indeed deserts him, friends and kinsmen likewise give [him] up, and he becomes a constant object of ridicule [lit. fit to be ridiculed], who indeed deserts one approaching for protection ! (18)

चन्दनकः—कधं अज्जओ गोवालदारओ सेणवित्तासिदो विअ पत्तरहो साउणिअस्स हत्थे णिवडिदो । (विचिन्त्य) एसो अणवराधो सरणाअदो अज्जचारुदत्तस्स पवहणं आरूढो पाणप्पदस्स मे अज्जसव्विलअस्स मित्तम् । अण्णदो राआणिओओ । ता किं दाणिं एत्थ जुत्तं अणुचिट्ठिदुम् । अधवा जं भोदु तं भोदु । पढमं ज्जेव अभअं दिण्णम् ।

भीदाभअप्पदाणं दत्तस्स परोवआररासिअस्स ।
जइ होइ होउ णासो तहवि हु लोए गुणो ज्जेव ॥ १९ ॥

(सभयमवतीर्य) दिट्ठो अज्जो–(इत्यर्धोक्ते) ण अज्जआ वसन्तसेणा । तदो एसा भणादि—जुत्तं णेदम् सरिसं णेदम् जं अहं अज्जचारुदत्तं अहिसारिदुं गच्छन्ती राअमग्गे परिभूदा । [कथमार्यको गोपालदारकः श्येनवित्रासित इव पत्ररथः शाकुनिकस्य हस्ते निपतितः ।...एषोऽनपराधः शरणागत आर्यचारुदत्तस्य प्रवहणमारूढः प्राणप्रदस्य म आर्यशर्विलकस्य मित्रम् । अन्यतो राजनियोगः । तत्किमिदानीमत्र युक्तमनुष्ठातुम् । अथवा यद्भवतु तद्भवतु । प्रथममेवाभयं दत्तम् ।

भीताभयप्रदानं ददतः परोपकाररसिकस्य । अर्थान्तरन्यासः
यदि भवति भवतु नाशस्तथापि खलु लोके गुण एव ॥

Candanaka :—What ! Āryaka, the cow-herd-boy, like a bird harassed by a hawk, has fallen in the hands of a fowler ! (*Thinking*) He [is] innocent, has approached [me] for protection, got into the car of the noble Cārudatta, [and] is the friend of the noble Śarvilaka who saved my life [lit. my life-giver]; on the other hand [there is] the King's office [that is, my duty as a King's officer]. So, what [is] now proper to do here ? Or, let whatever is to happen, happen. I have already promised [him] safety.

If there be ruin [or, destruction], let it be in the case of one who has granted safety [or, freedom from fear] to one who is afraid, and who is genuinely devoted to obliging others ; all the same [it would be considered] a merit itself, verily, in the world ! (19)

(*Alighting in fear*) I have seen the noble one, him— (*Leaving it half-said*) no, her ladyship Vasantasenā. Well, she says—'This [is] not proper, this [is] not becoming, that I should

...दृष्ट आर्यः—...न आर्या वसन्तसेना। तदेषा भणाति—युक्तं नेदम् सदृशं नेदम् यदहमार्यचारुदत्तमभिसर्तुं गच्छन्ती राजमार्गे परिभूता।]

वीरकः—चन्दणआ एत्थ मह संसओ समुप्पण्णो। [चन्दनक अत्र मे संशयः समुत्पन्नः।]

चन्दनकः—कधं दे संसओ। [कथं ते संशयः।]

वीरकः—

संभमघग्घरकण्ठो तुमं पि जादो सि जं तुए भणिदम्।
दिट्ठो मए क्खु अज्जो पुणो वि अज्जा वसन्तसेणोत्ति ॥ २०॥

एत्थ मे अप्पच्चओ। [संभ्रमघर्घरकण्ठस्त्वमपि जातोऽसि यत्त्वया भणितम्।
दृष्टो मया खल्वार्यः पुनरप्यार्या वसन्तसेनेति ॥
अत्र मेऽप्रत्ययः।]

चन्दनकः—अरे को अप्पच्चओ तुह। वअं दक्खिणत्ता अव्वत्तभासिणो। खस-खत्ति-खडो-खडट्टोविलअ-कण्णाट-कण्ण-प्पावरणअ-दविड-चोल-चीण-बब्बर-खेर-खान-मुख-मधुघादपहुदाणं मिलिच्छजादीणं अणेअदेसभासाभिण्णा जहेट्ठं मन्तआम दिट्ठो दिट्ठा वा अज्जो अज्जआ वा। [अरे कोऽप्रत्ययस्तव। वयं दाक्षिणात्या अव्यक्तभाषिणः। खष-खत्ति-कड-कडट्टोबिल-कर्णाट-कर्ण-प्रावरण-द्रविड-चोल-चीन-बर्बर-खेर-खान-मुख-मधुघातप्रभृतीनां म्लेच्छजातीनामनेकदेशभाषाभिज्ञा यथेष्टं मन्त्रयामः दृष्टो दृष्टा वा आर्य आर्या वा।]

be humiliated on the king's high way, while going of my own accord to meet the noble Cārudatta.'

Vīraka :—Candanaka, [some] suspicion has arisen [in] my [mind] here!

Candanaka :—How a suspicion [in] your [mind]?

Vīraka :—You again had become one with a throat producing hoarse sound owing to excitement, when you said 'I have surely seen the noble one, him' and again 'Her ladyship Vasantasenā.' (20)

Herein [lies] my disbelief.

Candanaka :—Oh, what [this] disbelief of yours! We southerners [are] not very accurate [or, distinct] talkers. We conversant as we are with the dialects of many countries, of the Mleccha tribes, such as Khaṣa, Khatti, Kaḍa, Kaḍaṭṭobila, Karṇāṭa, Karṇa, Prāvaraṇa, Draviḍa, Cola, Cīna, Barbara, Khera, Khāna, Mukha, Madhughāta, speak out at our will 'Āryaḥ dṛṣṭaḥ or dṛṣṭā; Ārya dṛṣṭaḥ or dṛṣṭā.'

---

१ न्विदम्।

वीरकः—णं अहं पि पलोएमि। राअअण्णा एसा। अहं रण्णो पच्चइदो। [नन्वहमपि प्रलोकयाामि। राजाज्ञैषा। अहं राज्ञः प्रत्ययितः।]

चन्दनकः—ता किं अहं अप्पच्चइदो संवुत्तो। [तत्किमहमप्रत्यायितः संवृत्तः।]

वीरकः—णं सामिणिओओ। [ननु स्वामिनियोगः।]

चन्दनकः—(स्वगतम्) अज्जगोवालदारओ अज्जचारुदत्तस्स पवहणं अहिरुहिअ अवक्कमदि त्ति जइ कहिज्जादि तदो अज्जचारुदत्तो रण्णा सासिज्जइ। ता को एत्थ उवाओ। (विचिन्त्य) कण्णाटकलहप्पओअं करेमि। (प्रकाशम्) अरे वीरअ मए चन्दणकेण पलोइदं पुणो वि तुमं पलोएसि। को तुमम्। [आर्यगोपालदारक आर्यचारुदत्तस्य प्रवहणमधिरुह्यापक्रामतीति यदि कथ्यते तदार्यचारुदत्तो राज्ञा शास्यते। तत्कोऽत्रोपायः। ... कर्णाटकलहप्रयोगं करोमि। ...अरे वीरक मया चन्दनकेन प्रलोकितं पुनरपि त्वं प्रलोकयसि। कस्त्वम्।]

वीरकः—अरे तुमं पि को। [अरे त्वमपि कः।]

चन्दनकः—पूइज्जन्तो माणिज्जन्तो तुमं अप्पणो जादिं ण सुमरेसि। [पूज्यमानो मान्यमानस्त्वमात्मनो जातिं न स्मरसि।]

वीरकः—(सक्रोधम्) अरे का मह जादी। [अरे का मम जातिः।]

चन्दनकः—को भणउ। [को भणतु।]

Vīraka :—I say, I also shall inspect [it]. Such [is] the king's order. I am trusted by the king [or, I have the king's confidence].

Candanaka :—Then, what, have I become untrustworthy ?

Vīraka :—I say, [it is] the king's order.

Candanaka :—(*To himself*) If it is let known that the noble cow-herd-boy escaped by getting into the car of the noble Cārudatta, then the noble Cārudatta would be punished by the king. So, what [is] the remedy here ? (*Thinking*) I shall stage a quarrel as in the Karṇāṭa [country]. (*Aloud*) O Vīraka, you [desire to] inspect again what has been [already] inspected by me, Candanaka ! Who [are] you ?

Vīraka :—Oh, who [are] you too ?

Candanaka :—Adorable, respectable [that] you [are, you] do not remember your own lineage ?

Vīraka :—(*With wrath*) Oh, what [is] my lineage ?

Candanaka :—Who could speak out ?

वीरकः—भणउ । [भणतु ।]

चन्दनकः—अहवा ण भणामि ।

जाणन्तो वि हु जादिं तुज्झ अ ण भणामि सीलविहवेण ।
चिट्ठउ मह च्चिअ मणे किं च कइत्थेण भग्गेण ॥ २१ ॥

[अथवा न भणामि ।

जानन्नपि खलु जातिं तव च न भणामि शीलविभवेन ।
तिष्ठतु ममैव मनसि किं च कपित्थेन भग्नेन ॥

वीरकः—णं भणउ भणउ। [ननु भणतु भणतु।] (चन्दनकः संज्ञां ददाति)

वीरकः—अरे किं ण्णेदम् । [अरे किं न्विदम् ।]

चन्दनकः—

सिण्णसिलाअलहत्थो पुरिसाणं कुच्चगण्ठसंठवणो ।
कत्तरिवावुदहत्थो तुमं पि सेणावई जादो ॥ २२ ॥

[शीर्णशिलातलहस्तः पुरुषाणां कूर्चग्रन्थिसंस्थापनः ।
कर्तरीव्यापृतहस्तस्त्वमपि सेनापतिर्जातः ॥]

वीरकः—अरे चन्दणआ तुमं पि माणिज्जन्तो अप्पणोकेरिकं जादिं ण सुमरेसि । [अरे चन्दनक त्वमपि मान्यमान आत्मनो जातिं न स्मरसि ।]

Vīraka :—Speak out.

Candanaka :—Or rather, I shall not speak out.

Although knowing indeed about your lineage, I shall no speak out owing to [my] glorious character [lit. glory o character]. Let it stay in my mind alone ; what [is the use of breaking a Kapittha fruit ? (21

Vīraka :—I say, speak out, speak out.

[Candanaka *makes signs* (*suggestive of* Vīraka's *lineage*)

Vīraka :—Oh, what possibly [is] this ?

Candanaka :—

With [your] hand [working] on a broken slab-piece, arranging the knotted hair [or, beards] of men, and the han busy with the pair of scissors, you again have [now] becom a Captain ! (22

Vīraka :—O Candanaka, you too, [so] adorable, do no remember your own lineage ?

चन्दनकः—अरे का मह चन्दणअस्स चन्दविसुद्धस्स जादी। [अरे का मम चन्दनकस्य चन्द्रविशुद्धस्य जातिः।]

वीरकः—को भणउ। [को भणतु।]

चन्दनकः—भणउ भणउ। [भणतु भणतु।] (वीरको नाट्येन संज्ञां ददाति)

चन्दनकः—अरे किं ण्णेदम्। [अरे किं न्विदम्।]

वीरकः—अरे सुणाहि सुणाहि।

जादी तुज्झ विसुद्धा मादा भेरी पिदा वि दे पडहो।
दुम्मुह करडअभादा तुमं पि सेणावई जादो॥ २३॥

[अरे शृणु शृणु।

जातिस्तव विशुद्धा माता भेरी पितापि ते पटहः।
दुर्मुख करटकभ्राता त्वमपि सेनापतिर्जातः॥]

चन्दनकः—(सक्रोधम्) अहं चन्दणओ चम्मारओ। ता पलोएहि पवहणम्। [अहं चन्दनकश्चर्मकारः। तत्प्रलोकय प्रवहणम्।]

वीरकः—अरे पवहणवाहआ पडिवत्तावेहि पवहणम्। पलोइस्सम्। [अरे प्रवहणवाहक परिवर्तय प्रवहणम्। प्रलोकयिष्यामि।]

Candanaka :—Oh, what [is] the lineage of me, Candanaka, pure as the moon ?

Viraka :—Who could speak out ?

Candanaka :—Speak out, speak out.

[Viraka *gesticulates making signs*

Candanaka :—Oh, what possibly [is] this ?

Viraka :—Oh, listen, listen.

Your lineage [is] pure [indeed] ! Mother a kettle-drum, father too a tabor ! [O] ill-faced one, you too with a crow [or, some musical instrument] for your brother, have [now] become a Captain ! (23)।

Candanaka :—(*With wrath*) I, Candanaka, a shoe-maker Well, inspect the car.

Viraka :—O car-driver, turn round the car. I am going to inspect [it].

वीरकः—भणउ । [भणतु ।]

चन्दनकः—अहवा ण भणामि ।

जाणन्तो वि हु जादिं तुज्झ अ ण भणामि सीलविहवेण ।
चिट्ठउ मह च्चिअ मणे किं च कइत्थेण भग्गेण ॥ २१ ॥

[अथवा न भणामि ।

जानन्नपि खलु जातिं तव च न भणामि शीलविभवेन ।
तिष्ठतु ममैव मनसि किं च कपित्थेन भग्नेन ॥

वीरकः—णं भणउ भणउ। [ननु भणतु भणतु।] (चन्दनकः संज्ञां ददाति)

वीरकः—अरे किं ण्णेदम् । [अरे किं न्विदम् ।]

चन्दनकः—

सिण्णसिलाअलहत्थो पुरिसाणं कुच्चगण्ठसंठवणो ।
कत्तरिवावुदहत्थो तुमं पि सेणावई जादो ॥ २२ ॥

[शीर्णशिलातलहस्तः पुरुषाणां कूर्चग्रन्थिसंस्थापनः ।
कर्तरीव्यापृतहस्तस्त्वमपि सेनापतिर्जातः ॥]

वीरकः—अरे चन्दणआ तुमं पि माणिज्जन्तो अप्पणोकेरिकं जादिं ण सुमरेसि । [अरे चन्दनक त्वमपि मान्यमान आत्मनो जातिं न स्मरसि ।]

Vīraka :—Speak out.

Candanaka :—Or rather, I shall not speak out.

Although knowing indeed about your lineage, I shall not speak out owing to [my] glorious character [lit. glory of character]. Let it stay in my mind alone ; what [is the use] of breaking a Kapittha fruit ? (21)

Vīraka :—I say, speak out, speak out.

[Candanaka *makes signs* (*suggestive of* Vīraka's *lineage*)

Vīraka :—Oh, what possibly [is] this ?

Candanaka :—

With [your] hand [working] on a broken slab-piece, arranging the knotted hair [or, beards] of men, and the hand busy with the pair of scissors, you again have [now] become a Captain ! (22)

Vīraka :—O Candanaka, you too, [so] adorable, do not remember your own lineage ?

चन्दनकः—अरे का मह चन्दणअस्स चन्दविसुद्धस्स जादी। [अरे का मम चन्दनकस्य चन्द्रविशुद्धस्य जातिः ।]

वीरकः—को भणउ। [को भणतु ।]

चन्दनकः—भणउ भणउ । [भणतु भणतु ।] (वीरको नाट्येन संज्ञां ददाति)

चन्दनकः—अरे किं ण्णेदम्। [अरे किं न्विदम् ।]

वीरकः—अरे सुणाहि सुणाहि ।

जादी तुज्झ विसुद्धा मादा भेरी पिदा वि दे पडहो।
दुम्मुह करडअभादा तुमं पि सेणावई जादो ॥ २३ ॥

[अरे शृणु शृणु ।

जातिस्तव विशुद्धा माता भेरी पितापि ते पटहः ।
दुर्मुख करटकभ्राता त्वमपि सेनापतिर्जातः ॥]

चन्दनकः—(सक्रोधम्) अहं चन्दणओ चम्मारओ। ता पलोएहि पवहणम्। [अहं चन्दनकश्चर्मकारः । तत्प्रलोकय प्रवहणम् ।]

वीरकः—अरे पवहणवाहआ पडिवत्तावेहि पवहणम्। पलोइस्सम्। [अरे प्रवहणवाहक परिवर्तय प्रवहणम् । प्रलोकयिष्यामि ।]

Candanaka :—Oh, what [is] the lineage of me, Candanaka, pure as the moon ?

Viraka :—Who could speak out ?

Candanaka :—Speak out, speak out.

[Viraka *gesticulates making signs*

Candanaka :—Oh, what possibly [is] this ?

Viraka :—Oh, listen, listen.

Your lineage [is] pure [indeed] ! Mother a kettle-drum, father too a tabor ! [O] ill-faced one, you too with a crow [or, some musical instrument] for your brother, have [now] become a Captain ! (23)

Candanaka :—(*With wrath*) I, Candanaka, a shoe-maker Well, inspect the car.

Viraka :—O car-driver, turn round the car. I am going to inspect [it].

(चेटस्तथा करोति । वीरकः प्रवहणमारोढुमिच्छति । चन्दनकः सहसा केशेषु गृहीत्वा पातयति पादेन ताडयति च)

वीरकः—(सक्रोधमुत्थाय) अरे अहं तुए वीसत्थो राआणात्तिं करेन्तो सहसा केसेसु गेण्हिअ पादेन ताडिदो । ता सुणु रे अहिअरणमज्झे जइ दे चउरङ्गं ण कप्पावेमि तदो ण होमि वीरओ । [अरे अहं त्वया विश्वस्तो राजाज्ञप्तिं कुर्वन्सहसा केशेषु गृहीत्वा पादेन ताडितः । तच्छृणु रे अधिकरणमध्ये यदि ते चतुरङ्गं न कल्पयामि तदा न भवामि वीरकः ।]

चन्दनकः—अरे राअउलं अहिअरणं वा वच्च । किं तुए सुणअसरिसेण । [अरे राजकुलमधिकरणं वा व्रज । किं त्वया शुनकसदृशेन ।]

वीरकः—तह । [तथा ।] (इति निष्क्रान्तः)

चन्दनकः—(दिशोऽवलोक्य) गच्छ रे पवहणवाहआ गच्छ । जइ को वि पुच्छेदि तदो भणेसि—चन्दणअवीरएहिं अवलोइदं पवहणं वच्चइ । अज्जे वसन्तसेणे इमं च अहिण्णाणं दे देमि । [गच्छ रे प्रवहणवाहक गच्छ । यदि कोऽपि पृच्छति तदा भण—चन्दनकवीरकाभ्यामवलोकितं प्रवहणं व्रजति । आर्ये वसन्तसेने इदं चाभिज्ञानं ते ददामि ।] (इति खड्गं प्रयच्छति)

आर्यकः—(खड्गं गृहीत्वा सहर्षमात्मगतम्)

[Ceṭa *does accordingly.* Vīraka *is on the point of mounting the car.* Candanaka *suddenly grasping him by the hair, fells him down and kicks him*

Vīraka :—(*Rising up, in anger*) Oh, I, the trusted [officer] while carrying out the king's order have been kicked by you, being suddenly seized by the hair ! So, listen you ! If I do not dissect you in four parts in the court of law, then I would not be Vīraka [any longer] !

Candanaka :—Oh, go to king's palace or to the court of law. What [have I to do] with you resembling a dog ?

Vīraka :—All right. [*Exit*

Candanaka :—(*Looking in all quarters*) Go you car-driver, go. If anybody asks, then say—'The car inspected by Candanaka and Vīraka is allowed to pass [lit. passes].' Lady Vasantasenā, I shall give you this memento. [*Gives his sword*

Āryaka :—(*Taking the sword, with joy, to himself*)

अये शस्त्रं मया प्राप्तं स्पन्दते दक्षिणो भुजः ।
अनुकूलं च सकलं हन्त संरक्षितो ह्यहम् ॥ २४ ॥

चन्दनकः—अज्जए

एत्थ मए विण्णविदा पच्चइदा चन्दणं पि सुमरेसि ।
ण भणामि एस लुद्धो णेहस्स रसेण बोल्लामो ॥ २५ ॥
आर्ये अत्र मया विज्ञप्ता प्रत्यायिता चन्दनमपि स्मरसि ।
न भणाम्येष लुब्धः स्नेहस्य रसेन ब्रूमः ॥]

किसी लालच से नहीं केवल
प्रेमवश कह रहा हूँ।

आर्यकः—चन्दनश्चन्द्रशीलाढ्यो दैवादद्य सुहृन्मम ।
चन्दनं भोः स्मरिष्यामि सिद्धादेशस्तथा यदि ॥ २६ ॥

चन्दनकः—अभअं तुह देउ हरो विण्हू बम्हा रवी अ चन्दो अ ।
हत्तूण सत्तुवक्खं सुम्भणिसुम्भे जधा देवी ॥ २७ ॥

[अभयं तव ददातु हरो विष्णुर्ब्रह्मा रविश्च चन्द्रश्च ।
हत्वा शत्रुपक्षं शुम्भनिशुम्भौ यथा देवी ॥] (चेटः प्रवहणेन निष्क्रान्तः)

Ah ! I have secured a weapon ! [My] right arm is throbbing ! Everything again [has turned out to be] favourable Oh joy ! I have indeed been quite saved ! (24)

Candanaka :—Madam,

Now [I hope] you, requested [by me] and convinced of [my] trustworthiness would be remembering Candanaka too. Here I do not say this, being greedy ; we say [so] out of [pure] sentiment of love. (25)

Āryaka :—

Candana rich in moon-like character [has become] my friend to-day, by [good] luck. Oh, I shall remember Candana, if the prophecy of the sooth-sayer [proves to be] true. (26)

Candanaka :—

May Hara, Viṣṇu, Brahmā, the Sun [and] the Moon grant you freedom from fear, killing the enemy-side like Goddess [Pārvatī] on killing Śumbha and Niśumbha. (27)

[*Exit* Ceṭa *with the car*

चन्दनकः—(नेपथ्याभिमुखमवलोक्य) अरे णिक्कमन्तस्स मे पिअवअस्सो सव्विलओ पिट्ठदो ज्जेव अणुलग्गो गदो। भोदु। पधाणदण्डधारओ वीरओ राअपच्चअआरो विरोहिदो। ता जाव अहंपि पुत्तभादुपाडिवुदो एदं ज्जेव अणुगच्छामि। [अरे निष्क्रमतो मम प्रियवयस्यः शर्विलकः पृष्ठत एवानुलग्नो गतः। भवतु। प्रधानदण्डधारको वीरको राजप्रत्ययकारो विरोधितः। तद्यावदहमपि पुत्रभ्रातृपरिवृत एतमेवानुगच्छामि।]

(इति निष्क्रान्तः)

इति प्रवहणविपर्ययो नाम षष्ठोऽङ्कः।

Candanaka:—(*Looking towards the curtain*) Oh, my dear friend Śarvilaka has gone, following close on the heels of [Āryaka] who has left off. Well. Vīraka, the Chief of the Police [and] trusted official of the king, has been antagonised [by me]. So, I too, along with [lit. surrounded by] sons and brothers would be following him [Śarvilaka] alone. [*Exit*

Here ends the Sixth Act called 'Pravahaṇaviparyaya'

[*The Interchange of the Cars*]

सप्तमोऽङ्कः

(ततः प्रविशति चारुदत्तो विदूषकश्च)

विदूषकः—भो पेक्ख पेक्ख पुप्फकरण्डअजिण्णुज्जाणस्स सस्सिरीदाम्। [भोः पश्य पश्य पुष्पकरण्डकजीर्णोद्यानस्य सश्रीकताम्।]

चारुदत्तः—वयस्य एवमेतत्। तथाहि

बिकने वाली वस्तुएं

वणिज इव भान्ति तरवः पण्यानीव स्थितानि कुसुमानि।
शुल्कमिव साधयन्तो मधुकरपुरुषाः प्रविचरन्ति ॥ १ ॥ भ्रमर टैक्स ले रहे हैं।

विदूषकः—भो इमं असक्काररमणीअं सिलाअलं उवविसदु भवम्। [भोः संस्काररमणीयं शिलातलमुपविशतु भवान्।]

चारुदत्तः—(उपविश्य) वयस्य चिरयति वर्धमानकः।

विदूषकः—भणिदो मए वड्ढमाणओ—वसन्तसेणिअं गेण्हिअ लहुं लहुं ाअच्छत्ति। [भणितो मया वर्धमानकः—वसन्तसेनां गृहीत्वा लघु लघ्वागच्छ इति।]

चारुदत्तः—तत्किं चिरयति।

ACT VII

(*Then enter* Cārudatta *and* Vidūṣaka)

Vidūṣaka :—Oh, see, see the loveliness of the Puṣpakaraṇḍaka ld garden !

Cārudatta :—Friend, it [is] so. Thus—

The trees appear to be the merchants, the flowers as though the articles for sale arranged ; men in the form of bees are moving about collecting as though the toll. (1)

Vidūṣaka :—Oh, may you sit down on this slab of stone harming without [any artificial] embellishment.

Cārudatta :—(*Sitting down*) Friend, Vardhamānaka is tarrying !

Vidūṣaka :—I told Vardhamānaka—'Taking Vasantasenā [with you] come very quickly.'

Cārudatta :—Then, why is he late ?

आगे धीरे जाने वाले वाहन से रास्ता मांगता है

किं यात्यस्य पुरः शनैः प्रवहणं तस्यान्तरं मार्गते
भग्नेऽक्षे परिवर्तनं प्रकुरुते छिन्नोऽथ वा प्रग्रहः ।
[1]कर्मान्तोज्झितदारुवारितगतिर्मार्गान्तरं याचते
स्वैरं प्रेरितगोयुगः किमथवा स्वच्छन्दमागच्छति ॥ २ ॥

लगाम टूट गई है

धीरे धीरे आ रहा है

कान बनने के बाद बची
कड़ी से रास्ता रुका है।
दूसरा लम्बा रास्ता लेना
पड़ा है।

(प्रविश्य गुप्तार्यकप्रवहणस्थः) चेटः—जाध गोणा जाध । [यातं गावौ यातम् ।]

आर्यकः—(स्वगतम्)

नरपतिपुरुषाणां दर्शनाद्भीतभीतः
सनिगडचरणत्वात्सावशेषापसारः ।
अविदितमधिरूढो यामि साधोस्तु याने
परभृत इव नीडे रक्षितो वायसीभिः ॥ ३ ॥

अहो नगरात्सुदूरमपक्रान्तोऽस्मि । तत्किमस्मात्प्रवहणादवतीर्य वृक्षवाटिकागहनं प्रविशामि । उताहो प्रवहणस्वामिनं पश्यामि । अथ वा कृतं वृक्षवाटिकागहनेन ।

[Is it that] a carriage is passing slowly in his front [and] he is waiting for room to pass it? [Or,] the axle being broken, he is effecting a change [of the axle ; or, he is reeling about]? Or again, have the reins been broken? Or, with [his] course stopped by [logs etc. of] wood left over on the completion of the [building] work, is he waiting for room being made on the road [for him to pass, or, is he seeking another round about road]? Or, is he just coming up unconcernedly [or, at will], slowly [or, leisurely] urging on the pair of bulls? (2)

(*Entering, seated in the car with* Āryaka *concealed therein*)

Ceṭa :—Move on, bulls, move on.

Āryaka :—(*To himself*)

Repeatedly frightened at the sight of the king's officers, with [my] escape not [quite] complete [lit. having something remaining] owing to my foot being in fetters, I am, however, journeying on, mounted on the vehicle of the good man, unknown, like a cuckoo reared up in the nest by the female crows! (3)

Oh, I have come a long way off from the city! Then shall I, alighting from this car, enter into the thicket of the grove of trees? Or, shall I see the owner of the car? Or, away with [the idea of entering into] the thicket of the grove of trees! His honour, the noble Cārudatta is indeed reported to be

---

[1] ...वर्मान्तो ।

अभ्युपपन्नवत्सलः खलु तत्रभवानार्यचारुदत्तः श्रूयते। तत्प्रत्यक्षीकृत्य गच्छामि।

स तावदस्माद्व्यसनो[1]र्णवोत्थितं निरीक्ष्य साधुः समुपैति निर्वृतिम्।
शरीरमेतद्गतमीदृशीं दशां धृतं मया तस्य महात्मनो गुणैः॥ ४॥

चेटः—इमं तं उज्जाणम्। जाव उवशप्पामि। (उपसृत्य) अज्जमि-तेअ। [इदं तदुद्यानम्। यावदुपसर्पामि...आर्यमैत्रेय।]

विदूषकः—भो पिअं दे णिवेदेमि। वड्ढमाणओ मन्तेदि। आगदाए वसन्तसेणाए होदव्वम्। [भोः प्रियं ते निवेदयामि। वर्धमानको मन्त्रयते। आगतया वसन्तसेनया भवितव्यम्।]

चारुदत्तः—प्रियं नः प्रियम्।

विदूषकः—दासीए पुत्ता किं चिरइदो सि। [दास्याःपुत्र किं चिरायितोऽसि।]

चेटः—अज्जमित्तेअ मा कुप्प। जाणत्थलके विशुमलिदे त्ति कदुअ गदागदिं कलेन्ते चिलइदेम्हि। [आर्यमैत्रेय मा कुप्य। यानास्तरणं विस्मृतमिति कृत्वा गतागतिं कुर्वंश्चिरायितोऽस्मि।]

चारुदत्तः—वर्धमानक परिवर्तय प्रवहणम्। सखे मैत्रेय अवतारय वसन्तसेनाम्।

very kind [lit. affectionate] towards those who approach him [for shelter]. So, having seen [him] with my own eyes, I shall go.

That good man indeed, on seeing [me] risen up from the ocean of this [recent] calamity, would feel greatly relieved [or, gratified]. Owing to the virtues of that high-souled one, has been saved [lit. held] by me this body reduced to such a [wretched] state ! (4)

Ceṭa :—This [is] that garden. I shall [now] approach. (*Approaching*) Noble Maitreya !

Vidūṣaka :—Oh, I am communicating to you something very agreeable. Vardhamānaka is speaking. Vasantasenā must have arrived !

Cārudatta :—Very agreeable to me, very agreeable.

Vidūṣaka :—Son of a whore, why have you been late ?

Ceṭa :—Noble Maitreya, do not be angry. Finding that the car-cushions were forgotten, I was late, doing the going and coming [required to bring them].

Cārudatta :—Vardhamānaka, turn round the car. Friend Maitreya, assist [lit. make] Vasantasenā to alight.

---

[1] ...सनान्नवोत्थितं।

आगे धीरे जाने वाले वाहन से रस्ता मांगता है

किं यात्यस्य पुरः शनैः प्रवहणं तस्यान्तरं मार्गते
भग्नेऽक्षे परिवर्तनं प्रकुरुते छिन्नोऽथ वा प्रग्रहः । लगाम टूट गई है
कर्मान्तोज्झितदारुवारितगतिर्मार्गान्तरं याचते[1]
स्वैरं प्रेरितगोयुगः किमथवा स्वच्छन्दमागच्छति ॥ २ ॥ और धीरे आ रहा है

मकान बनने के बाद बची लकड़ी से रास्ता रुका है। दूसरे लम्बा रास्ता लम्बा पड़ा है.

(प्रविश्य गुप्तार्यकप्रवहणस्थः) चेटः—जाध गोणा जाध । [यातं गावौ यातम् ।]

आर्यकः—(स्वगतम्)

नरपतिपुरुषाणां दर्शनाद्भीतभीतः
सनिगडचरणत्वात्सावशेषापसारः ।
अविदितमधिरूढो यामि साधोस्तु याने
परभृत इव नीडे रक्षितो वायसीभिः ॥ ३ ॥

अहो नगरात्सुदूरमपक्रान्तोऽस्मि । तत्किमस्मात्प्रवहणादवतीर्य वृक्षवाटिकागहनं प्रविशामि । उताहो प्रवहणस्वामिनं पश्यामि । अथ वा कृतं वृक्षवाटिकागहनेन ।

[Is it that] a carriage is passing slowly in his front [and] he is waiting for room to pass it? [Or,] the axle being broken, he is effecting a change [of the axle ; or, he is reeling about]? Or again, have the reins been broken? Or, with [his] course stopped by [logs etc. of] wood left over on the completion of the [building] work, is he waiting for room being made on the road [for him to pass, or, is he seeking another round about road]? Or, is he just coming up unconcernedly [or, at will], slowly [or, leisurely] urging on the pair of bulls? (2)

(*Entering, seated in the car with* Āryaka *concealed therein*)

Ceṭa :—Move on, bulls, move on.

Āryaka :—(*To himself*)

Repeatedly frightened at the sight of the king's officers, with [my] escape not [quite] complete [lit. having something remaining] owing to my foot being in fetters, I am, however, journeying on, mounted on the vehicle of the good man, unknown, like a cuckoo reared up in the nest by the female crows! (3)

Oh, I have come a long way off from the city! Then shall I, alighting from this car, enter into the thicket of the grove of trees? Or, shall I see the owner of the car? Or, away with [the idea of entering into] the thicket of the grove of trees! His honour, the noble Cārudatta is indeed reported to be

---

[1] ...वर्मान्तो।

अभ्युपपन्नवत्सलः खलु तत्रभवानार्यचारुदत्तः श्रूयते। तत्प्रत्यक्षीकृत्य गच्छामि ।

स तावदस्माद्व्यसना[1]र्णवोत्थितं निरीक्ष्य साधुः समुपैति निर्वृतिम्।
शरीरमेतद्गतमीदृशीं दशां धृतं मया तस्य महात्मनो गुणैः॥ ४ ॥

चेटः—इमं तं उज्जाणम् । जाव उवशप्पामि । (उपसृत्य) अज्जमित्तेअ । [इदं तदुद्यानम् । यावदुपसर्पामि...आर्यमैत्रेय ।]

विदूषकः—भो पिअं दे णिवेदेमि । वड्ढमाणओ मन्तेदि । आगदाए वसन्तसेणाए होदव्वम् । [भोः प्रियं ते निवेदयामि । वर्धमानको मन्त्रयते । आगतया वसन्तसेनया भवितव्यम् ।]

चारुदत्तः—प्रियं नः प्रियम् ।

विदूषकः—दासीए पुत्ता किं चिरइदो सि। [दास्याःपुत्र किं चिरायितोऽसि।]

चेटः—अज्जमित्तेअ मा कुप्प । जाणत्थलके विशुमलिदे त्ति कदुअ गदागदिं कलेन्ते चिलइदेम्हि । [आर्यमैत्रेय मा कुप्य । यानास्तरणं विस्मृतमिति कृत्वा गतागतिं कुर्वंश्चिरायितोऽस्मि ।]

चारुदत्तः—वर्धमानक परिवर्तय प्रवहणम् । सखे मैत्रेय अवतारय वसन्तसेनाम् ।

---

very kind [lit. affectionate] towards those who approach him [for shelter]. So, having seen [him] with my own eyes, I shall go.

That good man indeed, on seeing [me] risen up from the ocean of this [recent] calamity, would feel greatly relieved [or, gratified]. Owing to the virtues of that high-souled one, has been saved [lit. held] by me this body reduced to such a [wretched] state ! (4)

Ceṭa :—This [is] that garden. I shall [now] approach. (*Approaching*) Noble Maitreya !

Vidūṣaka :—Oh, I am communicating to you something very agreeable. Vardhamānaka is speaking. Vasantasenā must have arrived !

Cārudatta :—Very agreeable to me, very agreeable.

Vidūṣaka :—Son of a whore, why have you been late ?

Ceṭa :—Noble Maitreya, do not be angry. Finding that the car-cushions were forgotten, I was late, doing the going and coming [required to bring them].

Cārudatta :—Vardhamānaka, turn round the car. Friend Maitreya, assist [lit. make] Vasantasenā to alight.

---

[1] ...सनान्नवोत्थितं ।

विदूषकः—किं णिअडेण बद्धा से गोड्डा जेण सअं ण ओदरेदि। (उत्थाय प्रवहणमुद्घाट्य) भो ण वसन्तसेणा वसन्तसेणो क्खु एसो। [किं निग-
१५ डेन बद्धावस्याः पादौ येन स्वयं नावतरति।...भोः न वसन्तसेना वसन्तसेनः खल्वेषः।]

चारुदत्तः—वयस्य अलं परिहासेन। न कालमपेक्षते स्नेहः। अथवा स्वयमेवावतारयामि।

(इत्युत्तिष्ठति)

१८ **आर्यकः**—(दृष्ट्वा) अये अयमेव प्रवहणस्वामी। न केवलं श्रुतिरमणीयो दृष्टिरमणीयोऽपि। हन्त रक्षितोऽस्मि।

चारुदत्तः—(प्रवहणमधिरुह्य दृष्ट्वा च) अये तत्कोऽयम्

करिकरसमबाहुः सिंहपीनोन्नतांसः
पृथुतरसमवक्षास्ताम्रलोलायताक्षः।
कथमिदमसमानं प्राप्त एवंविधो यो
वहति निगडमेकं पादलग्नं महात्मा॥ ५॥

ततः को भवान्।

आर्यकः—शरणागतो गोपालप्रकृतिरार्यकोऽस्मि।

Vidūṣaka :—Are her feet bound down by chains, that she can not get down herself ? (*Rising up, opening the car*) Oh, no Vasantasenā ; [here is] indeed a Mr. Vasantasena.

Cārudatta :—Friend, away with joking ! Affection brooks not delay. Or rather, I shall myself make [her] alight. [*Rises up*

Āryaka :—(*Seeing*) Oh, this one himself [is] the owner of the car. He is not merely charming to hear about, but charming to look at as well. Oh joy ! I am saved !

Cārudatta :—(*Mounting the car, and seeing*) Oh, then who [is] this one,

possessed of arms like the elephant's trunk, shoulders full and raised up like [those of] a lion, a very expansive and even chest, eyes reddish, tremulous and long,—how could such a high-souled person come to [suffer] this unmerited [state or humiliation] that he carries one fetter clinging to [his] foot ! (5)

Well, who [are] you ?

Āryaka :—I am Āryaka, born of Gopāla [or as a cowherd], approaching [you] for protection !

चारुदत्तः—किं घोषादानीय योऽसौ राज्ञा पालकेन बद्धः। 3

आर्यकः—अथ किम्।

चारुदत्तः—

विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः।
अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ॥६॥

(आर्यको हर्षं नाटयति)

चारुदत्तः—वर्धमानक चरणान्निगडमपनय।

चेटः—जं अज्जो आणवेदि (तथा कृत्वा) अज्ज अवणीदाइं णिगलाइं। ३ [यदार्य आज्ञापयति।...आर्य अपनीतानि निगडानि।]

आर्यकः—स्नेहमयान्यन्यानि दृढतराणि दत्तानि।

विदूषकः—संगच्छेहि णिअडाइं। एसो वि मुक्को। संपदं अम्हे वच्चिस्सामो। ६ [संगच्छस्व निगडानि। एषोऽपि मुक्तः। सांप्रतं वयं व्रजिष्यामः।]

चारुदत्तः—धिक्शान्तम्।

आर्यकः—सखे चारुदत्त अहमपि प्रणयेनेदं प्रवहणमारूढः। तत्क्षन्तव्यम्। ९

Cārudatta :—What, the one who was bound down by King Pālaka, after taking him away from the hamlet?

Āryaka :—Just so.

Cārudatta :—

You have come within the range of [my] eyes, having been brought near [me] by fate itself; I shall abandon even my life, but not you who have approached [me] for protection! (6)

[Āryaka *gesticulates joy*

Cārudatta :—Vardhamānaka, remove the fetter from [his] foot.

Ceṭa :—As the noble one commands. (*Doing accordingly*) Sir, removed are the fetters.

Āryaka :—[But] other and stronger ones, constituted of love, have been put on!

Vidūṣaka :—Be associated with fetters! This one again has been set free. Now let us go.

Cārudatta :—Fie! Peace!

Āryaka :—Friend Cārudatta, I too mounted this car out of high regard [for you]; so, please excuse.

चारुदत्तः—अलंकृतोऽस्मि स्वयंग्राहप्रणयेन भवता ।

आर्यकः—अभ्यनुज्ञातो भवता गन्तुमिच्छामि ।

चारुदत्तः—गम्यताम् ।

आर्यकः—भवतु अवतरामि ।

चारुदत्तः—सखे नावतरितव्यम् । प्रत्यग्रापनीतसंयमनस्य भवतोऽलघुसंचारा गतिः । सुलभपुरुषसंचारेऽस्मिन्प्रदेशे प्रवहणं विश्वासमुत्पादयति । तत्प्रवहणेनैव गम्यताम् ।

आर्यकः—यथाह भवान् ।

चारुदत्तः—क्षेमेण व्रज बान्धवान्

आर्यकः—ननु मया लब्धो भवान्बान्धवः

चारुदत्तः—स्मर्तव्योऽस्मि कथान्तरेषु भवता

आर्यकः—स्वात्मापि विस्मर्यते ।

चारुदत्तः—त्वां रक्षन्तु पथि प्रयान्तममराः

आर्यकः—संरक्षितोऽहं त्वया

in form of questions & answers

Cārudatta :—I am [really] adorned by you with [this] voluntary regard [shown by you].

Āryaka :—Permitted by you, I wish to go.

Cārudatta :—You may go.

Āryaka :—All right. I shall alight.

Cārudatta :—Friend, you must not get down. Your gait would be a heavily restrained one, owing to the fetters being [only] recently removed. In this locality where people can move about freely, a car [again] would be creating confidence [that is, would not give rise to any suspicion]. So, [better] go by the car itself.

Concern for the safety of Aryaka

Āryaka :—As you say.

Cārudatta :—Safely repair to [your] kinsmen.

Āryaka :—Surely I have secured a kinsman in *you* !

Cārudatta :—I should be remembered by you in the course of conversations !

Āryaka :—Can one's own self be forgotten ?

Cārudatta .—May the gods protect you proceeding along the road !

Āryaka :—I have been [already] well protected by you !

---

१ संचारा ।

चारुदत्तः—स्वैर्भाग्यैः परिरक्षितोऽसि megnanimity / Poetical with fine sentiments

आर्यकः—
ननु हे तत्रापि हेतुर्भवान् ॥ ७ ॥

चारुदत्तः—यदुद्यते पालके महती रक्षा न वर्तते तच्छीघ्रमपक्रामतु भवान्।

आर्यकः—एवं पुनर्दर्शनाय। (इति निष्क्रान्तः)

चारुदत्तः—

कृत्वैवं मनुजपतेर्महद्व्यलीकं स्थातुं हि क्षणमपि न प्रशस्तमस्मिन्।
मैत्रेय क्षिप निगडं पुराणकूपे पश्येयुः क्षितिपतयो हि चारदृष्ट्या ॥ ८ ॥

(वामाक्षिस्पन्दनं सूचयित्वा) सखे मैत्रेय वसन्तसेनादर्शनोत्सुकोऽयं जनः। पश्य

अपश्यतोऽद्य तां कान्तां वामं स्फुरति लोचनम्।
अकारणपरित्रस्तं हृदयं व्यथते मम ॥ ९ ॥

तदेहि। गच्छावः। (परिक्रम्य) कथमभिमुखमनाभ्युदयिकं श्रमणकदर्शनम्। (विचार्य) प्रविशत्वयमनेन पथा। वयमप्यनेनैव पथा गच्छामः। (निष्क्रान्तः)

इति आर्यकापहरणं नाम सप्तमोऽङ्कः।

Cārudatta :—You have been protected all round by your own good fortune !

Aryaka :—There too, surely, you [are] the cause, Oh ! (7)

Cārudatta :—Before a strict watch is initiated, when Pālaka gets going, may you depart [from here] quickly.

Āryaka :—Right ! Au Revoir ! [*Exit*

Cārudatta :—

It [is] not advisable to stay here even for a moment, after having committed thus a great crime against the king. Maitreya, throw the fetter in the old well. For, kings could see with the eyes of the spies. (8)

(*Indicating the throbbing of the left eye*) Friend Maitreya, I [lit. this person, am] eager for the sight of Vasantasenā. See—

[My] left eye is throbbing, not having seen that beloved today; my heart quite uneasy without [any] cause is feeling distressed [all round]. (9)

So, come; let us go. (*Moving about*) What, [there is] the sight of a Buddhist monk, in front, productive of misery ! (*Thinking*) Let him enter by this path; we, on our part, would depart by this [other] path itself. [*Exit*

Here ends the Seventh Act called ' Āryakāpaharaṇa '

[Āryaka's Escape]

Introduction [illegible] of (Buddhist monk)

अष्टमोऽङ्कः।

(ततः प्रविशत्यार्द्रचीवरहस्तो भिक्षुः)

भिक्षुः--अंशा[1] कलेध धम्मशंचअम्।

शंजम्मध णिअपोटं णिच्चं जग्गेध झाणपडहेण।
विशमा इन्दिअचोला हलन्ति चिलशंचिदं धम्मम्॥ १॥

अवि अ अणिच्चदाए पेक्खिअ णवलं दाव धम्माणं शलणम्हि।

पञ्चज्जण जेण मालिदा इत्थिअ मालिअ गाम लक्खिदे।
अबंल[2] क चण्डाल मालिदे अवसं वि शे णले शग्ग गाहदि॥२॥
शिल मुण्डिदे तुण्ड मुण्डिदे चित्त ण मुण्डिदे कीश मुण्डिदे।
जाह उण अ चित्त ण मुण्डिदे शाहु शुट्ठु शिल ताह मुण्डिदे॥३॥

गिहिदकशाओदए एशे चीवले जाव एदं लट्ठिअशालक्काहकेलके उज्जाणे पविशिअ पोक्खलिणीए पक्खालिअ लहुं लहुं अवक्कमिश्शम्। [अज्ञाः कुरुत धर्मसंचयम्।]

ACT VIII

(*Then enter* Bhikṣu *with a wet rag in his hands*) ¦

Bhikṣu :—[O] fools, make a store of Dharma [piety].

Control well your belly; keep awake constantly by the drum of meditation; the dangerous thieves in the form of the sense-organs carry off long-stored Dharma [piety]. (1)

And further, observing [everything in its true colours] owing to [its] transitory nature, I just go to religious acts only for protection.

That man undoubtedly enters heaven, by whom are killed the five men [sense-organs], is saved the town [the body], after killing the woman [Āvidyā]—where is [then to be] killed the helpless Cāṇḍāla [Ahaṁkāra] ? (2)

Head [is] shaved, face shaved; but [if] the mind [is] not shaved, for what purpose is the shaving gone through ? But, the head of that [man] is well shaved, whose mind again is properly shaved ! (3)

This tattered garment [of mine has been] dipped in reddish-coloured water; just entering the garden of the king's brother-

---

१ अज्जा। २ अचले अ चण्डाल।

संयच्छत निजोदरं नित्यं जागृत ध्यानपटहेन ।
विषमा इन्द्रियचौरा हरन्ति चिरसंचितं धर्मम् ॥

अपि च । अनित्यतया प्रेक्ष्य केवलं तावद्धर्माणां शरणमस्मि ।
पञ्चजना येन मारिताः स्त्रियं मारयित्वा ग्रामो रक्षितः ।
अबलः क्व चण्डालो मारितोऽवश्यमपि स नरः स्वर्गं गाहते ॥
शिरो मुण्डितं तुण्डं मुण्डितं चित्तं न मुण्डितं किमर्थं मुण्डितम् ।
यस्य पुनश्च चित्तं मुण्डितं साधु सुष्ठु शिरस्तस्य मुण्डितम् ॥

गृहीतकषायोदकमेतच्चीवरम् यावदेतद्राष्ट्रियश्यालकस्योद्याने प्रविश्य पुष्करिण्यां प्रक्षाल्य लघु लघ्वपक्रमिष्यामि ।] (परिक्रम्य तथा करोति)

(नेपथ्ये) चिट्ठ ले दुट्ठशमणका चिट्ठ। [तिष्ठ रे दुष्टश्रमणक तिष्ठ ।]

भिक्षुः—(दृष्ट्वा सभयम्) ही अविद माणहे । एशे शे लाअशालशंठाणए आअदे । एक्केण भिक्खुणा अवलाहे किदे अण्णं पि जहिं जहिं भिक्खुं पेक्खदि तहिं तहिं गोणं विअ णाशं विन्धिअ ओवाहेदि । ता कहिं अशलणे शलणं गमिश्शम् । अधवा भट्टालके ज्जेव बुद्धे मे शलणे । [हा कष्टम् । एष स राजश्यालसंस्थानक आगतः । एकेन भिक्षुणापराधे कृतेऽन्यमपि यत्र यत्र भिक्षुं पश्यति तत्र तत्र गामिव नासिकां विद्ध्वापवाहयति । तत्कुत्राशरणः शरणं गमिष्यामि । अथवा भट्टारक एव बुद्धो मे शरणम् ।]

(प्रविश्य सखड्गेन विटेन सह) **शकारः**—चिट्ठ ले दुट्ठशमणका चिट्ठ । आवाणअमज्झपविट्ठश्श विअ लत्तमूलअश्श शीशं दे मोडइश्शम् । [तिष्ठ रे दुष्टश्रमणक तिष्ठ । आपानकमध्यप्रविष्टस्येव रक्तमूलकस्य शीर्षं ते भङ्क्ष्यामि ।] (इति ताडयति)

---

in-law and washing this in the lotus-tank, I shall depart very quickly. [*Moves about and does accordingly*

(*Behind the curtain*) Stay, you wicked monk, stay !

Bhikṣu :—(*Seeing, with fear*) Ha ! Alas ! Here is the king's brother-in-law Saṁsthānaka coming. Because [some] one monk committed [some] offence, wherever he sees any other monk, him he drives out therefrom, like a bull, after boring a hole through the nose. So, helpless that I am, where shall I go for protection ? Or, Lord Buddha himself [would be] my shelter !

(*Entering, with* Viṭa *with a sword*) **Śakāra** :—Stay, you wicked monk, stay ! I shall break your head, like [that] of a red radish ushered in the midst of a drinking party.

social
condit

---

१ आश्चर्यम् ।

विटः—काणेलीमातः न युक्तं निर्वेदधृतकषायं भिक्षुं ताडयितुम्। तत्किमनेन। इदं तावत्सुखोपगम्यमुद्यानं पश्यतु भवान्।

अशरणशरणप्रमोदभूतैर्वनतरुभिः क्रियमाणचारुकर्म।
हृदयमिव दुरात्मनामगुप्तं नवमिव राज्यमनिर्जितोपभोग्यम् ॥ ४ ॥

भिक्षुः—शाअदम्। पशीददु उवाशके। [स्वागतम्। प्रसीदतूपासकः।]

शकारः—भावे पेक्ख पेक्ख। आक्रोशदि मम्। [भाव पश्य पश्य। आक्रोशति माम्।]

विटः—किं ब्रवीति।

शकारः—उवाशके त्ति मं भणादि। किं हग्गे णाविदे। [उपासक इति मां भणति। किमहं नापितः।]

विटः—बुद्धोपासक इति भवन्तं स्तौति।

शकारः—थुणु शमणका थुणु। [स्तुहि श्रमणक स्तुहि।]

भिक्षुः—तुमं धण्णे तुमं पुण्णे। [त्वं धन्यः त्वं पुण्यः।]

Viṭa :—Son of Kāṇelī, [it is] not proper to beat a monk who has taken to red [garments], owing to dejection [or, despair]. So, why [worry] about him? May you just have a look at this garden which can be approached with pleasure.

[This garden has] charming deeds being done by the garden-trees which afford protection and joy to those without protection; [it is] unguarded [also, uncontrolled] like the heart of the wicked, and like a new [-ly won] kingdom, is fit to be enjoyed [being treated as though] unconquered [also, without restraint]. (4)

Bhikṣu :—Welcome! Be pleased, Upāsaka [Buddha-worshipper]!

Śakāra :—Bhāva, see, see. He is railing at me.

Viṭa :—What does he say?

Śakāra :—He calls me 'Uvāsaka' [a server]. [Am] I a barber?

Viṭa :—He praises you by saying '[You are] a Buddha-worshipper [or, disciple].'

Śakāra :—Praise [me], monk, praise [me].

Bhikṣu :—You [are] blessed, you [are] holy.

शकारः—भावे धण्णे पुण्णे त्ति मं भणादि । किं हग्गे शलावके कोश्टके कोम्भकाले वा । [भाव धन्यः पुण्य इति मां भणति । किमहं चार्वाकः . कोष्ठकः कुम्भकारो वा ।]

विटः—काणेलीमातः ननु धन्यस्त्वं पुण्यस्त्वम् इति भवन्तं स्तौति ।

शकारः—भावे ता कीश एशे इध आगदे । [भाव तत्किमर्थमेष इहागतः ।]

भिक्षुः—इदं चीवलं पक्खालिदुम् । [इदं चीवरं प्रक्षालयितुम् ।]

शकारः—अले दुट्ठशमणका एशे मम बहिणीवदिणा शव्वुज्जाणाणं पवले पुष्फकलण्डुज्जाणे दिण्णे जहिं दाव शुणहका शिआला पाणिअं पिअन्ति । हग्गे वि पवलपुलिशे मणुश्शके ण ण्हाआमि । तहिं तुमं पुक्खलिणीए पुलाणकुलुत्थजूशशवण्णाइं उग्गगन्धिआइं चीवलाइं पक्खालेशि । ता तुमं एक्कपहालिअं कलेमि । [अरे दुष्टश्रमणक एतन्मम भगिनीपतिना सर्वोद्यानानां प्रवरं पुष्पकरण्डोद्यानं दत्तम् यत्र तावच्छुनकाः शृगालाः पानीयं पिबन्ति । अहमपि प्रवरपुरुषो मनुष्यको न स्नामि । तत्र त्वं पुष्करिण्यां पुराणकुलित्थयूषसवर्णान्युग्रगन्धीनि चीवराणि प्रक्षालयसि । तत्त्वामेकप्रहारिकं करोमि ।]

Bewary feature of the play typical simily

विटः—काणेलीमातः तथा तर्कयामि यथानेनाचिरप्रव्राजितेन भवितव्यम्

शकारः—कधं भावे जाणादि । [कथं भावो जानाति ।]

Śakāra :—Bhāva, he calls me Dhaṇṇa Puṇṇa. [Am] I an earthen pot [or, a materialistic], a granary [or, brick-pond], or a potter ?

Viṭa :—Son of Kāṇelī, I say, he praises you by saying 'You [are] blessed, you [are] holy.'

Śakāra :—Bhāva, then for what purpose, has this one come here ?

Bhikṣu :—To wash this garment.

Śakāra :—O wicked monk, this Puṣpakaraṇḍaka [garden], the best of all gardens, has been presented to me by the husband of my sister, where again, dogs and jackals drink water; I too, a most excellent man, a human being, do not bathe [here]. [And] there you [dare to] wash in the lotus-pond tattered garments, resembling in colour very old Kulittha broth and stinking horribly ! So, I shall finish you with one blow !

Viṭa :—Son of Kāṇelī, I guess that he must have taken to renunciation [only] recently.

Śakāra :—How does Bhāva know ?

विटः—किमत्र ज्ञेयम् । पश्य

अद्याप्यस्य तथैव केशविरहाद्गौरी ललाटच्छविः
कालस्याल्पतया च चीवरकृतः स्कन्धे न जातः किणः ।
नाभ्यस्ता च कषायवस्त्ररचना दूरं निगूढान्तरं
वस्त्रान्तं च पटोच्छ्रयात्प्रशिथिलं स्कन्धे न संतिष्ठते ॥ ५ ॥

भिक्षुः—उवाशके एव्वम् । अचिलपव्वजिदे हग्गे । [उपासक एवम् । अचिरप्रव्रजितोऽहम् ।]

शकारः—ता कीश तुमं जातमेत्तक ज्जेव ण पव्वाजिदे । [तत्किमर्थं त्वं जातमात्र एव न प्रव्रजितः ।] (इति ताडयति)

भिक्षुः—णमो बुद्धश्श । [नमो बुद्धाय ।]

विटः—किमनेन ताडितेन तपस्विना । मुच्यताम् । गच्छतु ।

शकारः—अले चिट्ठ दाव जाव शंपधालेमि । [अरे तिष्ठ तावत् यावत्संप्रधारयामि ।]

विटः—केन सार्धम् ।

Viṭa :—What is to be known here? See—

Even now the colour of [his] forehead is, exactly as before, yellowish-white [even] with the absence of [that is, shaving off] the hair; owing to the time [elapsed] being short, there is no scar produced on [his] shoulder, caused by [the use of] the monk-garment; the get up of the reddish garments is again not [a sufficiently] practised one; and the end of the garment which has concealed the middle part far down and loose owing to the bagginess of the cloth, does not stay well on [his] shoulder! (5)

Bhikṣu :—Upāsaka, just so I have [only] recently taken to renunciation.

Śakāra :—Then, for what reason did you not take to renunciation the moment you were born? [*Beats him*

Bhikṣu :—A bow to Buddha!

Viṭa :—What [is the use] of beating this helpless [or, poor] fellow? Release [him], let [him] go.

Śakāra :—Aye, stay for a while, while I hold a consultation.

Viṭa :—With whom?

---

१ निगूढान्तरो वस्त्रान्तः शिथिलः

शकारः—अत्तणो हडक्केण। [आत्मनो हृदयेन।]

विटः—हन्त न गतः।

शकारः—पुत्तका हडक्का भट्टके पुत्तके एशे शमणके अवि णाम किं गच्छदु किं चिश्टदु। (स्वगतम्) णावि गच्छदु णावि चिश्टदु। (प्रकाशम्) भावे शंपधालिदं मए हडक्केण शह। एशे मह हडक्के भणादि। [पुत्रक हृदय भट्टारक पुत्रक एष श्रमणकोऽपि नाम किं गच्छतु किं तिष्ठतु।...नापि गच्छतु नापि तिष्ठतु।...भाव संप्रधारितं मया हृदयेन सह। एतन्मम हृदयं भणति।]

विटः—किं ब्रवीति।

शकारः—मावि गच्छदु मावि चिश्टदु। मावि ऊशशदु मावि णीशशदु। इध ज्जेव झत्ति पडिअ मलेदु। [मापि गच्छतु मापि तिष्ठतु। माप्युच्छ्वसितु मापि निश्वसितु। इहैव झटिति पतित्वा म्रियताम्।]

भिक्षुः—णमो बुद्धश्श। शलणागदेम्हि। [नमो बुद्धाय। शरणागतोऽस्मि।]

विटः—गच्छतु।

शकारः—णं शमएण। [ननु समयेन।]

विटः—कीदृशः समयः।

शकारः—तथा कद्दमं फेलदु जधा पाणिअं पङ्काइलं ण होदि। अधवा पाणिअं पुञ्जीकदुअ कद्दमे फेलदु। [तथा कर्दमं प्रक्षिपतु यथा पानीयं पङ्काविलं न भवति। अथवा पानीयं पुञ्जीकृत्य कर्दमे प्रक्षिपतु।]

Famous Joke

Śakāra :—With [my] own heart.

Viṭa :—Alas! He has not gone [or, is not going]!

Śakāra :—Darling, heart, lord, dear son! This monk again—should he indeed go, [or] should he stay? (*To himself*) Let [him] neither go, nor stay. (*Aloud*) Bhāva, I have held consultation with [my] heart. This [is what] my heart says—

Viṭa :—What does it speak out?

Śakāra :—Let [him] neither go nor stay! Let [him] neither breathe in, nor breathe out! Let [him] die in this very place, falling down suddenly!

Bhikṣu :—A bow to Buddha! I approach [you] for protection.

Viṭa :—Let [him] go.

Śakāra :—Surely, on a condition.

His hard heartedness

Viṭa :—What sort of condition?

Śakāra :—Let [him] throw about mud [in water] in such a way that the water would not become muddy [or, dirty with mud]; or, let him throw water, [after] making a heap of it, in the mud.

rough [illegible] him

what Vita thinks of [illegible] & nature of [illegible].

विटः—अहो मूर्खता ।

विपर्यस्तमनश्चेष्टैः शिलाशकलवर्ष्मभिः
मांसवृक्षैरियं मूर्खैर्भाराक्रान्ता वसुंधरा ॥ ६ ॥

(भिक्षुर्नाट्येनाक्रोशति)

शकारः—किं भणादि । [किं भणाति ।]

विटः—स्तौति भवन्तम् ।

शकारः—थुणु थुणु । पुणो वि थुणु । [स्तुहि स्तुहि । पुनरपि स्तुहि ।]

वसन्तसेना—हा अत्ते कहिं सि । हा अज्जचारुदत्त एसो जणो असंपुण्णमणोरधो ज्जेव विवज्जादि । ता उद्धं अक्कन्दइस्सम् । अधवा वसन्तसेणा उद्धं अक्कन्ददि त्ति लज्जणीअं क्खु एदम् । णमो अज्जचारुदत्तस्स । [हा मातः कुत्रासि । हा आर्यचारुदत्त एष जनोऽसंपूर्णमनोरथ एव विपद्यते । तदूर्ध्वमाक्रन्दयिष्यामि । अथवा वसन्तसेनोर्ध्वमाक्रन्दतीति लज्जनीयं खल्वेतत् । नम आर्यचारुदत्ताय ।]

शकारः—अज्जवि गब्भदाशी तश्श ज्जेव पावश्श णामं गेण्हदि । (इति कण्ठे पीडयन्) शुमल गब्भदाशि शुमल । [अद्यापि गर्भदासी तस्यैव पापस्य नाम गृह्णाति ।... स्मर गर्भदासि स्मर ।]

Śakāra :—

[Is] he, Śakra, [or] Vāli's son Mahendra, [or] Rambhā's son Kālanemi, [or] Subandhu, [or] King Rudra, [or] Droṇa's son Jaṭāyu, [or] Cāṇakya [or] Dhundhumāra, or Triśaṅku ? (34)

Or, even these cannot protect you!

As by Cāṇakya was killed Sītā in the Bhārata age, [even] so shall I crush you down, like Jaṭāyu, Draupadī. (35)

[*Becomes ready to strike*

Vasantasenā :—Alas ! Mother, where are you ? Alas ! Noble Cārudatta, this person is perishing, even with [her] desires not fulfilled ? Then, I shall shout out loudly ! Or, that Vasantasenā should be crying out loudly,—this [is] indeed fit to be ashamed of. A bow to the noble Cārudatta !

Śakāra :—Even now, the slave-by-birth is calling out [lit. taking] the name of that same sinful fellow ! (*Pressing her throat*) Remember, slave-by-birth, remember.

वसन्तसेना—णमो अज्जचारुदत्तस्स । [नम आर्यचारुदत्ताय ।]

शकारः—मल गब्भदाशि मल । [म्रियस्व गर्भदासि म्रियस्व ।] (नाट्येन कण्ठं निपीडयन्मारयति) (वसन्तसेना मूर्च्छिता निश्चेष्टा पतति)

शकारः—(सहर्षम्)

एदं दोशकलण्डिअं अविणअश्शावाशभूदं खलं
लत्तं तश्श किलागदश्श लमणे कालागदं आअदम् ।
किं एशे शमुदाहलामि णिअअं बाहूण शूलत्तणं
णीशाशे वि मलेइ अम्ब शुमला शीदा जधा भालदे ॥ ३६ ॥
इच्छन्तं मम णेच्छदि त्ति गणिआ लोशेण मे मालिदा
शुण्णे पुप्फकलण्डके त्ति शहशा पाशेण उत्ताशिदा ।
शेवावञ्चिद भादुके मम पिदा मादेव शा दोप्पदी
जे शो पेक्खदि णेदिशं ववशिदं पुत्ताह शूलत्तणम् ॥ ३७ ॥

भोदु । संपदं वुड्ढखोडे आगमिश्शदि त्ति । ता ओशलिअ चिश्टामि ।

Vasantasenā :—A bow to the noble Cārudatta.

Śakāra :—Die, slave-by-birth, die. [*Gesticulating strangling her, strikes her down* ; Vasantasenā, *fainting, falls down motionless*

Śakāra :—(*With joy*)

[I have killed] her, a casket of evil things, the abode of immodesty, wicked, who, deeply attached [to Cārudatta] had come to sport with him who is in a wretched state (*agata*), but who met [instead] death. But, why should I here proclaim [in so many words] the bravery of my own arms? Here [she] is dead, poor woman (*ambā*), well and truly dead, to [the extent of] even losing all breath, as Sītā in the Bhārata. (36)

Because she would not long for [or, accept] me longing [for her], the courtesan was killed by me in anger; finding (*iti*) that there was the deserted Puṣpakaraṇḍaka, she who was very much frightened [was killed by me] suddenly by the noose [of my arms]. My brother, father and mother like that Draupadī, have been deprived of enjoyment in that they have not seen such an attempt, an act of bravery of [their] son ! (37)

Well. Now the old jackal would be coming. So, moving away [from here] I shall stay on. [*Does accordingly*

Sums up char [illegible]

[एतां दोषकराण्डिकामविनयस्यावासभूतां खलां
रक्तां तस्य किलागतस्य रमणे कालागतामागताम् ।
किमेष समुदाहरामि निजकं बाह्वोः शूरत्वं
निःश्वासापि म्रियतेऽम्बा सुमृता सीता यथा भारते ॥
इच्छन्तं मां नेच्छतीति गणिका रोषेण मया मारिता
शून्ये पुष्पकरण्डक इति सहसा पाशेनोत्त्रासिता ।
सेवावञ्चितो भ्राता मम पिता मातेव सा द्रौपदी
योऽसौ पश्यति नेदृशं व्यवसितं पुत्रस्य शूरत्वम् ॥

भवतु । सांप्रतं वृद्धशृगाल आगमिष्यतीति ततोऽपसृत्य तिष्ठामि ।] (तथा करोति)

Commentary of [illegible]

(प्रविश्य चेटेन सह) **विटः**—अनुनीतो मया स्थावरकश्चेटः । तद्यावत्काणेलीमातरं पश्यामि । (परिक्रम्यावलोक्य च) अये मार्ग एव पादपो निपतितः । अनेन च पतता स्त्री व्यापादिता । भोः पाप किमिदमकार्यमनुष्ठितं त्वया । तवापि पापिनः पतनात्स्त्रीवधदर्शनेनातीव पातिता वयम् । अनिमित्तमेतत् । यत्सत्यं वसन्तसेनां प्रति शङ्कितं मे मनः । सर्वथा देवताः स्वस्ति करिष्यन्ति । (शकारमुपसृत्य) काणेलीमातः एवं मयानुनीतः स्थावरकश्चेटः ।

शकारः—भावे शाअदं दे । पुश्तका थावलका चेडा तवावि शाअदम् । [भाव स्वागतं ते । पुत्रक स्थावरक चेट तवापि स्वागतम् ।]

चेटः—अध इं । [अथ किम् ।]

(*Entering with* Ceṭa) **Viṭa** :—Sthāvaraka Ceṭa has been reconciled by me. So, I shall just see the son of Kāṇelī. (*Walking about and beholding*) Oh, [here] is a tree fallen down right in the way; and a woman has been killed by it falling down! O vile wretch [or, sinful one], what a base deed this committed by you! At the sight of the murder of a woman, far more than the fall of you too, a vile wretch, have we been made extremely down-hearted! This [is] a bad omen; to speak the truth, my mind [has become] apprehensive [or, alarmed] about [the safety of] Vasantasenā. [I hope] the deities would bring about welfare in all ways! (*Approaching* Śakāra) Son of Kāṇelī! Thus have I reconciled Sthāvaraka Ceṭa.

Śakāra :—Bhāva, welcome to you! Dear son, Sthāvaraka Ceṭa, welcome to you also!

Ceṭa :—Yes [or, all right].

विटः—मदीयं न्यासमुपनय।

शकारः—कीदिशे णाशे। [कीदृशो न्यासः।]

विटः—वसन्तसेना।

शकारः—गडा। [गता।]

विटः—क।

Humor based on situation.

शकारः—भावश्श ज्जेव पिश्टदो। [भावस्यैव पृष्ठतः।]

विटः—(सवितर्कम्) न गता खलु सा तया दिशा।

शकारः—तुमं कदमाए दिशाए गडे। [त्वं कतमया दिशा गतः।]

विटः—पूर्वया दिशा।

शकारः—शा वि दक्खिणाए गडा। [सापि दाक्षिणया गता।]

विटः—अहं दाक्षिणया।

शकारः—शा वि उत्तलाए। [साप्युत्तरया।]

विटः—अत्याकुलं कथयसि। न शुध्यति मेऽन्तरात्मा। तत्कथय सत्यम्।

शकारः—शवामि भावश्श शीशं अत्तणकेलकेहिं पादेहिं। ता शंठावेहि हिअअम्। एशा मए मालिदा। [शपे भावस्य शीर्षमात्मीयाभ्यां पादाभ्याम्। ततः संस्थापय हृदयम्। एषा मया मारिता।]

Viṭa :—Bring my deposit.

Śakāra :—What kind of deposit ?

Viṭa :—Vasantasenā.

Śakāra :—[She is] gone.

Viṭa :—Where ?

Śakāra :—Just close after [you] Bhāva.

Viṭa :—(*Thoughtfully*) Surely, she did not go in that direction !

Śakāra :—In which direction did you go ?

Viṭa :—In the eastern direction.

Śakāra :—She again went to the south.

Viṭa :—I [went] to the south.

Śakāra :—She again went to the north.

Viṭa :—You are stating very confusedly. My mind [lit. inner self] is not satisfied [that is, is apprehensive]. So, tell the truth.

Śakāra :—I swear [by] Bhāva's head by [my] own feet. So, compose [your] heart. Here has [she] been killed by me !

विटः—(सविषादम्) सत्यं त्वया व्यापादिता ।

शकारः—जइ मम वअणे न पत्तिंआअशि ता पेक्ख पढमं लाश्टिअशालशंठाणाह शूलत्तणम्[1] । [यदि मम वचने न प्रत्ययसे तत्पश्य प्रथमं राष्ट्रियश्यालसंस्थानस्य शूरत्वम् ।] (इति दर्शयति)

विटः—हा हतोऽस्मि मन्दभाग्यः । (इति मूर्छितः पतति)

शकारः—ही ही । उवलदे भावे । [ही ही । उपरतो भावः ।]

चेटः—शमश्शशदु शमश्शशदु भावे । अविचालिअं पवहणं आणन्तेण ज्जेव मए पढमं मालिदा । [समाश्वसितु समाश्वसितु भावः । अविचारितं प्रवहणमानयतैव मया प्रथमं मारिता ।]

tribute to the qualities of [illegible]

विटः—(समाश्वस्य सकरुणम्) हा वसन्तसेने

दाक्षिण्योदकवाहिनी विगलिता याता स्वदेशं रति-
र्हा हालंकृतभूषणे सुवदने क्रीडारसोद्भासिनि ।
हा सौजन्यनदि प्रहासपुलिने हा मादृशामाश्रये
हा हा नश्यति मन्मथस्य विपणिः सौभाग्यपण्याकरः ॥ ३८ ॥

(सास्रम्) कष्टं भोः कष्टम् ।

Viṭa :—(*With dejection*) Has [she] been really killed by you?

Śakāra :—If you do not trust my words, see then the excellent [or, first] [act of] bravery of the king's brother-in-law Saṁsthānaka!

Viṭa :—Ha! I am undone, luckless [that I am]! [*Falls down in a faint*

Śakāra :—Ha! Ha! Bhāva is dead!

Ceṭa :—Be composed, Bhāva, be composed. She was [really] killed by me first, in just bringing the car thoughtlessly!

Viṭa :—(*Regaining consciousness, pathetically*) Alas! Vasantasenā!

The river of courtesy has dwindled away; Rati has gone [back] to [her] own country. Alas! Alas! [You] the ornament of ornaments, [you] possessing a charming face, [you] shining with [your] attachment to sport! Alas! [O] river of noble nature, with laughter for sandy regions! Alas! [You] the resort of [people] like me! Alas! Alas! The store-house of charm, the market of love, has disappeared! (38)

(*With tears*) Alas! Oh! Alas!

---

[1] पलक्कमं ।

किं नु नाम भवेत्कार्यमिदं येन त्वया कृतम् ।
अपापा पापकल्पेन नगरश्रीर्निपातिता ॥ ३९ ॥

(स्वगतम्) अये कदाचिदयं पाप इदमकार्यं मयि संक्रामयेत् । भवतु । इतो गच्छामि । (इति परिक्रामति) (शकार उपगम्य धारयति)

३ **विटः**—पाप मा मां स्प्राक्षीः । अलं त्वया । गच्छाम्यहम् ।

शकारः—अले वशन्तशेणिअं शअं जेव मालिअ मं दूशिअ कहिं पलाअशि । शंपदं ईदिशे हग्गे अणाधे पाविदे । [अरे वसन्तसेनां स्वयमेव मार- ६ यित्वा मां दूषयित्वा कुत्र पलायसे । सांप्रतमीदृशोऽहमनाथः प्रापितः ।]

विटः—अपध्वस्तोऽसि ।

शकारः—

अत्थं शदं देमि शुवण्णअं दे कहावणं देमि शवोडिअं दे ।
एशे दुशट्ठाण पलक्कमे मे शामण्णए भोदु मणुश्शआणम् ॥ ४० ॥
[अर्थं शतं ददामि सुवर्णकं ते कार्षापणं ददामि सवोडिकं ते ।
एष दोषस्थानं पराक्रमो मे सामान्यको भवतु मनुष्यकाणाम्॥]

३ **विटः**—धिक् तवैवास्तु ।

What possibly could be the purpose to be achieved for which this was done by you! The sinless city-Deity has been smashed down by [you] who are almost Sin [in a bodily form]. (39)

(*To himself*) Ah! Perhaps this sinful wretch might shove this base deed on to me. Well, I shall go [away] from here.

[*Walks about*; Śakāra *going near holds him*

Viṭa :—Sinful wretch ! No, touch [me] not. [I have had] enough of you. I am going.

Śakāra:—Oh, having yourself killed Vasantasenā, where are you running, throwing the guilt on [or, accusing] me? Now thus have I been made helpless [or, without any protector] ?

Viṭa:—Damn you !

Śakāra :—

I shall give you wealth—a hundred gold coins ; I shall give Kārṣāpaṇas, also Voḍikas. Let this heroism of mine, the abode of crime, be common to [all] persons ! (40)

Viṭa :—Fie, let [it] be yours alone !

---

१ भां ।

चेट:—शन्तं पावम् । [शान्तं पापम् ।] (शकारो हसति)

विट:—अप्रीतिर्भवतु विमुच्यतां हि हासो
धिक्प्रीतिं परिभवकारिकामनार्याम् ।
मा भूच्च त्वयि मम संगतं कदाचि-
दाच्छिन्नं धनुरिव निर्गुणं त्यजामि ॥ ४१ ॥

शकार:—भावे पशीद पशीद । एहि । णलिणीए पविशिअ कीलेम्ह । [भाव प्रसीद प्रसीद । एहि । नलिन्यां प्रविश्य क्रीडाव: ।]

विट:—अपतितमपि तावत्सेवमानं भवन्तं
पतितमिव जनोऽयं मन्यते मामनार्यम् ।
कथमहमनुयायां त्वां हतस्त्रीकमेनं
पुनरपि नगरस्त्रीशङ्कितार्धाक्षिदृष्टम् ॥ ४२ ॥

(सकरुणम्) वसन्तसेने

अन्यस्यामपि जातौ मा वेश्या भूस्त्वं हि सुन्दरि ।
चारित्र्यगुणसंपन्ने जायेथा विमले कुले ॥ ४३ ॥

Phrase [illegible]

[Śakāra *laughs*

Ceṭa :—God forbid !

Viṭa :—

Let there be absence of delight [or, glory]; leave off indeed the laughter. Fie upon [your] love [or, friendship] which brings on disgrace and [which is] ignoble! Let there be again never my contact with you! [Here] I abandon you without any virtues, like a broken bow without the string ! (41)

Sakāra :—Bhāva, be pleased, be pleased. Come, let us sport on, entering into the lotus-pond.

Viṭa :—

People here consider me, although not fallen [or, degraded], as one degraded [and] dishonourable, while serving you. How can I be following you who have thus killed a woman, [and] who would be seen even again by the city-women with eyes half-closed through apprehension ? (42)

(*Pathetically*) Vasantasenā,

May you, [O] beautiful one, not be [born] a courtesan ever again in the next birth! May you, [O] one endowed with noble character and virtues, be born in a pure family ! (43)

Some farcical [illegible] satirical
humour.

शकारः—ममकेलके पुप्फकलण्डकजिण्णुज्जाणे वशन्तशेणिअं मालिअ कहिं पलाअशि। एहि। मम आवुत्तश्श अग्गदो ववहालं देहि। [मदीये पुष्पकरण्डकजीर्णोद्याने वसन्तसेनां मारयित्वा कुत्र पलायसे। एहि। मम आवुत्तस्याग्रतो व्यवहारं देहि।]

(इति धारयति)

विटः—आः तिष्ठ जाल्म।

(इति खड्गमाकर्षति)

शकारः—(सभयमपसृत्य) किं ले भीदेशि। ता गच्छ। [किं रे भीतोऽसि। तद्गच्छ।]

विटः—(स्वगतम्) न युक्तमवस्थातुम्। भवतु। यत्रार्यशर्विलकचन्दनकप्रभृतयः सन्ति तत्र गच्छामि।

(इति निष्क्रान्तः)

शकारः—णिधणं गच्छ। अले थावलका पुत्तका कीलिशे मए कडे। [निधनं गच्छ। अरे स्थावरक पुत्रक कीदृशं मया कृतम्।]

चेटः—भट्टके महन्ते अकज्जं कडे। [भट्टक महदकार्यं कृतम्।]

शकारः—अले चेडे किं भणाशि अकज्जे कडेत्ति। भोदु। एव्वं दाव। (नानाभरणान्यवतार्य) गेण्ह एदं अलंकारअम्। मए दाव दिण्णे। जेत्तिके वेले अलंकलेमि तेत्तिकं वेलं मम। अण्णं तव। [अरे चेट किं भणस्यकार्यं कृतमिति। भवतु। एवं तावत्।...गृहाणेममलंकारम्। मया तावद्दत्तम्। यावत्यां वेलायामलंकरोमि तावतीं वेलां मम। अन्यां तव।]

Śakāra :—Where are you running away, having killed Vasantasenā in my old garden Puṣpakaraṇḍaka? Come, stand the trial in the court before my brother-in-law. [*Holds him*

Viṭa :—Ah! Stay, [you] rogue! [*Draws his sword*

Śakāra :—(*Moving off in fear*) What, oh! You are afraid [of me]! So, go.

Viṭa :—(*To himself*) It [is] not advisable [or, proper] to stay on. Well, I shall go where are the noble Sarvilaka, Candanaka and others. [*Exit*

Śakāra :—Go to destruction [or, hell]! O Sthāvaraka, dear son! What sort of [deed] have I done?

Ceṭa :—Master, a most ignoble deed has been done [by you]!

Śakāra :—O Ceṭa! What do you say—A most ignoble deed has been done? All right. [I shall do] thus now. (*Taking off his body various ornaments*) Take these ornaments. I just give [them to you]. During the time I shall be decorating [myself], for that period [they would be] mine; for other [time], yours.

चेटः—भट्टके ज्जेव एदे शोहन्ति । किं मम एदेहिं । [भट्टक एवैते शोभन्ते । किं ममैतैः ।]

शकारः—ता गच्छ । एदाइं गोणाइं गेण्हिअ ममकेलकाए पाशादबालग्गपदोलिकाए चिट्ठ । जाव हग्गे आअच्छामि । [तद्गच्छ । एतौ वृषभौ गृहीत्वा मदीयायां प्रासादबालाग्रप्रतोलिकायां तिष्ठ । यावदहमागच्छामि ।]

चेटः—ज भट्टके आणवेदि । [यद्भट्टक आज्ञापयति ।] (इति निष्क्रान्तः)

शकारः—अत्तपलित्ताणे भावे गदे अदंशणम् । चेडं वि पाशादबालग्गपदोलिकाए णिगलपूलिदं कदुअ थावइश्शम् । एव्वं मन्ते लक्खिदे भोदि । ता गच्छामि । अधवा पेक्खामि दाव एदम् । किं एशा मला आदु पुणो वि मालइश्शम् । (अवलोक्य) कधं शुमला । भोदु । एदिणा पावालएण पच्छादेमि णम् । अधवा णामङ्किदे एशे । ता के वि अज्जपुलिशे पच्चहिजाणेदि । भोदु । एदिणा वादालीपुञ्जिदेण शुक्खपण्णपुडेण पच्छादेमि । (तधा कृत्वा विचिन्त्य) भोदु । एव्वं दाव । संपदं अधिअलणं गच्छिअ ववहालं लिहावेमि जहा अत्थश्श कालणादो शत्थवाहचालुदत्ताकेण ममकेलकं पुप्फकलण्डकं जिण्णुज्जाणं पवेशिअ वशन्तशेणिआ वावादिदे त्ति ।

Ceṭa :—These look to advantage on [the person of] the Master himself. What [is the use] of these to me ?

Śakāra :—Then go ; taking these bulls away, wait in the small top-terrace-room of my mansion. I shall just come.

[*Exit*

Ceṭa :—As Master commands.

Śakāra :—Bhāva has made himself scarce, to save himself. The Ceṭa also, I shall keep secured, having put [him] into fetters in the small top-terrace-room of the mansion. In this way [my] secret would be safe. So, I shall go. Or, I shall just see her—Is she dead or shall I [have to] kill [her] once again ? (*Beholding*) What, [she is] well [and truly] dead ! Very well. I shall cover her up with this [my] mantle. Or [no], this [is] marked with [my] name ! So, some honourable person or other would recognise [it]. Well, I shall cover [her] up with these dry leaves heaped together by the gust of wind. (*Doing accordingly, thinking*) Well, [I shall do] just this. Now, going to the law-court, I shall lodge a written complaint, that Vasantasenā was killed for the sake of [her] money, by the merchant Cārudatta, having made [her] enter my Puṣpakaraṇḍaka old garden.

चालुदत्तविणाशाय कलेमि कवडं णवम् ।
णअलीए विशुद्धाए पशुघादं व्व दालुणम् ॥ ४४ ॥

भोदु । गच्छामि । (इति निष्क्रम्य दृष्ट्वा सभयम्) अविद मादिके । जेण जेण गच्छामि मग्गेण तेण ज्जेव एशे दुश्टशमणके गहिदकशाओदकं चीवलं गेण्हिअ आअच्छदि । एशे मए णशिं च्छिदिअ वाहिदे किदवेले कदावि मं पेक्खिअ एदेण मालिदे त्ति पआशइश्शदि । ता कधं गच्छामि । (अवलोक्य) भोदु । एदं अद्धपडिदं पाआलखण्डं उल्लङ्घिअ गच्छामि ।

last scene of the Act.

एशे म्हि तुलिदतुलिदे लङ्काणअलीए गअणे गच्छन्ते ।
भूमीए पाआले हणूमशिहले विअ महेन्दे ॥ ४५ ॥

[आत्मपरित्राणे भावो गतोऽदर्शनम् । चेटमपि प्रासादबालाग्रप्रतोलिकायां निगडपूरितं कृत्वा स्थापयिष्यामि । एवं मन्त्रो रक्षितो भवति । तद्गच्छामि । अथवा पश्यामि तावदेनाम् । किमेषा मृता अथवा पुनरपि मारयिष्यामि ।...कथं सुमृता । भवतु । एतेन प्रावारकेण प्रच्छादयाम्येनाम् । अथवा नामाङ्कित एषः । तत्कोऽप्यार्यपुरुषः प्रत्यभिज्ञास्यति । भवतु । एतेन वातालीपुञ्जितेन शुष्कपर्णपुटेन प्रच्छादयामि । ...भवतु । एवं तावत् । सांप्रतमधिकरणं गत्वा व्यवहारं लेखयामि यथार्थस्य कारणात्सार्थवाहकचारुदत्तकेन मदीयं पुष्पकरण्डकं जीर्णोद्यानं प्रवेश्य वसन्तसेना व्यापादितेति ।

चारुदत्तविनाशाय करोमि कपटं नवम् ।
नगर्यां विशुद्धायां पशुघातमिव दारुणम् ॥

भवतु । गच्छामि । अविद मादिके । येन येन गच्छामि मार्गेण तेनैवैष दुष्टश्रमणको गृहीतकषायोदकं चीवरं गृहीत्वागच्छति । एष मया नासां छित्त्वा वाहितः कृतवैरः कदापि मां प्रेक्ष्यैतेन मारितेति प्रकाशयिष्यति । तत्कथं गच्छामि । ... भवतु । एतमर्धपतितं

I shall arrange a novel fraud for the destruction of Cārudatta, terrible like the slaughter of the victim [cow] in a sacred city ! (44)

Well, I shall go. (*Going out, seeing, with fear*) Ah ! Alas ! By whatever path I go, by the very same, this wicked monk comes, taking [his] garment soaked in red-coloured water. He was driven out, with [his] nose pierced through, by me [and so he] being inimical [towards me], might perhaps, on seeing me, give out that [Vasantasenā] was killed by me [lit. this one]. So, how shall I go? (*Beholding*) All right. Jumping over this half-fallen portion of the wall, I shall go.

प्राकारखण्डमुल्लङ्घ्य गच्छामि ।

एषोऽस्मि त्वरितत्वरितो लङ्कानगर्यां गगने गच्छन् ।
भूम्यां पाताले हनूमच्छिखर इव महेन्द्रः ॥] (इति निष्क्रान्तः) १५

(प्रविश्यापटीक्षेपेण) संवाहको भिक्षुः—पक्खालिदे एशे मए चीवल-
खण्डे । किं णु क्खु शाहाए शुक्खावइश्शम् । इध वाणला विलुप्पन्ति । किं णु
क्खु भूमीए । धूलीदोशे होदि । ता कहिं पशालिअ शुक्खावइश्शम् । (दृष्ट्वा) १८
भोदु । इध वादालीपुञ्जिदे शुक्खवत्तसंचए पशालइश्शम् । (तथा कृत्वा) णमो
बुद्धश्श । (इत्युपविशति) भोदु । धम्मक्खलाइं उदाहलामि । (पञ्चजणा जेण
मालिदा ८।२ इत्यादि पूर्वोक्तं पठति) अधवा अलं मम एदेण शग्गेण । जाव २१
ताए वशन्तशेणिआए बुद्धोवाशिआए पच्चुवकालं ण कलेमि जाए दशाणं
शुवण्णकाणं किदे जूदिअलेहिं णिक्कीदे । तदो पहुदि ताए कीदं विअ अत्ताणअं
अवगच्छामि । (दृष्ट्वा) किं णु क्खु पण्णोदले शमुश्शशादि । अधवा २४

Here am I [going] very quickly like Mahendra going towards the city of Lankā through the sky, over the earth, over the nether regions [and] over the peak of Hanūmat. (45)
[*Exit*

(*Entering, with a toss of the curtain*)

Saṁvāhaka Bhikṣu :—I have washed this garment-piece. Should I indeed dry it up on a branch ? Here [or, in that case], the monkeys might snatch [it] away. [Should it be] indeed on the ground ? [In that case] there would result [its] being spoiled by dust. Then, where shall I dry [it], spreading [it] over ? (*Seeing*) Well, I shall spread [it] over, here on the mass of dry leaves heaped together owing to the gust of wind. (*Doing accordingly*) A bow to Buddha. (*Sits down*). Well, I shall recite the holy recitation (*Repeats VIII. 2—' By whom the five persons were killed' etc. said before*). Or, away [that is, I have nothing to do] with this heaven for me, so long I do not return the obligation of that Buddha-worshipper Vasantasenā by whom I was redeemed from the [two] gamblers for the sake of ten gold coins. Since that time, I consider myself to be as though bought by her ! (*Seeing*) What [is it] indeed that is rustling up inside the leaves ? Or,

चालुदत्तविणाशाय कलेमि कवडं णवम् ।
णअलीए विशुद्धाए पशुघादं व्व दालुणम् ॥ ४४ ॥

भोदु । गच्छांमि । (इति निष्क्रम्य दृष्ट्वा सभयम्) अविद् मादिके । जेण जेण गच्छामि मग्गेण तेण ज्जेव एशे दुश्टशमणके गहिदकशाओदकं चीवलं गेण्हिअ आअच्छदि । एशे मए णशिं च्छिदिअ वाहिदे किदवेले कदावि मं पेक्खिअ एदेण मालिदे त्ति पआशइश्शदि । ता कधं गच्छामि । (अवलोक्य) भोदु । एदं अद्धपडिदं पाआलखण्डं उल्लङ्घिअ गच्छामि ।

last scene of the Act.

एशे म्हि तुलिदतुलिदे लङ्काणअलीए गअणे गच्छन्ते ।
भूमीए पाआले हणूमशिहले विअ महेन्दे ॥ ४५ ॥

[आत्मपरित्राणे भावो गतोऽदर्शनम् । चेटमपि प्रासादबालाग्रप्रतोलिकायां निगडपूरितं कृत्वा स्थापयिष्यामि । एवं मन्त्रो रक्षितो भवति । तद्गच्छामि । अथवा पश्यामि तावदेनाम् । किमेषा मृता अथवा पुनरपि मारयिष्यामि ।...कथं सुमृता । भवतु । एतेन प्रावारकेण प्रच्छादयाम्येनाम् । अथवा नामाङ्कित एषः । तत्कोऽप्यार्यपुरुषः प्रत्यभिज्ञास्यति । भवतु । एतेन वातालीपुञ्जितेन शुष्कपर्णपुटेन प्रच्छादयामि । ...भवतु । एवं तावत् । सांप्रतमधिकरणं गत्वा व्यवहारं लेखयामि यथार्थस्य कारणात्सार्थवाहकचारुदत्तकेन मदीयं पुष्पकरण्डकं जीर्णोद्यानं प्रवेश्य वसन्तसेना व्यापादितेति ।

चारुदत्तविनाशाय करोमि कपटं नवम् ।
नगर्यां विशुद्धायां पशुघातमिव दारुणम् ॥

भवतु । गच्छामि । अविद् मादिके । येन येन गच्छामि मार्गेण तेनैवैष दुष्टश्रमणको गृहीतकषायोदकं चीवरं गृहीत्वागच्छति । एष मया नासां छित्त्वा वाहितः कृतवैरः कदापि मां प्रेक्ष्यैतेन मारितेति प्रकाशयिष्यति । तत्कथं गच्छामि । ... भवतु । एतमर्धपतितं

I shall arrange a novel fraud for the destruction of Cārudatta, terrible like the slaughter of the victim [cow] in a sacred city ! (44)

Well, I shall go. (*Going out, seeing, with fear*) Ah ! Alas ! By whatever path I go, by the very same, this wicked monk comes, taking [his] garment soaked in red-coloured water. He was driven out, with [his] nose pierced through, by me [and so he] being inimical [towards me], might perhaps, on seeing me, give out that [Vasantasenā] was killed by me [lit. this one]. So, how shall I go ? (*Beholding*) All right. Jumping over this half-fallen portion of the wall, I shall go.

प्राकारखण्डमुल्लङ्घ्य गच्छामि।

एषोऽस्मि त्वरितत्वरितो लङ्कानगर्यां गगने गच्छन्।
भूम्यां पाताले हनूमच्छिखर इव महेन्द्रः॥] (इति निष्क्रान्तः)

(प्रविश्यापटीक्षेपेण) संवाहको भिक्षुः—पक्खालिदे एशे मए चीवलखण्डे। किं णु क्खु शाहाए शुक्खावइश्शम्। इध वाणला विलुप्पन्ति। किं णु क्खु भूमीए। धूलीदोशे होदि। ता कहिं पशालिअ शुक्खावइश्शम्। (दृष्ट्वा) भोदु। इध वादालीपुञ्जिदे शुक्खवत्तसंचए पशालइश्शम्। (तथा कृत्वा) णमो बुद्धश्श। (इत्युपविशति) भोदु। धम्मक्खलाइं उदाहलामि। (पञ्चजणा जेण मालिदा ८।२ इत्यादि पूर्वोक्तं पठति) अधवा अलं मम एदेण शग्गेण। जाव ताए वशन्तशेणिआए बुद्धोवाशिआए पच्चुवकालं ण कलेमि जाए दशाणं शुवण्णकाणं किदे जूदिअलेहिं णिक्कीदे। तदो पहुदि ताए कीदं विअ अत्ताणअं अवगच्छामि। (दृष्ट्वा) किं णु क्खु पण्णोदले शमुश्शशदि। अधवा

Here am I [going] very quickly like Mahendra going towards the city of Laṅkā through the sky, over the earth, over the nether regions [and] over the peak of Hanūmat. (45)

[*Exit*

(*Entering, with a toss of the curtain*)

Saṁvāhaka Bhikṣu :—I have washed this garment-piece. Should I indeed dry it up on a branch? Here [or, in that case], the monkeys might snatch [it] away. [Should it be] indeed on the ground? [In that case] there would result [its] being spoiled by dust. Then, where shall I dry [it], spreading [it] over? (*Seeing*) Well, I shall spread [it] over, here on the mass of dry leaves heaped together owing to the gust of wind. (*Doing accordingly*) A bow to Buddha. (*Sits down*). Well, I shall recite the holy recitation (*Repeats VIII. 2—' By whom the five persons were killed' etc. said before*). Or, away [that is, I have nothing to do] with this heaven for me, so long I do not return the obligation of that Buddha-worshipper Vasantasenā by whom I was redeemed from the [two] gamblers for the sake of ten gold coins. Since that time, I consider myself to be as though bought by her! (*Seeing*) What [is it] indeed that is rustling up inside the leaves? Or,

वादादवेण तत्ता चीवलतोएण तिम्मिदा पत्ता ।
एदे विथिण्णपत्ता मण्णे पत्ता विअ फुलन्ति ॥ ४६ ॥

[प्रक्षालितमेतन्मया चीवरखण्डम्। किं नु खलु शाखायां शुष्कं करिष्यामि। इह वानरा विलुम्पन्ति। किं नु खलु भूम्याम्। धूलीदोषो भवति। तत्कुत्र प्रसार्य शुष्कं करिष्यामि।...भवतु। इह वातालीपुञ्जिते शुष्कपत्रसंचये प्रसारयिष्यामि। ...नमो बुद्धाय।...भवतु। धर्माक्षराण्युदाहरामि।...अथवालं ममैतेन स्वर्गेण। यावत्तस्या वसन्तसेनाया बुद्धोपासिकायाः प्रत्युपकारं न करोमि यया दशसुवर्णकानां कृते द्यूतकराभ्यां निष्क्रीतः ततः प्रभृति तया क्रीतमिवात्मानमवगच्छामि।...किं नु खलु पर्णोदरे समुच्छ्वसिति। अथवा

वातातपेन तप्तानि चीवरतोयेन निमितानि पत्राणि।
एतानि विस्तीर्णपत्राणि मन्ये पत्राणीव स्फुरन्ति ॥]

(वसन्तसेना संज्ञां लब्ध्वा हस्तं दर्शयति)

भिक्षुः—हा हा शुद्धालंकालभूशिदे इत्थिआहत्थे णिक्कमदि। कथम्। दुदिए वि हत्थे। (बहुविधं निर्वर्ण्य) पच्चभिआणामि विअ एदं हत्थम्। अधवा किं विचालेण। शच्चं शे ज्जेव हत्थे जेण मे अभअं दिण्णम्। भोदु। पेक्खिश्शम्। (नाट्येनोद्घाट्य दृष्ट्वा प्रत्यभिज्ञाय च) शा ज्जेव बुद्धोवाशिआ। [हा हा शुद्धालंकारभूषितः स्त्रीहस्तो निष्क्रामति। कथम्। द्वितीयोऽपि हस्तः।...प्रत्यभिजानामीवैतं हस्तम्। अथवा किं विचारेण। सत्यं स एव हस्तो येन मेऽभयं दत्तम्। भवतु। पश्यामि। ...सैव बुद्धोपासिका।]

(वसन्तसेना पानीयमाकाङ्क्षति)

I think that these leaves scorched up by heat and wind, [being] moistened by the water from the garment, are throbbing up like the wings with [their] feathers [or, surface] spread over. (46)

[Vasantasenā, *regaining consciousness, puts forth her hand*

Bhikṣu :—Ha! Oh! A woman's hand adorned with bright ornaments is coming out! What! A second hand too! (*Scrutinising in various ways*) I seem indeed to recognise this hand! Or, why doubt [or, discuss any further]? Surely, this [is] the same hand by which was granted freedom from fear to me! Well, I shall see. [*Gesticulating uncovering, seeing and recognising*] [It is] the same Buddha-worshipper!

[Vasantasenā *indicates a desire for water*

भिक्षुः—कथम् । उदअं मग्गेदि । दूले च दिग्घिआ । किं दाणिं एत्थ १८
ळइश्शम् । भोदु । एदं चीवलं शे उवलि गालइश्शम् । [कथम् । उदकं याचते ।
रे च दीर्घिका । किमिदानीमत्र करिष्यामि । भवतु । एतच्चीवरमस्या उपरि
गालयिष्यामि ।] (तथा करोति) २१

(वसन्तसेना संज्ञां लब्ध्वोत्तिष्ठति । भिक्षुः पटान्तेन वीजयति)

वसन्तसेना—अज्ज को तुमम् । [आर्य कस्त्वम् ।]

भिक्षुः—किं मं ण शुमलेदि बुद्धोवाशिआ दशशुवण्णणिक्कीदम् । [किं २४
न स्मरति बुद्धोपासिका दशसुवर्णनिष्क्रीतम् ।]

वसन्तसेना—सुमरामि । ण उण जधा अज्जो भणादि । वरं अहं
उवरदा ज्जेव । [स्मरामि । न पुनर्यथार्यो भणति । वरमहमुपरतैव ।] २७

भिक्षुः—बुद्धोवाशिए । किं ण्णेदम् । [बुद्धोपासिके किं न्विदम् ।]

वसन्तसेना—(सनिर्वेदम्) जं सरिसं वेसभावस्स । [यत्सदृशं वेशभावस्य ।]

भिक्षुः—उट्ठेदु उट्ठेदु बुद्धोवाशिआ एदं पादवशमीवजादं लदं ओल- ३०
म्बिअ । [उत्तिष्ठतूत्तिष्ठतु बुद्धोपासिकैतां पादपसमीपजातां लतामवलम्ब्य ।] (इति
लतां नामयति) (वसन्तसेना गृहीत्वोत्तिष्ठति)

Bhikṣu :—What? [She] asks for water? But the tank [is] far off. What shall I do now here? Well, I shall squeeze this garment over her. [*Does accordingly*

[Vasantasenā, *regaining consciousness, sits up*; Bhikṣu *fans her with the hem of his cloth*

Vasantasenā :—Who [are] you?

Bhikṣu :—What! Does not the Buddha-worshipper remember redeemed with ten gold coins?

Vasantasenā :—I remember; but not in the way as the noble one says. [It would have been] better if I were just dead [and gone]!

Bhikṣu :—Buddha-worshipper, what indeed [is] this?

Vasantasenā :—(*Despondently*) What [is] in keeping with the profession of a courtesan.

Bhikṣu :—Let the Buddha-worshipper rise up, rise up, supporting [herself] with this creeper growing near the tree. [*Bends down the creeper* ; Vasantasenā, *holding it, stands up*

वादादवेण तत्ता चीवलतोएण तिम्मिदा पत्ता ।
एदे विथिण्णपत्ता मण्णे पत्ता विअ फुलन्ति ॥ ४६ ॥

[प्रक्षालितमेतन्मया चीवरखण्डम्। किं नु खलु शाखायां शुष्कं करिष्यामि। इह वानरा विलुम्पन्ति। किं नु खलु भूम्याम्। धूलीदोषो भवति। तत्कुत्र प्रसार्य शुष्कं करिष्यामि।...भवतु। इह वातालीपुञ्जिते शुष्कपत्रसंचये प्रसारयिष्यामि। ...नमो बुद्धाय।...भवतु। धर्माक्षराण्युदाहरामि।...अथवालं ममैतेन स्वर्गेण। यावत्तस्या वसन्तसेनाया बुद्धोपासिकायाः प्रत्युपकारं न करोमि यया दशसुवर्णकानां कृते द्यूतकराभ्यां निष्क्रीतः ततः प्रभृति तया क्रीतमिवात्मानमवगच्छामि।...किं नु खलु पर्णोदरे समुच्छ्वसिति। अथवा

वातातपेन तप्तानि चीवरतोयेन निमितानि पत्राणि ।
एतानि विस्तीर्णपत्राणि मन्ये पत्राणीव स्फुरन्ति ॥]

(वसन्तसेना संज्ञां लब्ध्वा हस्तं दर्शयति)

भिक्षुः—हा हा शुद्धालंकालभूशिदे इत्थिआहत्थे णिक्कमदि। कधम्। दुदिए वि हत्थे। (बहुविधं निर्वर्ण्य) पच्चभिआणामि विअ एदं हत्थम्। अधवा किं विचालेण। शच्चं शे ज्जेव हत्थे जेण मे अभअं दिण्णम्। भोदु। पेक्खिश्शम्। (नाट्येनोद्घाट्य दृष्ट्वा प्रत्यभिज्ञाय च) शा ज्जेव बुद्धोवाशिआ। [हा हा शुद्धालंकारभूषितः स्त्रीहस्तो निष्कामति। कथम्। द्वितीयोऽपि हस्तः।...प्रत्यभिजानामीवैतं हस्तम्। अथवा किं विचारेण। सत्यं स एव हस्तो येन मेऽभयं दत्तम्। भवतु। पश्यामि। ...सैव बुद्धोपासिका।]

(वसन्तसेना पानीयमाकाङ्क्षति)

I think that these leaves scorched up by heat and wind, [being] moistened by the water from the garment, are throbbing up like the wings with [their] feathers [or, surface] spread over. (46)

[Vasantasenā, *regaining consciousness, puts forth her hand*

Bhikṣu :—Ha! Oh! A woman's hand adorned with bright ornaments is coming out! What! A second hand too! (*Scrutinising in various ways*) I seem indeed to recognise this hand! Or, why doubt [or, discuss any further]? Surely, this [is] the same hand by which was granted freedom from fear to me! Well, I shall see. [*Gesticulating uncovering, seeing and recognising*] [It is] the same Buddha-worshipper!

[Vasantasenā *indicates a desire for water*

भिक्षुः—कधम् । उदअं मग्गोदि । दूले च दिग्घिआ । किं दाणिं एत्थ ळइश्शम् । भोदु । एदं चीवलं शे उवलि गालइश्शम् । [कथम् । उदकं याचते । दूरे च दीर्घिका । किमिदानीमत्र करिष्यामि । भवतु । एतच्चीवरमस्या उपरि गालयिष्यामि ।] (तथा करोति)

(वसन्तसेना संज्ञां लब्ध्वोत्तिष्ठति । भिक्षुः पटान्तेन वीजयति)

वसन्तसेना—अज्ज को तुमम् । [आर्य कस्त्वम् ।]

भिक्षुः—किं मं ण शुमलेदि बुद्धोवाशिआ दशशुवण्णणिक्कीदम् । [किं मां न स्मरति बुद्धोपासिका दशसुवर्णनिष्क्रीतम् ।]

वसन्तसेना—सुमरामि । ण उण जधा अज्जो भणादि । वरं अहं उवरदा ज्जेव । [स्मरामि । न पुनर्यथार्यो भणति । वरमहमुपरतैव ।]

भिक्षुः—बुद्धोवाशिए । किं ण्णेदम् । [बुद्धोपासिके किं न्विदम् ।]

वसन्तसेना—(सनिर्वेदम्) जं सरिसं वेसभावस्स । [यत्सदृशं वेशभावस्य ।]

भिक्षुः—उट्ठेदु उट्ठेदु बुद्धोवाशिआ एदं पादवशमीवजादं लदं ओलम्बिअ । [उत्तिष्ठतूत्तिष्ठतु बुद्धोपासिकैतां पादपसमीपजातां लतामवलम्ब्य ।] (इति लतां नामयति) (वसन्तसेना गृहीत्वोत्तिष्ठति)

Bhikṣu :—What ? [She] asks for water ? But the tank [is] far off. What shall I do now here ? Well, I shall squeeze this garment over her. [*Does accordingly*

[Vasantasenā, *regaining consciousness, sits up* ; Bhikṣu *fans her with the hem of his cloth*

Vasantasenā :—Who [are] you ?

Bhikṣu :—What ! Does not the Buddha-worshipper remember redeemed with ten gold coins ?

Vasantasenā :—I remember ; but not in the way as the noble one says. [It would have been] better if I were just dead [and gone] !

Bhikṣu :—Buddha-worshipper, what indeed [is] this ?

Vasantasenā :—(*Despondently*) What [is] in keeping with the profession of a courtesan.

Bhikṣu :—Let the Buddha-worshipper rise up, rise up, supporting [herself] with this creeper growing near the tree. [*Bends down the creeper* ; Vasantasenā, *holding it, stands up*

भिक्षुः—एदश्शिं विहाले मम धम्मबहिणिआ चिट्ठदि । तहिं शमस्स्शिदमणा भविअ उवाशिआ गेहं गमिश्शादि । ता शेणं शेणं गच्छदु बुद्धोवाशिआ । (इति परिक्रामति । दृष्ट्वा) ओशलध अज्जा ओशलध । एशा तलुणी इत्थिआ एशो भिक्खु त्ति शुद्धे मम एशे धम्मे ।

हत्थशंजदे मुहशंजदे इन्दियशंजदे शे क्खु माणुशे ।
किं कलेदिं लाअउले तश्श पललोए हत्थे णिच्चले ॥ ४७ ॥

[एतस्मिन्विहारे मम धर्मभगिनी तिष्ठति । तत्र समाश्वस्तमना भूत्वोपासिका गेहं गमिष्यति । तच्छनैः शनैर्गच्छतु बुद्धोपासिका । ...अपसरत । आर्याः अपसरत । एषा तरुणी स्त्री एष भिक्षुरिति शुद्धो ममैष धर्मः ।

हस्तसंयतो मुखसंयत इन्द्रियसंयतः स खलु मनुष्यः ।
किं करोति राजकुलं तस्य परलोको हस्ते निश्चलः ॥]

(इति निष्क्रान्ताः सर्वे)

इति वसन्तसेनामोटनो नामाष्टमोऽङ्कः ।

Bhikṣu :—In this convent stays my sister-in-faith. Having composed her mind there, [the Buddha-] worshipper might go home. So, let the Buddha-worshipper go slowly and slowly. (*Moves about* ; *seeing*) Stand off, gentlemen, stand off. Here [is] a young woman, [and] here, a Bhikṣu—[still] this [is] my correct religious duty.

Restrained in hand, restrained in mouth, restrained i sense-organs, that [is] indeed a man. What can a court of law do to him? The other world [lies] firm in [the hollow of his] hand. (47)

[*Exeunt Omnes*

Here ends the Eighth Act called ' *Vasantasenāmoṭana* '

[*The Smothering of Vasantasenā*]

3, 5, 14, 12, 16, 33, 21, 34, 43 ——

नवमोऽङ्कः

(ततः प्रविशति शोधनकः)

शोधनकः—आणत्तम्हि अधिअरणभोइएहिं—अरे सोहणआ ववहारमण्डवं गदुअ आसणाइं सज्जीकरेहि त्ति। ता जाव अधिअरणमण्डवं सज्जिदुं गच्छामि। (परिक्रम्यावलोक्य च) एदं अधिअरणमण्डवम्। एस पविसामि। (प्रविश्य संमार्ज्यासनमाधाय) विवित्तं कारिदं मए अधिअरणमण्डवम्। विरइदाइं मए आसणाइं। ता जाव अधिअरणिआणं उण णिवेदेमि। (परिक्रम्यावलोक्य च) कधम् एसो रट्ठिअस्सालो दुट्ठदुज्जणमणुस्सो इदो एव्व आअच्छदि। ता दिट्ठिपधं परिहरिअ गमिस्सम्। [आज्ञप्तोऽस्म्यधिकरणभोजकैः—अरे शोधनक व्यवहारमण्डपं गत्वासनानि सज्जीकुरु इति। तद्यावदधिकरणमण्डपं साज्जितुं गच्छामि। एषोऽधिकरणमण्डपः। एष प्रविशामि। ...विविक्तः कारितो मयाधिकरणमण्डपः। विरचितानि मयासनानि। तद्यावदधिकरणिकानां पुनर्निवेदयामि। ...कथम् एष राष्ट्रियश्यालो दुष्टदुर्जनमनुष्य इत एवागच्छति। तद्दृष्टिपथं परिहृत्य गमिष्यामि।]

(इत्येकान्ते स्थितः)

(ततः प्रविशत्युज्ज्वलवेषधारी शकारः)

ACT IX

(*Then enter* Śodhanaka)

Śodhanaka :—I have been ordered by the Court-dignitaries [as follows]—' O Śodhanaka, going to the Court-hall, get ready the seats.' So, I shall be going to the Court-hall to arrange [them]. (*Walking about and beholding*) This [is] the Court-hall. Here I shall enter. (*Entering, sweeping it and placing the seats*) I have made the Court-hall [quite] clean; the seats have been arranged by me; so I shall just let the judges know in return. (*Walking about and beholding*) What? Here the king's brother-in-law, a wicked man, a mean fellow, is coming just here. So, avoiding the range of [his] sight, I shall go. [*Stands in one corner*

(*Then enter* Śakāra *wearing a gorgeous dress*)

शकारः—

ण्हादेहं शलिलजलेहिं पाणिएहिं उज्जाणे उववणकाणणे णिशण्णे ।
णालीहिं शह जुवदीहिं इश्तिआहिं गन्धव्वेव[1] शुविहिदेहिं अङ्गकेहिं ॥ १ ॥
खणेण गण्ठी खणजूलके मे खणेण वाला खणकुन्तले वा ।
खणेन मुक्के खण उद्धचूडे चित्ते विचित्ते हगे लाअशाले ॥ २ ॥

अवि अ । विशगण्ठिगब्भपविश्टेण विअ कीडएण विअ अन्तलं मग्गमाणेण पाविदं मए महदन्तलम् । ता कश्श एदं किविणचेश्टिअं पाडइश्शम् । (स्मृत्वा) आं शुमलिदं मए । दलिद्दचालुदत्तश्श एदं किविणचेश्टिअं पाडइश्शम् । अण्णं च । दलिद्दे क्खु शे । तश्श शव्वं शंभावीअदि । भोदु । अधिअलणमण्डवं गदुअ अग्गदो ववहालं लिहावइश्शम् जधा चालुदत्तकेण वशन्तशेणिआ मोडिअ मालिदा । ता जाव अधिअलणमण्डवं ज्जेव गच्छामि । (परिक्रम्यावलोक्य च) एदं तं अधिअलणमण्डवम् । एत्थ पविशामि । (प्रविश्यावलोक्य च) कधम् आशणाइं दिण्णाइं चिश्टन्ति । जाव आअश्शन्ति अधिअलणभोइआ दाव एदश्शिं दुव्वचत्तले मुहुत्तअं उवाविशिअ पडिवालइश्शम् ।

Totology

yles of hair

[स्नातोऽहं सलिलजलैः पानीयैरुद्यान उपवनकानने निषण्णः ।
नारीभिः सह युवतीभिः स्त्रीभिर्गन्धर्व इव सुविहितैरङ्गकैः ॥
क्षणेन ग्रन्थिः क्षणजूटको मे क्षणेन वालाः क्षणकुन्तला वा । जटा
क्षणेन मुक्ताः क्षणमूर्ध्वचूडाश्चित्रो विचित्रोऽहं राजश्यालः ॥

Śakāra :—

I bathed with waters, liquids and fluids ; seated in a garden, park and grove ; with women, young ladies and females—like a Gandharva, with well-formed limbs ! (1)

[Hair formed in] a knot for a moment, a matted form the next moment, long hair for another moment, curly hair for another moment, loosened up for another moment, made into a crest above for another moment—[thus] variegated and picturesque [am] I, the king's brother-in-law ! (2)

And further, a big passage [or advance, opening] has been made by me like a worm entering the interior of a poisonous knotted portion [of a herb] and seeking a way [therein]. So, on whom shall I shove this base deed ? (*Remembering*) Ah ! I have remembered ! I shall shove this base deed on to the penniless Cārudatta. And moreover, he [is] indeed a pauper ; everything

---

[1] गन्धव्वेहिं ।

अपि च । विषग्रन्थिगर्भप्रविष्टेनेव कीटकेनान्तरं मार्गमाणेन प्राप्तं मया महदन्तरम् । तत्कस्येदं कृपणचेष्टितं पातयिष्यामि । ...आं स्मृतं मया । दरिद्रचारुदत्तस्येदं कृपणचेष्टितं पातयिष्यामि । अन्यच्च । दरिद्रः खलु सः । तस्य सर्वं संभाव्यते । भवतु । अधिकरणमण्डपं गत्वाग्रतो व्यवहारं लेखयिष्यामि यथा चारुदत्तेन वसन्तसेना मोटयित्वा मारिता । तद्यावदधिकरणमण्डपमेव गच्छामि । ... एष सोऽधिकरणमण्डपः । अत्र प्रविशामि । ...कथम् आसनानि दत्तानि तिष्ठन्ति । ...यावदागच्छन्त्यधिकरणभोजकाः तावदेतस्मिन्दूर्वाचत्वरे मुहूर्तमुपविश्य प्रतिपालयिष्यामि ।] (तथा स्थितः)

शोधनकः—(अन्यतः परिक्रम्य पुरो दृष्ट्वा) एदे अधिअरणिआ आअच्छन्ति । ता जाव उवसप्पामि । [एतेऽधिकरणिका आगच्छन्ति । तद्यावदुपसर्पामि ।] (इत्युपसर्पति)

(ततः प्रविशति श्रेष्ठिकायस्थादिपरिवृतोऽधिकरणिकः)

अधिकरणिकः—भो भोः श्रेष्ठिकायस्थौ ।

श्रेष्ठिकायस्थौ—आणवेदु अज्जो । [आज्ञापयत्वार्यः ।]

अधिकरणिकः—[अहो व्यवहारपराधीनतया दुष्करं खलु परचित्तग्रहणमधिकरणिकैः ।]

---

can be [regarded as] possible in him. Very well. Going to the Court-hall, I shall [be the] first [to] lodge a written complaint viz. Vasantasenā was murdered by Cārudatta after smothering [or, crushing] [her]. So, I shall go to the Court-hall itself. (*Walking about and beholding*) Here [is] that Court-hall. Here shall I enter [it]. (*Entering and beholding*) What ! The seats have been put in position ! Until the Court-dignitaries arrive, I shall be waiting, sitting down for a while in this quadrangle over-grown with Dūrvā grass. [*Stays accordingly*

Śodhanaka :—(*Moving in another direction, seeing before him*) Here are the Court-dignitaries coming. So, I shall approach [them]. [*Approaches*

(*Then enter the* Judge, *accompanied by* Śreṣṭhin, Kāyastha *and others*)

Judge :—Oh, you Śreṣṭhin and Kāyastha !

Śreṣṭhin and Kāyastha :—May Your Lordship command.

Judge :—Oh, owing to [their] being dependent upon the judicial procedure, comprehension of [what is in] the minds of others [is] indeed difficult to secure, by the judges.

छन्नं कार्यमुपक्षिपन्ति पुरुषा न्यायेन दूरीकृतं
(स्वान्दोषान्कथयन्ति नाधिकरणे रागाभिभूताः स्वयम् ।
तैः पक्षापरपक्षवर्धितबलैर्दोषैर्नृपः स्पृश्यते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥ ३ ॥/

अपि च

छन्नं दोषमुदाहरन्ति कुपिता न्यायेन दूरीकृताः
स्वान्दोषान्कथयन्ति नाधिकरणे सन्तोऽपि नष्टा ध्रुवम् ।
ये पक्षापरपक्षदोषसहिताः पापानि संकुर्वते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥ ४ ॥

यतः अधिकरणिकः खलु

शास्त्रज्ञः कपटानुसारकुशलो वक्ता न च क्रोधन-
स्तुल्यो मित्रपरस्वकेषु चारितं दृष्ट्वैव दत्तोत्तरः ।

Men put forth business [in a] garbled [form] and far removed from justice [or, fair play] ; they, carried by passion, (do not, of their own accord, narrate [their] own shortcomings.) The king is touched [or, contaminated] by those faults with [their] strength augmented by one [plaintiff's] side and the other [defendant's] side. In short, odium alone is easy to be had by a judge (*draṣṭā*), praise, far off ! (3)

And further,

They, getting angry, shout out [even] the hidden faults [of others], throwing to the winds [all sense of] justice ; even good men do not narrate [their] own shortcomings in a court of law, [and] undoubtedly go waste, [they] who commit sinful deeds, being associated with the crimes of one side or the other side. In short, odium alone [is] easy to be had by a judge (*draṣṭā*), praise, far off ! (4)

So, a judge indeed [has to be]

conversant with the science [of law] ; expert in tracing out fraud ; [an effective] speaker, but not one losing temper ; equal [or, impartial] towards friend, enemies, and his own [relatives] ; one giving decision only after investigating [lit. seeing all] happenings ; a protector of the weak ; a harasser of

क्लीबान्पालयिता शठान्व्यथयिता धर्म्यो न लोभान्वितो
द्वार्भावे परतत्त्वबद्धहृदयो राज्ञश्च कोपापहः ॥ ५ ॥

श्रेष्ठिकायस्थौ—अज्जस्स वि णाम गुणे दोसो त्ति वुच्चादि। जइ एव्वम् ता चन्दालोए वि अन्धआरो त्ति वुच्चदि ।.[आर्यस्यापि नाम गुणे दोष इत्युच्यते। यद्येवम् तदा चन्द्रालोकेऽप्यन्धकार इत्युच्यते ।]

अधिकरणिकः—भद्र शोधनक अधिकरणमण्डपस्य मार्गमादेशय ।

शोधनकः—एदु एदु अधिअरणभोइओ एदु। [एत्वेत्वधिकरणभोजक एतु।]

(इति परिक्रामन्ति)

शोधनकः—एदं अधिअरणमण्डवम् । ता पविसन्तु अधिअरणभोइआ। [अयमधिकरणमण्डपः । तत्प्रविशन्त्वधिकरणभोजकाः ।] (सर्वे च प्रविशन्ति)

अधिकरणिकः—भद्र शोधनक बहिर्निष्क्रम्य ज्ञायताम् कः कः कार्यार्थी इति ।

शोधनकः—जं अज्जो आणवेदि । (इति निष्क्रम्य) अज्जा अधिअरणिआ भणन्ति—को को इध कज्जत्थि त्ति। [यदार्य आज्ञापयति ।...आर्याः अधिकराणिका भणान्ति—कः क इह कार्यार्थी इति ।]

---

rogues; acting according to [the dictates of] religion; not falling a prey to greed; with [his] heart fixed only on [finding out] the highest truth by every door (*dvārbhāva*) and remover of the king's anger. (5)

Śreṣṭhin and Kāyastha :—Could the merits of even Your Lordship, be indeed spoken of as faults?—If so, then when [there is] moon-light, darkness could be said [to exist]!

Judge :—Good man, Śodhanaka, direct the way to the Court-hall.

Śodhanaka :—[Please] come, come, Your Lordship, [please] come.

[*Walk about*

Śodhanaka :—Here [is] the Court-hall! So, may the Court-dignitaries enter.

[*All of them enter*

Judge :—Good man, Śodhanaka, going out, find out—who [are] the plaintiffs?

Śodhanaka :—As Your Lordship commands. (*Going out*) Gentlemen, the judges ask—' Who [are] the plaintiffs here?'

शकारः—(सहर्षम्) उवात्थिए अधिअलणिए। (साटोपं परिक्रम्य) हग्गे वलपुलिशे मणुश्शे वाशुदेवे लश्टिअशाले लाअशाले कज्जत्थी। [उपस्थिता अधिकरणिकाः ।...अहं वरपुरुषो मनुष्यो वासुदेवो राष्ट्रियश्यालो राजश्यालः कार्यार्थी।]

शोधनकः—(ससंभ्रमम्) हीमादिक पढमं ज्जेव रट्ठिअसालो कज्जत्थी। भोदु। अज्ज मुहुत्तं चिट्ठ। दाव अधिअराणिआणं णिवेदेमि। (उपगम्य) अज्जा एसो क्खु रट्ठिअसालो कज्जत्थी ववहारं उवात्थिदो। [हन्त प्रथममेव राष्ट्रियश्यालः कार्यार्थी। भवतु। आर्य मुहूर्तं तिष्ठ। तावदधिकराणिकानां निवेदयामि।...आर्याः एष खलु राष्ट्रियश्यालः कार्यार्थी व्यवहारमुपस्थितः।]

अधिकरणिकः—कथम्। प्रथममेव राष्ट्रियश्यालः कार्यार्थी। [यथा सूर्योदय उपरागो महापुरुषनिपातमेव कथयति] शोधनक व्याकुलेनाद्य व्यवहारेण भवितव्यम्। भद्र निष्क्रम्योच्यताम् गच्छ। अद्य न दृश्यते तव व्यवहारः इति।

शोधनकः—जं अज्जो आणवेदि। (इति निष्क्रम्य शकारमुपगम्य) अज्ज अधिअरणिआ भणन्ति अज्ज गच्छ। ण दीसदि तव ववहारो। [यदार्य आज्ञापयति।...आर्य अधिकरणिका भणन्ति अद्य गच्छ। न दृश्यते तव व्यवहारः।]

Śakāra:—(*With joy*) The judges have come. (*Walking about haughtily*) I, an excellent person, a human being, Vāsudeva, king's brother-in-law, brother-in-law of the king [am] the plaintiff.

Śodhanaka :—(*In confusion*) Alas! Just at the very start, the king's brother-in-law, the plaintiff! Well. Sir, wait for a while, while I inform the judges. (*Approaching*) Gentlemen, here is indeed the king's brother-in-law attending the court [or, lodging a complaint] [as] a plaintiff.

Judge :—What! Just at the very start, the king's brother-in-law, the plaintiff! [This] like an eclipse at sun-rise foretells nothing short of (*eva*) the downfall of a great man. Śodhanaka, to-day the court-programme is pretty crowded [already, or, the case is bound to be very annoying]. Good man, going out, say—'[You may] go. Your suit cannot be heard to-day.'

Śodhanaka :—As Your Lordship commands. (*Going out, approaching* Śakāra) Sir, the judges say—'Go to-day, your suit can not be heard.'

शकारः—(सक्रोधम्) आः किं ण दीशदि मम ववहाले। जइ ण दीशदि तदो आवुत्तं लाआणं पालअं वहिणीवदिं विण्णविअ वहिणिं अत्तिकं च विण्णविअ एदं अधिअलणिअं दूले फेलिअ एत्थ अण्णं अधिअलणिअं ठावइश्शम्। [आः किं न दृश्यते मम व्यवहारः। यदि न दृश्यते तदावुत्तं राजानं पालकं भगिनीपतिं विज्ञाप्य भगिनीं मातरं च विज्ञाप्यैतमधिकरणिकं दूरीकृत्यात्रान्यमधिकरणिकं स्थापयिष्यामि।] (इति गन्तुमिच्छति)

शोधनकः—अज्ज रट्ठिअसालअ मुहुत्तअं चिट्ठ। दाव अधिअरणिआणं णिवेदेमि। (अधिकरणिकमुपगम्य) एसो रट्ठिअसालो कुविदो भणादि। [आर्य राष्ट्रियश्याल मुहूर्तं तिष्ठ। तावदधिकरणिकानां निवेदयामि। ... एष राष्ट्रियश्यालः कुपितो भणति।] (इति तदुक्तं भणति)

अधिकरणिकः—सर्वमस्य मूर्खस्य संभाव्यते। भद्र उच्यताम्—आगच्छ। दृश्यते तव व्यवहारः।

शोधनकः—(शकारमुपगम्य) अज्ज अधिअरणिआ भणन्ति—आअच्छ। दीसदि तव ववहारो। ता पविसदु अज्जो। [आर्य अधिकरणिका भणन्ति—आगच्छ। दृश्यते तव व्यवहारः। तत्प्रविशत्वार्यः।]

शकारः—पढमं भणन्ति ण दीशदि संपदं दीशदि त्ति। ता णाम भीदभीदा अधिअलणभोइआ। जेत्तिअं हग्गे भणिश्शं तेत्तिअं पत्तिआवइश्शम्। भोदु। पविशामि। (प्रविश्योपसृत्य) शुशुहं अम्हाणम् तुम्हाणं पि शुहं देमि ण

Śakāra :—(*Angrily*) What, my suit would not be heard? If it is not heard, then informing [my] brother-in-law, sister's husband King Pālaka, [and also] informing [my] sister and mother, dismissing this judge, shall I install another judge [*Desires to go away* here [in his place].

Śodhanaka :—Noble king's brother-in-law, stay for a while, while I inform the judges. (*Approaching the* Judge) Here the king's brother-in-law in anger says— [*Repeats what was said by him*

Judge :—Everything is possible in [the case of] this fool. Good man, say [to him]—'Come, your suit will be heard.'

Śodhanaka :—(*Approaching* Śakāra) Sir, the judges say—'Come, your suit will be heard.' So, may the noble one enter.

Śakāra :—First they say 'would not be heard,' now, 'would be heard'. So, surely are the judges [or, Court-dignitaries] completely awe-struck. Whatever I may be saying, I shall

दोमि अ । [प्रथमं भणान्ति न दृश्यते सांप्रतं दृश्यत इति । तन्नाम भीतभीता अधिकरणभोजकाः । यद्यदहं भाणिष्यामि तत्तत्प्रत्याययिष्यामि । भवतु । प्रविशामि । … सुसुखमस्माकम् युष्माकमपि सुखं ददामि न ददामि च ।]

अधिकरणिकः—(स्वगतम्) अहो स्थिरसंस्कारता व्यवहारार्थिनः । (प्रकाशम्) उपविश्यताम् ।

शकारः—आं अत्तणकेलका शे भूमी । ता जहिं मे लोआदि तहिं उवविशामि । (श्रेष्ठिनं प्रति) एश उवविशामि । (शोधनकं प्रति) णं एत्थ उवविशामि । (इत्यधिकरणिकमस्तके हस्तं दत्त्वा) एश उवविशामि । [आं आत्मीयैषा भूमिः । तद्यत्र मह्यं रोचते तत्रोपविशामि । … एष उपविशामि । …नन्वत्रोपविशामि … एष उपविशामि ।]

(इति भूमावुपविशति)

अधिकरणिकः—भवान्कार्यार्थी ।

शकारः—अध इं । [अथ किम् ।]

अधिकरणिकः—तत्कार्यं कथय ।

शकारः—कण्णे कज्जं कधइश्शम् । एव्वं वड्ढके मल्लकप्पमाणाह कुले हग्गे जादे । लाअशशुले मम पिदा लाआ तादइश होइ जामादा ।
लाअशिआले हग्गे ममावि बहिणीवदी लाआ ॥ ६ ॥

---

make [them] believe in all that. Very well, I shall enter. (*Entering, approaching*) We are quite all right; as for you too, I shall give or not give happiness.

Judge :—(*To himself*) Oh, the firm-mindedness of [this] plaintiff! (*Aloud*) Take a seat.

Śakāra :—Ah! [All] this ground [is my] own. So, I shall sit down where it pleases me. (*To* Śreṣṭhin) Here I shall sit, (*To* Śodhanaka) I say, I shall sit here. (*Placing his hand on the head of the* Judge) Here I shall sit. [*Sits down on the ground*

Judge :—[Are] you the plaintiff?

Śakāra :—Just so.

Judge .—Then state [your] plaint.

Śakāra :—I shall tell [my] plaint in [your] ear. I have been born in so big a family, of the measure of a Mallarka.

King's father-in-law [is] my father; the king is [my] father's son-in-law. I [am] the king's brother-in-law, [and] my sister's husband too [is] the king. (6)

[कर्णे कार्यं कथयिष्यामि । एवं बृहति मल्लकप्रमाणस्य कुलेऽहं जातः ।
राजश्वशुरो मम पिता राजा तातस्य भवति जामाता ।
राजश्यालोऽहं ममापि भगिनीपती राजा ॥]

अधिकरणिकः—सर्वं ज्ञायते ।

किं कुलेनोपदिष्टेन शीलमेवात्र कारणम् ।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥ ७ ॥

तदुच्यतां कार्यम् ।

शकारः—एव्वं भणामि । अवलद्धाह वि ण अ मे किं पि कलइश्शादि । तदो तेण बहिणीवदिणा परितुश्टेण मे कीलिदुं लक्खिदुं शव्वुज्जाणाणं पवले पुप्फकलण्डअजिण्णुज्जाणे दिण्णे । तहिं च पेक्खिदुं अणुदिअहं शोशावेदुं शोधावेदुं पोत्थावेदुं लुणावेदुं गच्छामि । देव्वजोएण पेक्खामि ण पेक्खामि वा इत्थिआशलीलं णिवडिदम् । [एवं भणामि । अपराद्धस्यापि न च मे किमपि करिष्यति । ततस्तेन भगिनीपतिना परितुष्टेन मे क्रीडितुं रक्षितुं सर्वोद्यानानां प्रवरं पुष्पकरण्डकजीर्णोद्यानं दत्तम् । तत्र च प्रेक्षितुमनुदिवसं शुष्कं कारयितुं शोधयितुं पुष्टं कारयितुं लूनं कारयितुं गच्छामि । दैवयोगेन पश्यामि न पश्यामि वा स्त्रीशरीरं निपतितम् ।]

अधिकरणिकः—अथ ज्ञायते का स्त्री विपन्नेति ।

Judge :—All [this] is [already] known [to us].

What [is the use] of referring to [or, quoting] one's family ? [One's] character alone [is] the cause here [that is, in matters like this]. Thorny trees get enormously multiplied in a good [that is, fertile] field ! (7)

So, state [your] plaint.

Śakāra :—I say this—but he [the king] would not do anything to me, even though I had committed a crime—therefore by him, [my] sister's husband, being quite pleased [with me], has been given to me the Puṣpakaraṇḍaka old garden, the best of all gardens, for playing in [and] for preserving [it]. And there, I go, day after day, to see [or, look after it], to drain [it], to cleanse [it], to make [it] have a luxuriant growth, [and] to trim [it]. By a stroke of luck, I saw—or rather, I did not see—a body of woman fallen down [or, dead].

Judge :—Now, is it known who [was] the woman [found] dead ?

शकारः—हंहो अधिअलणभोइआ किंत्ति ण जाणामि तं तालिशिं णअलमण्डणं कञ्चणशदभूशाणिअं । केण वि कुपुत्तेण अत्थकल्लवत्तश्श कालणादो शुण्णं पुप्फकलण्डअजिण्णुज्जाणं पवेशिअ[१] बाहुपाशबलक्कालेण वशन्तशेणिआ मालिदा । ण मए [अहो अधिकरणभोजकाः किमिति न जानामि तां तादृशीं नगरमण्डनं काञ्चनशतभूषणाम् । केनापि कुपुत्रेणार्थकल्यवर्तस्य कारणाच्छून्यं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य बाहुपाशबलात्कारेण वसन्तसेना मारिता । न मया] (इत्यर्धोक्ते मुखमावृणोति)

अधिकरणिकः—अहो नगररक्षिणां प्रमादः । भोः श्रेष्ठिकायस्थौ न मयेति व्यवहारपदं प्रथममभिलिख्यताम् ।

कायस्थः—जं अज्जो आणवेदि । (तथा कृत्वा) अज्ज लिहिदम् । [यदार्य आज्ञापयाति । ...आर्य लिखितम् ।]

शकारः—(स्वगतम्) हीमादिके । उत्तलाअन्तेण विअ पाअशपिण्डालकेण अज्ज मए अत्ता एव्व णिण्णाशिदो । भोदु । एव्वं दाव । (प्रकाशम्) अहो अधिअलणभोइआ णं भणामि मए ज्जेव दिट्ठा । किं कोलाहलं कलेध । very good [हीमादिके । उत्त्वरायमाणेनेव पायसपिण्डारकेणाद्य मयात्मैव निर्णाशितः । भवतु । एवं तावत्... । अहो अधिकरणभोजकाः ननु भणामि मयैव दृष्टा । किं कोलाहलं कुरुत ।]

(इति पादेन लिखितं प्रोञ्छति)

Śakāra :—Oh ! Court-dignitaries ! How [indeed] should I not know that [lady], of that [well-known] kind, the ornament of the city [and] wearing hundreds of gold ornaments ? By some wretched fellow [lit. son] was Vasantasenā killed, by a forcible assault by the noose of [his] arms, having brought her to the secluded Puṣpakaraṇḍaka old garden, for the sake of money, a bagatelle ! Not by me--[*With this half-said, he covers his mouth*

Judge :—Oh, the carelessness of the city-guards ! O Śreṣṭhin and Kāyastha, write down first 'Not by me' as a legal point [for consideration].

Kāyastha :—As Your Lordship commands. (*Doing accordingly*) Your Lordship, I have written [it down].

Śakāra :—(*To himself*) Oh God ! I have to-day, verily destroyed myself, like a beggar greedy for the [hot] Pāyasa, making [undue] haste [in gulping it down]. Well. [I shall do] this now. (*Aloud*) O Court-dignitaries ! I say, I said 'She was seen just by me.' Why are you making [all this] fuss ?

[*With his foot, wipes out what was written.*

---

१ पविशिअ ।

अधिकरणिकः—कथं त्वया ज्ञातं यथा खल्वर्थनिमित्तं बाहुपाशेन व्यापादिता।

शकारः— हंहो णूणं शूणशूणाए मोहट्ठाणाए गीवालिआए णिश्शुवण्णकेहिं ३०
आहलणट्ठाणेहिं तक्केमि। [हंहो नूनं शूनशूनया मोवस्थानया ग्रीवालिकया निःसुवर्णकैराभरणस्थानैस्तर्कयामि ।]

श्रेष्ठिकायस्थौ—जुज्जदि विअ। [युज्यत इव ।] ३३

शकारः—(स्वगतम्) दिश्टिआ पच्चुज्जीविदम्हि। अविद मादिके। [दिष्ट्या प्रत्युज्जीवितोऽस्मि । अविद मादिके ।]

श्रेष्ठिकायस्थौ—भो कं एसो ववहारो अवलम्बदि। [भोः कमेष व्यव- ३६
हारोऽवलम्बते ।]

अधिकरणिकः—इह हि द्विविधो व्यवहारः।

श्रेष्ठिकायस्थौ—केरिसो। [कीदृशः ।] ३९

अधिकरणिकः—वाक्यानुसारेण अर्थानुसारेण च। यस्तावद्वाक्यानुसारेण स खल्वर्थिप्रत्यर्थिभ्यः। यश्चार्थानुसारेण स चाधिकरणिकबुद्धिनिष्पाद्यः।

श्रेष्ठिकायस्थौ—ता वसन्तसेणामादरं अवलम्बदि ववहारो। [तद्वसन्त- ४२
सेनामातरमवलम्बते व्यवहारः ।]

Judge :—How did you know that she was indeed killed by the noose of the arms [that is, by strangulation] for the sake of money ?

Śakāra :—Oh ! Surely I could guess [that] from [her] neck quite bare and swollen, and the spots for [wearing] ornaments void of gold [ornaments].

Śresṭhin and Kāyastha :—[It is] plausible enough.

Śakāra :—(*To himself*) Thank God ! (*diṣṭyā*). I have been brought back to life ! Ha ! Ha !

Śresṭhin and Kāyastha :—Oh, whom does the plaint concern ?

Judge :—Here [in law] indeed, a plaint [is] of two kinds.

Śresṭhin and Kāyastha :—Of what nature ?

Judge :—In accordance with the depositions and in accordance with facts. [The plaint] which is in accordance with depositions, that concerns the plaintiffs and the defendants; that which [is] in accordance with facts, has to be decided by the Judge's wisdom.

Śresṭhin and Kāyastha :—So, the plaint concerns Vasantasenā's mother.

अधिकरणिकः—एवमिदम् । भद्र शोधनक वसन्तसेनामातरमनुद्वेजयन्नाह्वय ।

शोधनकः—तधा । (इति निष्क्रम्य गणिकामात्रा सह प्रविश्य) एदु एदु अज्जा । [तथा ।...एत्वेत्वार्यां ।]

वृद्धा—गदा मे दारिआ मित्तघरअं अत्तणो जोव्वणं अणुभविदुम् । एसो उण दीहाऊ भणादि—आअच्छ । आधिअराणिओ सद्दावेदि । ता मोहपरवसं विअ अत्ताणअं अवगच्छामि । हिअअं मे थरथरेदि । अज्ज आदेसेहि मे आधिअरणमण्डवस्स मग्गम् । [गता मे दारिका मित्रगृहमात्मनो यौवनमनुभवितुम् । एष पुनर्दीर्घायुर्भणाति—आगच्छ । आधिकराणिक आह्वयाति । तन्मोहपरवशामिवात्मानमवगच्छामि । हृदयं मे प्रकम्पते । आर्य आदिश मह्यमधिकरणमण्डपस्य मार्गम् ।]

शोधनकः—एदु एदु अज्जा । [एत्वेत्वार्या ।] (उभौ परिक्रामतः)

शोधनकः—एदं अधिअरणमण्डवम् । एत्थ पविसदु अज्जा । [एषोऽधिकरणमण्डपः । अत्र प्रविशत्वार्या ।] (इत्युभौ प्रविशतः)

वृद्धा—(उपसृत्य) सुहं तुम्हाणं भोदु भावमिस्साणम् । [सुखं युष्माकं भवतु भावमिश्राणाम् ।]

अधिकरणिकः—भद्रे स्वागतम् । आस्यताम् ।

वृद्धा—तधा । [तथा ।] (इत्युपविष्टा)

Judge :—It [is] so. Good man, Śodhanaka, summon Vasantasenā's mother, without alarming [her].

Śodhanaka :—Very well. (*Going out, and re-entering with the courtesan-mother*) Come, come, Madam.

Vṛddhā :—My daughter is gone to [her] friend's house to enjoy her youth. While this long-lived one says—'Come, the Judge summons [you].' So, I find myself as though subjected to a fainting fit; my heart shakes violently; (*pra*). Sir, direct me the way to the Court-hall.

Śodhanaka :— Come, come, Madam. [*Both walk about*

Śodhanaka :—This [is] the Court-hall. May Madam enter here. [*Both enter into it*

Vṛddhā :—(*Approaching*) May there be happiness for you, honourable gentlemen !

Judge :—Good lady ! Welcome ! Take a seat.

Vṛddhā :—All right. [*Sits down*

शकारः—(साक्षेपम्) आगदाशि वुड्ढकुट्टणि आगदाशि । [आगतासि वृद्धकुट्टिनि आगतासि ।]

अधिकरणिकः—अये त्वं किल वसन्तसेनाया माता । ६३

वृद्धा—अध इं । [अथ किम् ।]

अधिकरणिकः—अथेदानीं वसन्तसेना क्व गता ।

वृद्धा—मित्तघरअम् । [मित्रगृहम् ।] ६६

अधिकरणिकः—किंनामधेयं तस्या मित्रम् ।

वृद्धा—(स्वगतम्) हद्धी हद्धी। अदिलज्जणीअं क्खु एदम्। (प्रकाशम्) जणस्स पुच्छणीओ अअं अत्थो ण उण अधिअरणिअस्स । [हा धिक् हा धिक्। ६९ अतिलज्जनीयं खल्वेतत् । ... जनस्य पृच्छनीयोऽयमर्थः न पुनरधिकरणिकस्य ।]

अधिकरणिकः—अलं लज्जया । व्यवहारस्त्वां पृच्छति ।

श्रेष्ठिकायस्थौ—ववहारो पुच्छदि । णत्थि दोसो । कधेहि । [व्यवहारः ७२ पृच्छति । नास्ति दोषः । कथय ।]

वृद्धा—कधं ववहारो । जइ एव्वम् ता सुणन्तु अज्जमिस्सा । सो क्खु सत्थवाहविणअदत्तस्स णत्तिओ साअरदत्तस्स तणओ सुगहिदणामहेओ अज्ज- ७५
चारुदत्तो णाम सेट्ठिचत्तरे पडिवसदि। तहिं मे दारिआ जोव्वणसुहं अणुभवदि।

Śakāra :—(*Revilingly*) You have come ! [O] old procuress, you have come ?

Judge :—Oh, [are] you indeed Vasantasenā's mother ?

Vṛddhā :—Just so.

Judge :—And now, where is Vasantasenā gone ?

Vṛddhā :—To the house of [her] friend.

Judge :—What [is] the name of her friend ?

Vṛddhā :—(*To herself*) Oh fie ! Oh fie ! This [is] indeed very shameful. (*Aloud*) This information should be asked for by [an ordinary] person, not by a Judge !

Judge :—No need to feel ashamed ! The legal procedure asks you !

Śreṣṭhin and Kāyastha :—The legal procedure asks. [So], there is no harm. Inform [us].

Vṛddhā :—What, legal procedure ? If so, then let the honourable gentlemen hear. He indeed, the grandson of the merchant Vinayadatta, the son of Sāgaradatta, by name the

[कथं व्यवहारः। यद्येवम् तदा शृण्वन्त्वार्यमिश्राः । स खलु सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य तनयः सुगृहीतनामधेय आर्यचारुदत्तो नाम श्रेष्ठिचत्वरे प्रतिवसति । तत्र मे दारिका यौवनसुखमनुभवति ।]

शकारः—शुदं अज्जेहिं। लिहीअन्दु एदे अक्खला। चालुदत्तेण शह मम विवादे। [श्रुतमार्यैः। लिख्यन्तामेतान्यक्षराणि। चारुदत्तेन सह मम विवादः।]

श्रेष्ठिकायस्थौ—चारुदत्तो मित्तो त्ति णत्थि दोसो। [चारुदत्तो मित्रमिति नास्ति दोषः।]

अधिकरणिकः—व्यवहारोऽयं चारुदत्तमवलम्बते ।

श्रेष्ठिकायस्थौ—एव्वं विअ । [एवमिव ।]

अधिकरणिकः—धनदत्त वसन्तसेनार्यचारुदत्तस्य गृहं गतेति लिख्यतां व्यवहारस्य प्रथमः पादः। कथम्। आर्यचारुदत्तोऽप्यस्माभिराह्वाययितव्यः। अथवा व्यवहारस्तमाह्वयति । भद्र शोधनक गच्छ ।(आर्यचारुदत्तं स्वैरमसंभ्रान्तमनुद्विग्नं सादरमाह्वय प्रस्तावेन— अधिकरणिकस्त्वां द्रष्टुमिच्छति इति ।)

शोधनकः—जं अज्जो आणवेदि । (इति निष्क्रान्तः। चारुदत्तेन सह प्रविश्य च) एदु एदु अज्जो। [यदार्य आज्ञापयति ।... एत्वेत्वार्यः ।]

noble Cārudatta whose name is auspiciously invoked, resides in the Merchant-square. There my daughter enjoys the pleasures of youth.

Śakāra :—Did you hear, gentlemen? Let these words be written down. My complaint [is] against Cārudatta.

Śreṣṭhin and **Kāyastha** :—There is no harm in that Cārudatta [is her] friend.

Judge :—This plaint [now] concerns Cārudatta.

Śreṣṭhin and **Kāyastha** :—[It looks] like that.

Judge :—Dhanadatta, 'Vasantasenā went to the house of Cārudatta '—write down this as the first part [or, starting point] of the investigation. What! Even the noble Cārudatta has to be caused to be summoned by us? Or, [it is] the legal procedure [that] summons him. Good man, Śodhanaka, go. Invite the noble Cārudatta, gently, without excitement, without alarm [and] with respect, with the introductory [words]—' The Judge desires to see you.'

Śodhanaka :—As Your Lordship commands. (*Exit*, *and entering with* Cārudatta) Come, come, Sir.

चारुदत्तः—(विचिन्त्य)

परिज्ञातस्य मे राज्ञा शीलेन च कुलेन च।
यत्सत्यमिदमाह्वानमवस्थामभिशङ्कते ॥ ८ ॥

(सवितर्कं स्वगतम्)

ज्ञातो हि किं नु खलु बन्धनविप्रयुक्तो
मार्गागतः प्रवहणेन मयापनीतः।
चारेक्षणस्य नृपतेः श्रुतिमागतो वा
येनाहमेवमभियुक्त इव प्रयामि ॥ ९ ॥

अथवा किं विचारितेन। अधिकरणमण्डपमेव गच्छामि। भद्र शोधनक आधिकरणस्य मार्गमादेशय।

शोधनकः—एदु एदु अज्जो। [एत्वेत्वार्यः।] (इति परिक्रामतः)

चारुदत्तः—(सशङ्कम्) तत्किमपरम्।

रूक्षस्वरं वाशति वायसोऽयममात्यभृत्या मुहुराह्वयन्ति।
सव्यं च नेत्रं स्फुरति प्रसह्य ममानिमित्तानि हि खेदयन्ति ॥ १० ॥

शोधनकः—एदु एदु अज्जो सैरं असंभन्तम्। [एत्वेत्वार्यः स्वैरमसंभ्रान्तम्।]

Cārudatta :—(*Thinking*)

This summoning of me known to the king in point of character and family, bespeaks, to tell the truth, apprehension owing to my state [of poverty]. (8)

(*Thoughtfully, to himself*)

Could it be indeed that he, broken loose from prison and come to the road and carried off by me in [my] car, has been found out? Or, has [he] been heard of by the king whose eyes are the spies, that I am thus proceeding like an accused person? (9)

Or, what [is the use] of brooding over [this]? I shall go to the Court-hall itself. Good man, Śodhanaka, direct the way to the Court.

Śodhanaka :—Come, come, Sir. [*Walk about*

Cārudatta :—(*Apprehensively*) And what [is] this further?

This crow is shouting up in a harsh voice; the messengers of the minister are calling [me] constantly; and the left eye is throbbing forcibly; [these] evil omens indeed cause [me] anguish. (10)

Śodhanaka :—Come, come, Sir, gently, [and] without excitement.

चारुदत्तः—(परिक्रम्याग्रतोऽवलोक्य च)

शुष्कवृक्षस्थितो ध्वाङ्क्ष आदित्याभिमुखस्तथा ।
मयि चोदयते वामं चक्षुर्घोरमसंशयम् ॥ ११ ॥

(पुनरन्यतोऽवलोक्य) अये कथमयं सर्पः ।

मयि विनिहितदृष्टिर्भिन्ननीलाञ्जनाभः
स्फुरितविततजिह्वः शुक्लदंष्ट्राचतुष्कः ।
अभिपतति सरोषो जिम्हिताध्मातकुक्षि-
र्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः ॥ १२ ॥

अपि च इदम् ।

स्खलति चरणं भूमौ न्यस्तं न चार्द्रतमा मही
स्फुरति नयनं वामो बाहुर्मुहुश्च विकम्पते ।
शकुनिरपरश्चायं तावद्विरौति हि नैकशः
कथयति महाघोरं मृत्युं न चात्र विचारणा ॥ १३ ॥

सर्वथा देवताः स्वस्ति करिष्यन्ति ।

Cārudatta :—(*Walking about and looking in front*)

[This] crow resting on a dried up tree and likewise facing the sun, is casting [his] left eye at me. Undoubtedly [something] terrible [is going to happen] ! (11)

(*Again looking in another direction*) Ah ! What, here [is] a serpent !

With his eyes fixed on me, resembling [in colour] powdered antimony, with [his] lolling tongue stretched forth, possessing a quartette of white fangs, rushes on, in anger, with [his] belly swollen and coiled, this lord of serpents [who had been] lying asleep, blocking my path. (12)

And further this—

[My] foot placed on the ground slips [or, stumbles], but the ground [is] not very wet [or, muddy, to cause this stumbling] ; [my left] eye throbs ; [my] left arm trembles on repeatedly. And this another bird just cries about not once [that is, constantly]—[this] indicates very terrible death ; no doubt about this either ! (13)

[I hope] the Deities would grant welfare in every way !

शोधनकः—एदु एदु अज्जो । इमं अधिअरणमण्डवं पविसदु अज्जो । [एत्वेत्वार्यः । इममधिकरणमण्डपं प्रविशत्वार्यः ।]

चारुदत्तः—(प्रविश्य समन्तादवलोक्य) अहो अधिकरणमण्डपस्य पराश्रीः । इह हि

चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशङ्खाकुलं
पर्यन्तस्थितचारनक्रमकरं नागाश्वहिंस्राश्रयम् ।
नानावाशककङ्कपक्षिनिचितं कायस्थसर्पास्पदं
नीतिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते ॥ १४ ॥

भवतु । (प्रविशञ्छिरोघातमभिनीय सवितर्कम्) अहह इदमपरम् ।

सव्यं मे स्पन्दते चक्षुर्विरौति वायसस्तथा ।
पन्थाः सर्पेण रुद्धोऽयं स्वस्ति चास्मासु दैवतः ॥ १५ ॥

तावत्प्रविशामि । (इति प्रविशति)

अधिकरणिकः—अयमसौ चारुदत्तः । य एषः

Śodhanaka :—Come, come, Sir! May the noble one enter this Court-hall!

Cārudatta :—(*Entering, looking all round*) Oh, the superb beauty of the Court-hall. For, here—

The Royal Court of justice owing to the destructive agencies [also, animals] looks like the sea, with water in the form of advocates (*mantrin*) devoted to and plunged in thought; crowded with waves and conches in the form of messengers [or, ushers]; with crocodiles and fishes in the form of spies stationed within [its] precincts; the resort of destructive creatures in the form of elephants and horses; crowded with the Kaṅka birds in the form of the various touts; the abode of serpents in the form of Kāyasthas [court-scribes]; and with the shores trodden upon by rules of procedure! (14)

Very well (*Entering, gesticulating his head being struck, thoughtfully*) Alas! Here [is] another [evil omen]!

My left eye throbs and likewise the crow cries on; this path [was] blocked by a serpent—May the Gods yet [grant] welfare to us! (15)

[*Goes in*

I shall now enter.

Judge :—Here [is] that Cārudatta! He who

घोणोन्नतं मुखमपाङ्गविशालनेत्रं
नैतद्धि भाजनमकारणदूषणानाम्।
नागेषु गोषु तुरगेषु तथा नरेषु
नह्याकृतिः सुसदृशं विजहाति वृत्तम् ॥ १६ ॥

चारुदत्तः—भोः अधिकृतेभ्यः स्वस्ति। हंहो नियुक्ताः अपि कुशलं भवताम्।

अधिकरणिकः—(ससंभ्रमम्) स्वागतमार्यस्य। भद्र शोधनक आर्यस्यासनमुपनय।

शोधनकः—(आसनमुपनीय) एदं आसनम्। एत्थ उववितदु अज्जो। [एतदासनम्। अत्रोपविशत्वार्यः।]

(चारुदत्त उपविशति)

शकारः—(सक्रोधम्) आगदेशि ले इश्थिआघादआ आगदेशि। अहो णाए ववहाले अहो धम्मे ववहाले जं एदाह इश्थिआघादकाह आशणे दीअदि। (सगर्वम्) भोदु। णं दीअदु। [आगतोऽसि रे स्त्रीघातक आगतोऽसि। अहो न्याय्यो व्यवहारः अहो धर्म्यो व्यवहारः यदेतस्मै स्त्रीघातकायासनं दीयते। ...भवतु। ननु दीयताम्।]

अधिकरणिकः—आर्य चारुदत्त अस्ति भवतोऽस्या आर्याया दुहित्रा सह प्रसक्तिः प्रणयः प्रीतिर्वा।

[has] a face with a prominent nose, with eyes extended at the corners; not surely [can] this [be] the receptacle of crimes [attributed to it] without any cause! In [the case of] elephants, bulls, horses and likewise men, an excellent form never is bereft of [lit. abandons] conduct well in keeping with [it]! (16)

Cārudatta :—Oh, welfare to the Officers! Hallo! Assessors, does it fare well with you?

Judge :—(*In confusion*) Welcome to the noble one! Good man, Śodhanaka, bring a seat for the noble one.

Śodhanaka :—(*Bringing a seat*) Here [is] the seat. May the noble one be seated on it.

[Cārudatta *takes his seat*

Śakāra :—(*In rage*) You have come, O woman-killer, you have come! Oh, [how] just the legal procedure! Oh, [how] righteous the legal procedure, that a seat is offered to this woman-killer! (*Proudly*) All right! I say, let [it] be given [to him].

Judge :—Noble Cārudatta, have you any attachment, affection or love for the daughter of this noble lady?

चारुदत्तः—कस्याः ।

अधिकरणिकः—अस्याः । (इति वसन्तसेनामातरं दर्शयति)

चारुदत्तः—(उत्थाय) आर्ये अभिवादये ।

वृद्धा—जाद चिरं मे जीव । (स्वगतम्) अअं सो चारुदत्तो । सुणिक्खित्तं क्खु दारिआए जोव्वणम् [जात चिरं मे जीव ।...अयं स चारुदत्तः । सुनिक्षिप्तं खलु दारिकया यौवनम् ।]

अधिकरणिकः—आर्य गणिका तव मित्रम् । (चारुदत्तो लज्जां नाटयति)

शकारः—लज्जाए भीलुदाए वा चालित्तं आलिए णिगूहिदुम् ।
शअं मालिअ अत्थकालणा दाणिं गूहदि ण तं हि भट्टके ॥१७॥
[लज्जया भीरुतया वा चारित्र्यमलीकं निगूहितुम् ।
स्वयं मारयित्वार्थकारणादिदानीं गूहति न तद्धि भट्टकः ॥]

श्रेष्ठिकायस्थौ—अज्जचारुदत्त भणाहि । अलं लज्जाए । ववहारो क्खु एसो । [आर्यचारुदत्त भण । अलं लज्जया । व्यवहारः खल्वेषः ।]

चारुदत्तः—(सलज्जम्) भो अधिकृताः मया कथमीदृशं वक्तव्यम् यथा गणिका मम मित्रमिति । अथवा यौवनमत्रापराध्यति न चारित्र्यम् ।

Cārudatta :—Whose ?

Judge :—Of this [lady]. [*Points out* Vasantasenā's *mother*

Cārudatta :—(*Rising up*) Madam, I salute [you].

Vṛddhā :—Dear one, live long for me ! (*To herself*) This [is] that Cārudatta ! [My] daughter has indeed very well deposited [her] youth !

Judge :—Sir, [is] the courtesan your friend ?

[Cārudatta *gesticulates bashfulness*

Śakāra :—

In order to conceal [his] false conduct, through shame or through cowardice, having himself killed [her] for the sake of money, would indeed the Master [said sarcastically of Cārudatta] conceal [it] now ; but that [would] not [do]. (17)

Śreṣṭhin and Kāyastha :—Noble Cārudatta ! [Do] speak out. No need to feel shame [lit. enough of shame]. This [is] indeed [but] the legal procedure !

Cārudatta :—(*Bashfully*) O officers ! How can I say such a thing viz. ' A courtesan [is] my friend ? ' Or, [it is] youth that is the culprit here, not [my] character.

अधिकरणिकः—व्यवहारः सविघ्नोऽयं त्यज लज्जां हृदि स्थिताम् ।
ब्रूहि सत्यमलं धैर्यं छलमत्र न गृह्यते ॥ १८ ॥

अलं लज्जया । व्यवहारस्त्वां पृच्छति ।

चारुदत्तः—अधिकृत केन सह मम व्यवहारः ।

शकारः—(साटोपम्) अले मए शह ववहाले । [अरे मया सह व्यवहारः ।]

चारुदत्तः—त्वया सह मम व्यवहारः सुदुःसहः ।

शकारः—अले इश्थिआघादआ तं तालिशिं लअणशदभूशणिअं वशन्तशेणिअं मालिअ शंपदं कवडकावडिके भविअ णिगूहेशि । [अरे स्त्रीघातक तां तादृशीं रत्नशतभूषणां वसन्तसेनां मारयित्वा सांप्रतं कपटकापटिको भूत्वा निगूहसि ।]

चारुदत्तः—असंबन्द्धः खल्वसि ।

अधिकरणिकः—आर्यचारुदत्त अलमनेन । ब्रूहि सत्यम् । अपि गणिका तव मित्रम् ।

चारुदत्तः—एवमेव ।

अधिकरणिकः—आर्य वसन्तसेना क ।

Judge :—

This legal procedure [is] full of inconvenient [or awkward] positions; give up bashfulness felt in the heart; speak the truth; [have] firmness of mind competent enough [to speak out the truth]; no quibbling would be accepted here. (18)

No need to feel ashamed! [It is] the legal procedure [that] asks you.

Cārudatta :—Officer, [or, Judge] whom does my suit concern [or, with whom have I to contend legally] ?

Śakāra :—(*Arrogantly*) Oh, with me [your] suit.

Cārudatta :—My suit with you [is] very difficult to bear [or, sustain].

Śakāra :—O woman-killer, having killed that [well-known] Vasantasenā, of that type [that is, so lovely], adorned with hundreds of jewels, you are now concealing [it], having become a fraud *par excellence* ?

Cārudatta :—You are indeed [getting very] absurd.

Judge :—Noble Cārudatta, enough of him. Tell the truth [Is] the courtesan your friend ?

Cārudatta :—Quite so.

Judge :—Sir, where [is] Vasantasenā ?

चारुदत्तः—गृहं गता ।

श्रेष्ठिकायस्थौ—कथं गदा कदा गदा गच्छन्ती वा केण अणुगदा । [कथं गता कदा गता गच्छन्ती वा केनानुगता ।]

चारुदत्तः—(स्वगतम्) किं प्रच्छन्नं गतेति ब्रवीमि ।

श्रेष्ठिकायस्थौ—अज्ज कधेहि । [आर्य कथय ।]

चारुदत्तः—गृहं गता । किमन्यद्ब्रवीमि ।

शकारः—ममकेलकं पुप्फकलण्डअजिण्णुज्जाणं पवेशिअ अत्थणिमित्तं बाहुपाशबलक्कालेण मालिदा । अए शंपदं वदाशि घलं गदे त्ति । [मदीयं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्यार्थनिमित्तं बाहुपाशबलात्कारेण मारिता । अये सांप्रतं वदसि गृहं गतेति ।]

चारुदत्तः—आः असंबद्धप्रलापिन्

अभ्युक्षितोऽसि सलिलैर्न बलाहकानां
चाषाग्रपक्षसदृशं भृशमन्तराले ।
मिथ्यैतदाननमिदं भवतस्तथाहि
हेमन्तपद्मामिव निष्प्रभतामुपैति ॥ १९ ॥

अधिकरणिकः—(जनान्तिकम्)

Cārudatta :—She went home.

Śreṣṭhin and Kāyastha :—How did she go? When did she go? And by whom was she accompanied as she went?

Cārudatta :—(*To himself*) Shall I say that she went in a concealed manner?

Śreṣṭhin and Kāyastha :—Sir, speak out.

Cārudatta :—She went home. What else can I say?

Śakāra :—Having made [her] enter my Puṣpakaraṇḍaka old garden, you killed [her] for the sake of money, forcibly with the noose of [your] arms [that is, by strangulation]. Oh, now you [have the cheek to] say—'She went home.'

Cārudatta :—Oh, [you] irrelevant talker!

You have not been profusely sprinkled over by the waters from the clouds in the sky, like the ends of the wings of the Cāṣa [bird]. This [what you say, is] false. Thus, this face of yours is becoming bereft of lustre like a lotus in winter. (19)

Judge :—(*Aside*)

तुलनं चाद्रिराजस्य समुद्रस्य च तारणम् ।
ग्रहणं चानिलस्येव चारुदत्तस्य दूषणम् ॥ २० ॥

(प्रकाशम्) आर्यचारुदत्तः खल्वसौ। कथमिदमकार्यं करिष्यति । (घोणो (९।१६) इत्यादि पठति)

शकारः—किं पक्खवादेण ववहाले दीशदि। [किं पक्षपातेन व्यवहारो दृश्यते।]

अधिकरणिकः—अपेहि मूर्ख

विशेषोक्ति 3.
कारण is there
but effect is not
there

✓ वेदार्थान्प्राकृतस्त्वं वदसि न च ते जिह्वा निपतिता
मध्याह्ने वीक्षसेऽर्कं न तव सहसा दृष्टिर्विचलिता ।
दीप्ताग्नौ पाणिमन्तः क्षिपसि स च ते दग्धो भवति नो
चारित्र्याच्चारुदत्तं चलयसि न ते देहं हरति भूः ॥ २१ ॥

आर्यचारुदत्तः कथमकार्यं करिष्यति ।

कृत्वा समुद्रमुदकोच्छ्रयमात्रशेषं
दत्तानि येन हि धनान्यनपेक्षितानि ।

Imputing a crime to Cārudatta [is] weighing the Lord of mountains [Himālaya] or the crossing of the ocean, or the grasping of the wind! (20)

(*Aloud*) He [is] indeed the noble Cārudatta. How would he do this base deed? [*Repeats IX. 16*, '*a face with a prominent nose*' *etc.*

Śakāra:—What, is the investigation being carried with partiality?

Judge:—Get away, fool!

A low-caste fellow, you are talking of [or, expounding] the sense of the Vedas, yet your tongue has not fallen off! You are looking at the sun at mid-day, [yet] your eyes have not suddenly moved off [from their sockets]! You are thrusting [your] hand in the blazing fire, yet that your [hand] has not been burnt off! You are shaking off Cārudatta from [his noble] character, [yet] the earth is not removing [that is, swallowing] your body! (21)

How could the noble Cārudatta be doing a base deed?

He, by whom, having made the ocean [full of jewels] have only the surging mass of water remaining [with it], was indeed given away unthought of riches,—how possibly could the high-souled one, the one treasure of [all] auspicious

---

[1] न च ते तत्क्षणं दहतेऽसौ ।

स श्रेयसां कथमिवैकनिधिर्महात्मा
पापं करिष्यति धनार्थमवैरिजुष्टम् ॥ २२ ॥

वृद्धा—हदास जो तदाणिं णासीकिदं सुवण्णभण्डअं रत्तिं चोरेहिं अवहिदं त्ति तस्स कारणादो चदुस्समुद्दसारभूदं रअणावलिं देदि सो दाणिं अत्थकल्लवत्तस्स कारणादो इमं अकज्जं करेदि । हा जादे एहि मे पुत्ति । [हताश यस्तदानीं न्यासीकृतं सुवर्णभाण्डं रात्रौ चौरैरपहृतमिति तस्य कारणाच्चतुःसमुद्रसारभूतां रत्नावलीं ददाति स इदानीमर्थकल्यवर्तस्य कारणादिदमकार्यं करोति । हा जाते एहि मे पुत्रि ।] (इति रोदिति)

अधिकरणिकः—आर्य चारुदत्त किमसौ पद्भ्यां गता उत प्रवहणेनेति ।

चारुदत्तः—ननु मम प्रत्यक्षं न गता । तन्न जाने किं पद्भ्यां गता उत प्रवहणेनेति ।

(प्रविश्य सामर्षः) **वीरकः**—

पादप्पहारपरिभवविमाणणाबद्धगरुअवेरस्स ।
अणुसोअन्तस्स इअं कधं पि रत्ती पभादा मे ॥ २३ ॥

ता जाव अधिअरणमण्डवं उवसप्पामि । (प्रवेष्टकेन) सुहं अज्जमिस्साणम् ।

[पादप्रहारपरिभवविमाननाबद्धगुरुकवैरस्य ।
अनुशोचत इयं कथमपि रात्रिः प्रभाता मे ॥

तद्यावदधिकरणमण्डपमुपसर्पामि । ...सुखमार्यमिश्राणाम् ।]

---

qualities, be committing for the sake of money, a sin [or, crime] not practised [even] by [one's] enemies ! (22)

Vṛddhā :—Wretch ! He, who gave the jewel-necklace, the essence of the four seas, on account of the bunch of gold ornaments deposited [with him] on that occasion, because it was carried off by thieves at night—would he do this base deed now for the sake of money, a mere bagatelle ! Alas ! Dear daughter, come, my daughter ! [*Weeps*

Judge :—Noble Cārudatta, did she go on foot or by car ?

Cārudatta :—I say, she did not move off in my presence; so, I do not know whether she went on foot or by car.

time limit

(*Entering, full of rage*) **Vīraka** :—

Somehow or other, this night turned into dawn for me, while I was lamenting, I who entertained [feelings of] bitter hatred [towards Candanaka] owing to the insult caused by the humiliation of being struck by the foot ! (23)

So, I shall get on to the Court-hall. (*Going in*) Is it all right with you, honourable gentlemen ?

---

१ धनार्थमर्वारजुष्टम् ।

अधिकरणिकः—अये नगररक्षाधिकृतो वीरकः। वीरक किमागमनप्रयोजनम्।

वीरकः—ही बन्धणभेअणसंभमे अज्जकं अण्णेसन्तो ओवाडिदं पवहणं वच्चादि त्ति विआरं करन्तो अण्णेसन्तो अरे तुए वि आलोइदे मए वि आलोइदव्वो त्ति भणन्तो ज्जेव चन्दणमहत्तरएण पादेन ताडिदो म्हि। एदं सुणिअ अज्जामिस्सा पमाणम्। [ही बन्धनभेदनसंभ्रमे आर्यकमन्वेषयन् अपवारितं प्रवहणं व्रजतीति विचारं कुर्वन्नन्वेषयन् अरे त्वयाप्यालोकितम् मयाप्यालोकितव्यम् इति भणन्नेव चन्दनमहत्तरकेण पादेन ताडितोऽस्मि। एतच्छ्रुत्वार्यमिश्राः प्रमाणम्।]

अधिकरणिकः—भद्र जानीषे कस्य तत्प्रवहणमिति।

वीरकः—इमस्स अज्जचारुदत्तस्स। वसन्तसेणा आरूढा पुप्फकरण्डअजिण्णुज्जाणं कीलिदुं णीअदि त्ति पवहणवाहएण कहिदम्। [अस्यार्यचारुदत्तस्य। वसन्तसेनारूढा पुष्पकरण्डकजीर्णोद्यानं क्रीडितुं नीयत इति प्रवहणवाहकेन कथितम्।]

शकारः—पुणो वि शुदं अज्जेहिं। [पुनरपि श्रुतमार्यैः।]

Judge :—Oh, [it is] Vīraka, the Police Commissioner! Vīraka, what [is] the purpose of [your] arrival?

Vīraka :—Ha! Searching for Āryaka, in the confusion caused by [his] breaking through the prison, getting suspicious, because a closed car was passing, and about to search [it], I was struck by the foot by Captain Candanaka, while I was just only saying 'Oh, although you have inspected [it], I too have to inspect [it].' Having heard this, the honourable gentlemen [are] the authority [to decide what to do].

Judge :—Good man, did you find out whose [was] that car?

Vīraka :—Of this noble Cārudatta. 'Vasantasenā [is] occupying [the car, and] is being taken to the Puṣpakaraṇḍaka old garden, for sport'—this was the statement made by the car-driver.

Śakāra :—Did you hear [it] once again, gentlemen!

अधिकरणिकः—

एष भो निर्मलज्योत्स्नो राहुणा ग्रस्यते शशी ।
जलं कूलावपातेन प्रसन्नं कलुषायते ॥ २४ ॥

वीरक पश्चादिह भवतो न्यायं द्रक्ष्यामः । य एषोऽधिकरणद्वार्यश्वस्तिष्ठति तमेनमारुह्य गत्वा पुष्पकरण्डकोद्यानम् दृश्यतामस्ति तत्र काचिद्विपन्ना स्त्री न वेति ।

वीरकः—जं अज्जो आणवेदि । (इति निष्क्रान्तः । प्रविश्य च) गदोम्हि तहिं । दिट्ठं च मए इत्थिआकलेवरं सावएहिं विलुप्पन्तम् । [यदार्य आज्ञापयति । ...गतोऽस्मि तत्र । दृष्टं च मया स्त्रीकलेवरं श्वापदैर्विलुप्यमानम् ।]

श्रेष्ठिकायस्थौ—कथं तुए जाणिदं इत्थिआकलेवरं ति । [कथं त्वया ज्ञातं स्त्रीकलेवरमिति ।]

वीरकः—सावसेसेहिं केसहत्थपाणिपादेहिं उवलक्खिदं मए । [सावशेषैः केशहस्तपाणिपादैरुपलक्षितं मया ।]

अधिकरणिकः—अहो धिग्वैषम्यं लोकव्यवहारस्य ।

Judge :—

Here, oh, is being swallowed up by Rāhu, the moon with pure [or, clear] moon-light ; clear [or, transparent] water is being rendered muddy by the falling in of the bank. (24)

Vīraka, we shall look into your case here afterwards. This steed here which is stationed at the Court-entrance—mounting this same [horse] [and] going to the Puṣpakaraṇḍaka garden, see if any woman is lying dead there or not.

Vīraka :—As Your Lordship commands. (*Exit, then entering*) I had gone there ; and by me was seen the dead body of a woman, being devoured by the beasts.

Śreṣṭhin and **Kāyastha** :—How did you know that it was the dead body of a woman ?

Vīraka :—I marked that by the long hair, hands, and feet with some portions left [still].

Judge :—Oh, fie upon the complications of the happenings in the world [or, the difficulty of investigation of peoples' doings] !

यथा यथेदं निपुणं विचार्यते तथा तथा संकटमेव दृश्यते ।
अहो सुसम्ना व्यवहारनीतयो मतिस्तु गौः पङ्कगतेव सीदति ॥ २५ ॥

चारुदत्तः—(स्वगतम्)

यथैव पुष्पं प्रथमे विकाशे समेत्य पातुं मधुपाः पतन्ति ।
एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्था बहुलीभवन्ति ॥ २६ ॥

अधिकरणिकः—आर्यचारुदत्त सत्यमभिधीयताम् ।

चारुदत्तः—दुष्टात्मा परगुणमत्सरी मनुष्यो
रागान्धः परमिह हन्तुकामबुद्धिः ।
किं यो यद्वदति मृषैव जातिदोषा-
त्तद्ग्राह्यं भवति न तद्विचारणीयम् ॥ २७ ॥

innocence

अपि च
योऽहं लतां कुसुमितामपि पुष्पहेतो-
राकृष्य नैव कुसुमावचयं करोमि ।
सोऽहं कथं भ्रमरपक्षरुचौ सुदीर्घे
केशे प्रगृह्य रुदतीं प्रमदां निहन्मि ॥ २८ ॥

The more this [case] is looked into carefully, the more does it appear to be nothing but a puzzle. Oh, the points of legal procedure are well settled down, but [my] judgment sinks down [that is, refuses to believe in the logical conclusion] like a cow stuck up in mud. (25)

Cārudatta :—(*To himself*)

Even just as the bees, crowding together, fall upon a flower at [its] first blooming up to drink [the honey], in the same way, in the bad days [or, times of misery] of a man, troubles [or, disasters] multiply at the weak points. (26)

Judge :—Noble Cārudatta, [please] tell the truth.

Cārudatta :—

Whatever a man, evil-minded, envious of the virtues of others, blinded by passion, entertaining thoughts of killing another, says here absolutely (*eva*) falsely, through [his] naturally evil tendency,— is [all] that fit to be accepted [as true]? Should it not be looked into? (27)

And further,

I, who have never done the collection of flowers, by bending down even a flowering creeper for the sake of flowers,—how could that I be killing a young weeping woman, grasping [her] by [her] very long hair having the splendour of the wings of bees? (28)

शकारः—हंहो अधिअलणभोइआ किं तुम्हे पक्खवादेण ववहालं पेक्खध ज्जेण अज्ज वि एशे हदाशचालुदत्ते आशणे धालीअदि। [हंहो अधिकरणभोजकाः किं यूयं पक्षपातेन व्यवहारं पश्यत येनाद्याप्येष हताशचारुदत्त आसने धार्यते।]

अधिकरणिकः—भद्र शोधनक एवं क्रियताम्। (शोधनकस्तथा करोति)

चारुदत्तः—विचार्यताम्। भो अधिकृताः विचार्यताम्। (इत्यासनादवतीर्य भूमावुपविशति)

शकारः—(स्वगतम्। सहर्षं नर्तित्वा) ही अणेण मए कडे पावे अण्णश्श मश्तके निवाडिदे। ता जहिं चालुदत्तके उवविशादि तहिं हग्गे उवविशामि। (तथा कृत्वा) चालुदत्ता पेक्ख पेक्ख मम्। ता भण भण मए मालिदे त्ति। [ही अनेन मया कृतं पापमन्यस्य मस्तके निपतितम्। तद्यत्र चारुदत्त उपविशति तत्राहमुपविशामि।...चारुदत्त पश्य पश्य माम्। तद्भण भण मया मारितेति।]

चारुदत्तः—भो अधिकृताः। (दुष्टात्मा-(९।२७) इति पूर्वोक्तं पठति। सनिःश्वासं स्वगतम्)

मैत्रेय भोः किमिदमद्य ममोपघातो
हा ब्राह्मणि[1] द्विजकुले विमले प्रसूता।

Śakāra :—Halloa! Court-dignitaries! Are you looking into the case with partiality, that even now this wretched Cārudatta is retained on [that is, allowed to occupy] his seat?

Judge :—Good man, Śodhanaka, let this be done.

[Śodhanaka *does accordingly*

Cārudatta :—Think, O Officers, think.

[*Getting down his seat, sits on the ground*

Śakāra :—(*To himself, dancing in joy*) Ha! By this [forcible the sin committed by me removal of Cārudatta from his seat] the sin committed by me has [now definitely] fallen down upon another's head! So, I shall sit where Cārudatta was sitting. (*Doing accordingly*) Cārudatta, look, look at me. So, say, say 'She was killed by me.'

Cārudatta :—O officers! (*Repeats IX. 27, ' Evil-minded' etc. said before; sighing, to himself*)

O Maitreya, what [is] to-day this insult [or, violence] to me! Alas! [My] Brāhmaṇa wife born in a pure Brāhmaṇa family! Alas! Rohasena, you indeed do not see [or, have any idea about] my destruction [or, calamity]. You always

---

[1] ब्राह्मणी निजकुले।

हा रोहसेन न हि पश्यसि मे विपात्तिं
मिथ्यैव नन्दसि परव्यसनेन नित्यम् ॥ २९ ॥

प्रेषितश्च मया तद्वार्तान्वेषणाय मैत्रेयो वसन्तसेनासकाशं शकटिकानिमित्तं च तस्य प्रदत्तान्यलंकरणानि प्रत्यर्पयितुम् । तत्कथं चिरयते ।

(ततः प्रविशति गृहीताभरणो विदूषकः)

विदूषकः—पेसिदोम्हि अज्जचारुदत्तेण वसन्तसेणासआसम् तहिं अलंकरणाइं गेण्हिअ जधा अज्जमित्तेअ वसन्तसेणाए वच्छो रोहसेणो अत्तणो अलंकारेण अलंकरिअ जणणीसआसं पेसिदो । इमस्स आहरणं दादव्वम् ण उण गेण्हिदव्वम् । ता समप्पेहि त्ति । ता जाव वसन्तसेणासआसं ज्जेव गच्छामि । (परिक्रम्यावलोक्य च । आकाशे) कधं भावरेभिलो । भो भावरेभिल किंणिमित्तं तुमं उव्विग्गो उव्विग्गो विअ लक्खीआसि । (आकर्ण्य) किं भणासि—पिअवअस्सो चारुदत्तो अधिअरणमण्डवे सद्दाइदो त्ति । ता ण हु अप्पेण कज्जेण होदव्वम् । (विचिन्त्य) ता पच्छा वसन्तसेणासआसं गमिस्सम् । अधिअरणमण्डवं दाव गमिस्सम् । (परिक्रम्यावलोक्य च) इदं अधिअरणमण्डवम् । ता जाव पविसामि । (प्रविश्य) सुहं अधिअरणभोइआणम् । कहिं मम पिअवअस्सो । [प्रेषितोऽस्म्यार्यचारुदत्तेन वसन्तसेनासकाशम् तत्रालंकरणानि गृहीत्वा यथा

---

used to feel happy; [it is] but a delusion [now] owing to [this] great calamity ! (29)

Maitreya has already been sent by me to get information about him, [and] to Vasantasenā to return [to her] the ornaments given to him [Rohasena] for [making a golden] toy-cart. Then why is he tarrying ?

(*Then enter* Vidūṣaka, *carrying the ornaments*)

Vidūṣaka :—I have been sent by the noble Cārudatta to Vasantasenā, taking the ornaments there, with [these words]—'Noble Maitreya, dear Rohasena was sent to [his] mother by Vasantasenā, after decking [him] with her own ornaments. [Now] ornaments might be [with propriety] offered to him [by Vasantasenā], but they should not be accepted [by us]. So, return [them].' So, I shall just go to Vasantasenā. (*Walking about and beholding, in the sky*) What ? Friend Rebhila ! O friend Rebhila ! For what reason do you appear as though quite alarmed [or, distressed] ? (*Listening*) What do you say.—'Dear friend Cārudatta has been summoned to the Court-hall' ?

—आर्यमैत्रेय वसन्तसेनया वत्सो रोहसेन आत्मनोऽलंकारेणालंकृत्य जननीसकाशं प्रेषितः। अस्य आभरणं दातव्यम् न पुनर्ग्रहीतव्यम् । तत्समर्पय इति । तद्यावद्वसन्तसेनासकाशमेव गच्छामि। ...कथं भावरेभिलः। भो भावरेभिल किंनिमित्तं त्वमुद्विग्न उद्विग्न इव लक्ष्यसे। ...किं भणसि—प्रियवयस्यश्चारुदत्तोऽधिकरणमण्डपमाहूतः इति। तन्न खल्वल्पेन कार्येण भवितव्यम् । ...तत्पश्चाद्वसन्तसेनासकाशं गमिष्यामि । अधिकरणमण्डपं तावद्गमिष्यामि । ...अयमधिकरणमण्डपः ।, तद्यावत्प्रविशामि। ...सुखमधिकरणभोजकानाम् । कुत्र मम प्रियवयस्यः ।]

अधिकरणिकः—नन्वेष तिष्ठति ।

विदूषकः—वअस्स सोत्थि दे । [वयस्य स्वास्ति ते।]

चारुदत्तः—भविष्यति ।

विदूषकः—अवि क्खेमं दे । [अपि क्षेमं ते ।]

चारुदत्तः—एतदपि भविष्यति ।

विदूषकः—भो वअस्स किंणिमित्तं उव्विग्गो उव्विग्गो विअ लक्खीअसि । कुदो वा सद्दाइदो । [भो वयस्य किं निमित्तमुद्विग्न उद्विग्न इव लक्ष्यसे। कुतो वाहूतः ।]

चारुदत्तः—वयस्य

मया खलु नृशंसेन परलोकमजानता ।
स्त्री रतिर्वाविशेषेण शेषमेषोऽभिधास्यति ॥ ३० ॥

Then, it could not indeed be on some petty business! (*Thinking*) Therefore, I shall go to Vasantasenā afterwards. I shall first go to the Court-hall. (*Walking about and beholding*) This [is] the Court-hall. I shall now enter. (*Entering*) [I wish all] happiness to the Court-dignitaries ! Where [is] my dear friend ?

Judge :—Surely here he is.

Vidūṣaka :—Friend, welfare to you !

Cārudatta :—It would be.

Vidūṣaka :—Are you all right ?

Cārudatta :—This also would be.

Vidūṣaka :—O friend, for what reason do you appear to be as though greatly excited [or, distressed] ? And why have you been summoned [here] ?

Cārudatta :—Friend,

By me indeed, [who am] pitiless, not knowing [or, caring for] the other world, a woman or Rati herself [lit. without distinction]—the rest, this [Śakāra] would speak out. (30)

विदूषकः—किं किम्। [किं किम् ।]

चारुदत्तः—(कर्णे) एवमेवम् ।

विदूषकः—को एव्वं भणादि। [क एवं भणाति ।]

चारुदत्तः—(संज्ञया शकारं दर्शयति) नन्वेष तपस्वी हेतुभूतः कृतान्तो मां व्याहराति।

विदूषकः—(जनान्तिकम्) एव्वं कीस ण भणीअदि गेहं गदे त्ति। [एवं किमर्थं न भण्यते गृहं गतेति।]

चारुदत्तः—उच्यमानमप्यवस्थादोषान्न गृह्यते ।

विदूषकः—भो भो अज्जा जेण दाव पुरट्ठावणविहारारामदेउलतडागकूवजूवेहिं अलंकिदा णअरी उज्जइणी सो अणीसो अत्थकल्लवत्तकारणादो एरिसं अकज्जं अणुचिट्ठादि त्ति। (सक्रोधम्) अरे रे काणेलीसुदा राअश्शालसंठाणआ उस्सुङ्खलआ किदजणदोस भण्डआ बहुसुवण्णमण्डिदमक्कडआ भण भण मम अग्गदो। जो दाणिं मम पिअवअस्सो कुसुमिदं माधवीलदं पि आकिड्डिअ कुसुमावचअं ण करेदि कदा वि आकिड्डिदाए पल्लवच्छेदो भोदि त्ति सो कधं एरिस अकज्जं उहअलोआविरुद्धं करेदि। चिट्ठ रे कुट्टणिपुत्ता चिट्ठ। जाव एदिणा तव हिअअकुडिलेण दण्डअट्ठेण मत्थअं दे सदखण्डं करेमि। [भो भो आर्याः

Vidūṣaka :—What, what?

Cārudatta :—(*In his ear*) Thus, thus.

Vidūṣaka :—Who says thus?

Cārudatta :—(*Points out to* Śakāra *by a sign*) I say, this poor fellow, who has become the instrument of Fate, designates [or, names] me [as such].

Vidūṣaka :—(*Aside*) Well; why do you not say—'She went home'?

Cārudatta :—Though stated, that is not accepted [as true]. owing to the fault of [my] state [of poverty, or, owing to the force of circumstances].

Vidūṣaka :—O you gentlemen! He by whom, for the matter of that, the city of Ujjayinī was adorned by the establishment of localities, [and] by [constructing] convents, parks, temples, tanks, wells, and sacrificial posts,—would he, [though] not rich [now], commit such a base [or, dastardly] deed for the sake of money, a mere bagatelle? (*Angrily*) O you son of a whore, king's brother-in-law Saṁsthānaka, [you] unbridled wretch,

येन तावत्पुरस्थापनीविहारारामदेवालयतडागकूपयूपैरलंकृता नगर्युज्जयिनी सोऽनीशोऽर्थकल्यवर्तकारणादीदृशमकार्यमनुतिष्ठतीति ।...अरे रे कुलटापुत्र राजश्यालसंस्थानक उच्छृङ्खलक कृतजनदोष भण्ड बहुसुवर्णमण्डितमर्कटक भण भण ममाग्रतः। य इदानीं मम प्रियवयस्यः कुसुमितां माधवीलतामप्याकृष्य कुसुमावचयं न करोति कदाचिदाकृष्टतया पल्लवच्छेदो भवतीति स कथमीदृशमकार्यमुभयलोकविरुद्धं करोति । तिष्ठ रे कुट्टिनीपुत्र तिष्ठ । यावदेतेन तव हृदयकुटिलेन दण्डकाष्ठेन मस्तकं ते शतखण्डं करोमि ।]

शकारः—(सक्रोधम्) शुणन्तु शुणन्तु अज्जमिश्शा । चालुदत्तकेण शह मम विवादे ववहाले वा । ता कीश एशे काकपदशीशमश्तका मम शिले शदखण्डे कलेदि । मा दाव । ले दाशीएपुत्ता दुट्टवडुका । [शृण्वन्तु शृण्वन्त्वार्यमिश्राः । चारुदत्तेन संह मम विवादो व्यवहारो वा । तत्किमर्थमेष काकपदशीर्षमस्तको मम शिरः शतखण्डं करोति । मा तावत् । रे दास्याःपुत्र दुष्टबटुक ।]

(विदूषको दण्डकाष्ठमुद्यम्य पूर्वोक्तं पठति । शकारः सक्रोधमुत्थाय ताडयति । विदूषकः प्रतीपं ताडयति । अन्योन्यं ताडयतः । विदूषकस्य कक्षादेशादाभरणानि पतन्ति)

[you] imputer of crimes to people [and] buffon, [you] monkey adorned with many gold ornaments, say, say, in my presence [or, before me]! This my dear friend now, who does not make a collection of flowers, by dragging even a flowering jasmine creeper, lest the leaves might perchance be injured, owing to [its] being dragged—how could he be doing such a base deed condemned in both the worlds ! Stay, you son of a procuress, stay ; I shall just smash your head into a hundred pieces with this wooden staff bent [or, crooked] like your heart !

Śakāra :—(*Angrily*) Listen, listen, noble gentlemen ! My dispute or law-suit [is] with Cārudatta. So, why should this fellow possessing a pate and head with [or, like] a crow-footmark, be smashing my head into a hundred pieces ? Not indeed ! O son of a whore, wicked brat !

[Vidūṣaka, *lifting up his wooden staff, repeats what he had said before* ; Śakāra *rising up in anger, strikes him* ; Vidūṣaka *strikes in return ; both strike each other ; the ornaments fall down from under* Vidūṣaka's *arm-pit*

Proff positive.

शकारः—(तानि गृहीत्वा दृष्ट्वा ससाध्वसम्) पेक्खन्तु पेक्खन्तु अज्जा। एदे क्खु ताए तवश्शिणीए केलका अलंकाला। (चारुदत्तमुद्दिश्य) इमश्श
३३ अत्थकल्लवत्तश्श कालणादो एशा मालिदा वावादिदा अ। [पश्यन्तु पश्यन्त्वार्याः। एते खलु तस्यास्तपस्विन्या अलंकाराः। ...अस्यार्थकल्यवर्तस्य कारणादेषा मारिता व्यापादिता च।]
(अधिकृताः सर्वेऽधोमुखाः स्थिताः)

३६ **चारुदत्तः**—(जनान्तिकम्)

अयमेवंविधे काले दृष्टो भूषणविस्तरः। Precious ornaments
अस्माकं भाग्यवैषम्यात्पतितः पातयिष्यति ॥ ३१ ॥

विदूषकः—भो कीस भूदत्थं ण णिवेदीअदि। [भोः किमर्थं भूतार्थो न निवेद्यते।]

चारुदत्तः—वयस्य

दुर्बलं नृपतेश्चक्षुर्नैतत्तत्त्वं निरीक्षते।
केवलं वदतो दैन्यमश्लाघ्यं मरणं भवेत् ॥ ३२ ॥

अधिकरणिकः—कष्टं भोः कष्टम्।

अङ्गारकविरुद्धस्य प्रक्षीणस्य बृहस्पतेः।
ग्रहोऽयमपरः पार्श्वे धूमकेतुरिवोत्थितः ॥ ३३ ॥

Śakāra :—(*Taking them, beholding, nervously*) Look, look, gentlemen. These indeed [are] the ornaments of that poor woman! (*Referring to* Cārudatta) For the sake of this money, a mere bagatelle—was she killed and destroyed!

[*The Officers, all of them hang down their heads*

Cārudatta :—(*Aside*)

This bunch of ornaments discovered [lit. seen] at such a time [and] fallen down, through the harshness of our fortune, would push [me] down [that is, destroy me]. (31)

Vidūṣaka :—Oh, why is not the truth [as it happened] being told?

Cārudatta :—Friend,

The eye of the king [is] impotent; it would not [be oble to] see the real state of things. If [I] were to tell, only [our] pitiable condition would be [known], [and] there would result an inglorious death. (32)

Judge :—Alas! Oh! Pity!

There has arisen, like a comet, this another planet by the side of Jupiter waning in influence and with Mars opposed [to it]! (33)

श्रेष्ठिकायस्थौ—(विलोक्य वसन्तसेनामातरमुद्दिश्य) अवहिदा दाव अज्जा एदं सुवण्णभण्डअं अवलोएदु सो ज्जेव एसो ण वेत्ति । [अवहिता तावदार्येदं सुवर्णभाण्डमवलोकयतु तदेवेदं न वेति ।]

वृद्धा—(अवलोक्य) सरिसो एसो ण उण सो। [सदृशमेतत् न पुनस्तत् ।]

शकारः—आं वुड्ढकुट्टणि अक्खीहिं मन्तिदं वाआए मूकिदम् । [आं वृद्धकुट्टानि अक्षिभ्यां मन्त्रितं वाचा मूकितम् ।] Very imp.

वृद्धा—हदास अवेहि । [हताश अपेहि ।]

श्रेष्ठिकायस्थौ—अप्पमत्तं कधेहि सो ज्जेव एसो ण वेत्ति । [अप्रमत्तं कथय तदेवैतन्न वेति ।]

वृद्धा—अज्ज सिप्पिकुसलदाए ओबन्धेदि दिट्ठिम् । ण उण सो। [आर्य शिल्पिकुशलतयावबध्नाति दृष्टिम् । न पुनस्तत् ।]

अधिकरणिकः—भद्रे अपि जानास्येतान्याभरणानि ।

वृद्धा—णं भणामि ण हु ण हु। अणभिजाणिदो। अह वा कदा वि सिप्पिणा घडिदो भवे। [ननु भणामि न खलु न खलु। अनभिज्ञातः। अथवा कदापि शिल्पिना घटितो भवेत् ।]

अधिकरणिकः—पश्य श्रेष्ठिन्

Sreṣṭhin and Kāyastha :—(*Observing, referring to* Vasantasenā's *mother*) May Madam just look at this bunch of gold ornaments, attentively [to find out] if it [is] the same or not.

Vṛddhā :—(*Beholding*) This [is] similar, but not the same.

Śakāra :—Ah ! Old procuress ! [Your] eyes have spoken out [though your] tongue has denied [or, kept quiet about it].

Vṛddhā :—Get away, wretch !

Śreṣṭhin and Kāyastha :—Tell unmistakably [or, vigilantly] whether it [is] the same or not.

Vṛddhā :—Sir, owing to the skill of the artisan, it holds up [or, attracts] the sight. But it [is] not the same.

Judge :—Good lady, do you know [or, recognise] these ornaments ?

Vṛddhā :—Well, I say, not indeed, not indeed. [It is] not known [by me]. Or, perchance, they might have been made by [the same, or, some skilled] artisan !

Judge :—Look [here], Śreṣṭhin !

वस्त्वन्तराणि सदृशानि भवन्ति नूनं
रूपस्य भूषणगुणस्य च कृत्रिमस्य ।
दृष्ट्वा क्रियामनुकरोति हि शिल्पिवर्गः ।
सादृश्यमेव कृतहस्ततया च दृष्टम् ॥ ३४ ॥

श्रेष्ठिकायस्थौ—अज्जचारुदत्तस्स केरकाइं एदाइं । [आर्यचारुदत्तीयान्येतानि ।]

चारुदत्तः—न खलु न खलु ।

श्रेष्ठिकायस्थौ—ता कस्स । [तदा कस्य ।]

चारुदत्तः—इहात्रभवत्या दुहितुः ।

श्रेष्ठिकायस्थौ—कधं एदाइं ताए विओअं गदाइं । [कथमेतानि तस्या वियोगं गतानि ।]

चारुदत्तः—एवं गतानि । आं इदम् ।

श्रेष्ठिकायस्थौ—अज्जचारुदत्त एत्थ सच्चं वत्तव्वम् । पेक्ख पेक्ख

सच्चेण सुहं क्खु लब्भइ सच्चालावे ण होइ पावम् ।
सच्चं त्ति दुवेवि अक्खरा मा सच्चं अलिएण गूहेहि ॥ ३५ ॥

[आर्यचारुदत्त अत्र सत्यं वक्तव्यम् । पश्य पश्य

सत्येन सुखं खलु लभ्यते सत्यालापे न भवति पातकम् ।
सत्यमिति द्वे अप्यक्षरे मा सत्यमलीकेन गूहय ॥]

There are undoubtedly similar other articles. For, the artisan class imitates the workmanship, on seeing the form and technique [or, beauty] of ornaments artificially made, and resemblance indeed is in evidence owing to dexterity [in handicraft]. (34)

Śresthin and Kāyastha :—Do these belong to the noble Cārudatta [himself] ?

Cārudatta :—Not indeed, not at all !

Śresthin and Kāyastha :—Then, to whom ?

Cārudatta :—To the daughter of this noble woman here.

Śresthin and Kāyastha :—How did these [happen to] get separated from her ?

Cārudatta :—Thus got [separated]. Ah ! This—

Śresthin and Kāyastha :—Noble Cārudatta, tell the truth now [or, here]. See, see—

By truth indeed is happiness secured ; in telling the truth, there is no sin. Satya,—[these are] only just two syllables ; do not conceal truth by falsehood. (35)

चारुदत्तः—आभरणान्याभरणानीति न जाने । किंत्वस्मद्गृहादानीतानीति जाने ।

शकारः—उज्जाणं पवेशिअ पढमं मालेशि । कवडकावडिआए शंपदं णिगूहेशि । [उद्यान प्रवेश्य प्रथमं मारयसि । कपटकापटिकतया सांप्रतं निगूहसि ।]

अधिकरणिकः—आर्यचारुदत्त सत्यमभिधीयताम् ।

इदानीं सुकुमारेऽस्मिन्निःशङ्कं कर्कशाः कशाः । whip
तव गात्रे पतिष्यन्ति सहास्माकं मनोरथैः ॥ ३६ ॥

चारुदत्तः—अपापानां कुले जाते मयि पापं न विद्यते ।
यदि संभाव्यते पापमपापेन च किं मया ॥ ३७ ॥

(स्वगतम्) न च मे वसन्तसेनाविरहितस्य जीवितेन कृत्यम् । (प्रकाशम्) भोः किं बहुना । मया किल नृशंसेन लोकद्वयमजानता ।
स्त्रीरत्नं च विशेषेण शेषमेषोऽभिधास्यति ॥ ३८ ॥

शकारः—वावादिदा । अले तुमं पि भण मए वावादिदेत्ति । [व्यापादिता । अरे त्वमपि भण मया व्यापादितेति ।]

Cārudatta :—[About these] ornaments, ornaments,—well, I know not. But I know [this much] that they have been brought from our house.

Śakāra :—Having made [her] enter the garden, you first kill [her] and now conceal [that fact] by [your] first-class fraud.

Judge :—Noble Cārudatta, please tell the truth.

Now, on this your delicate body, would undoubtedly fall heavy lashes [of the whip], along with our wishes [to see you acquitted]. (36)

Cārudatta :—In [the case of] me, born in the family of the sinless, there can be no sin; if [on the other hand] sin is [regarded as] possible [in my case], what [is the use] of my being sinless ? (37)

(*To himself*) And there [is] no purpose [left] in life for me separated from Vasantasenā [who is dead]. (*Aloud*) O [Officers], why [say] more ? [or, in short]—

By me indeed, [who am] pitiless, not knowing [or, caring for] the two worlds, again, a jewel of a woman, especially—the rest, this [Śakāra] would speak out. (38)

Śakāra :—Was killed. Oh, say you also—' By me was [she] killed.'

चारुदत्तः—त्वयैवोक्तम् ।

शकारः—शुणेध शुणेध भट्टालका एदेण मालिदा । एदेण ज्जेव शंशए छिण्णे । एदश्श दलिद्दचालुदत्तश्श शालीले दण्डे धालीअदु । [शृणुत शृणुत भट्टारकाः एतेन मारिता । एतेनैव संशयश्छिन्नः । एतस्य दरिद्रचारुदत्तस्य शारीरो दण्डो धार्यताम् ।]

अधिकरणिकः—शोधनक यथाह राष्ट्रियः । भो राजपुरुषाः गृह्यतामयं चारुदत्तः ।

(राजपुरुषा गृह्णन्ति)

manner of har

वृद्धा—पसीदन्तु पसीदन्तु अज्जमिस्सा । (जो तदाणि चोरेहिं...अवहिदं त्ति (९–२२–१) इत्यादि पूर्वोक्तं पठति) ता जदि वावादिदा मम दारिआ वावादिदा । जीवदु मे दीहाऊ । अण्णं च । अत्थिपच्चत्थिण्णं ववहारो । अहं अत्थिणी । ता मुञ्चध एदम् । [प्रसीदन्तु प्रसीदन्त्वार्यमिश्राः ।...तद्यदि व्यापादिता मम दारिका व्यापादिता जीवतु मे दीर्घायुः । अन्यच्च । अर्थिप्रत्यर्थिनोर्व्यवहारः । अहमर्थिनी । तन्मुञ्चतैतम् ।]

शकारः—अवेहि गब्भदाशि गच्छ । किं तव एदिणा । [अपेहि गर्भदासि गच्छ । किं तवैतेन ।]

आधिकरणिकः—आर्ये गम्यताम् । हे राजपुरुषाः निष्क्रामयतैनाम् ।

वृद्धा—हा जाद हा पुत्तअ । [हा जात हा पुत्रक ।] (इति रुदती निष्क्रान्ता)

Cārudatta :—You yourself have said [it].

Śakāra :—Listen, listen, Lords—[She] was killed by him. [All] doubt is [now] removed by this one himself ! Let capital punishment be decided upon for [or, awarded to] this penniless Cārudatta.

Judge :—Śodhanaka, as the king's brother-in law says. O guards, take this Cārudatta in custody.

[*The guards take him in custody*

Vṛddhā :—Mercy, mercy [lit. be pleased], noble gentlemen. (*Repeats* ' *He by whom...carried off by the thieves* ' *etc. IX.22.1, said before*) So, if my daughter has been killed, [well] she has been killed [there the matter ends]. Let this my long-lived one live ! And further, a legal suit [lies, that is, is a matter] between the plaintiff and the defendant. I [am] the plaintiff. So, release him.

Śakāra :—Get away, [you] slave-by-birth, go. What [have] you [got to do] with him ?

Judge :—Madam, [you may] go. O guards, show her out.

Vṛddhā :—Alas ! Dear one ! Alas ! Dear son ! [*Exit, weeping*

शकारः—(स्वगतम्) कडं मए एदश्श अत्तणो शलिशम्। शंपदं गच्छामि [कृतं मयैतस्यात्मनः सदृशम्। सांप्रतं गच्छामि ।] (इति निष्क्रान्तः)

अधिकरणिकः—आर्यचारुदत्त निर्णये वयं प्रमाणम्। शेषे तु राजा। तथापि शोधनक विज्ञाप्यतां राजा पालकः—

अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत्। मनुस्मृति
राष्ट्रादस्मात्तु निर्वास्यो विभवैरक्षतैः सह ॥ ३९ ॥

शोधनकः—जं अज्जो आणवेदि। (इति निष्क्रम्य पुनः प्रविश्य। सास्रम्) अज्जा गदम्हि तहिं। राआ पालओ भणादि—जेण अत्थकल्लवत्तस्स कारणादो वसन्तसेणा वावादिदा तं ताइं ज्जेव आहरणाइं गले बन्धिअ डिण्डिमं ताडिअ दक्खिणमसाणं णइअ सूले भज्जेध त्ति। जो को वि अवरो एरिसं अकज्जं अणुचिट्ठदि सो एदिणा सणिआरदण्डेण सासीअदि। [यदार्य आज्ञापयति।...आर्याः गतोऽस्मि तत्र। राजा पालको भणाति—येनार्थकल्यवर्तस्य कारणाद्वसन्तसेना व्यापादिता तं तान्येवाभरणानि गले बद्ध्वा डिण्डिमं ताडयित्वा दक्षिणश्मशानं नीत्वा शूले भङ्क्त इति। यः कोऽप्यपर ईदृशमकार्यमनुतिष्ठाति स एतेन सनिकारदण्डेन शास्यते।]

चारुदत्तः—अहो अविमृश्यकारी राजा पालकः। अथवा upto this court scene.

Śakāra :—(*To himself*) I have done to him [something] worthy of myself. I shall go now. [*Exit*

Judge :—Noble Cārudatta, we [are] the authority [only] as regards the judgment; as regards the rest however, the King. Still, Śodhanaka, let it be submitted to King Pālaka—

This one [is] indeed a criminal [or, sinner]. 'A Brāhmaṇa should not be killed'—so Manu lays down. He should, therefore, be banished from this country, with [all his] possessions intact. (39)

Śodhanaka :—As Your Lordship commands. (*Going out and entering again, with tears*) Gentlemen, I had gone there. King Pālaka directs [or, says]—'He by whom Vasantasenā was murdered for the sake of money—a mere bagatelle—tying the self-same ornaments round his neck, [proclaiming the fact by] sounding the drum [and] taking him to the southern cemetery, break him on the stake. Whosoever else commits such a base deed, would be chastised with this [same] punishment with disgrace.'

Cārudatta :—Oh, [how] King Pālaka is acting thoughtlessly! Or rather,

ईदृशे व्यवहाराग्नौ मन्त्रिभिः परिपातिताः ।
स्थाने खलु महीपाला गच्छन्ति कृपणां दशाम् ॥ ४० ॥

अपि च

ईदृशैः श्वेतकाकीयै राज्ञः शासनदूषकैः ।
अपापानां सहस्राणि हन्यन्ते च हतानि च ॥ ४१ ॥

सखे मैत्रेय गच्छ । मद्वचनादम्बामपश्चिममभिवादयस्व । पुत्रं च मे रोहसेनं परिपालयस्व ।

३ **विदूषकः**—मूले च्छिण्णे कुदो पादवस्स पालणम् । [मूले छिन्ने कुतः पादपस्य पालनम् ।]

चारुदत्तः—मा मैवम् ।

नृणां लोकान्तरस्थानां देहप्रतिकृतिः सुतः ।
मयि यो वै तव स्नेहो रोहसेने स युज्यताम् ॥ ४२ ॥

विदूषकः—भो वअस्स अहं ते पिअवअस्सो भविअ तुए विरहिदाइं पाणाइं धारेमि । [भो वयस्य अहं ते प्रियवयस्यो भूत्वा त्वया विरहितान्प्राणान्धारयामि ।]

३ **चारुदत्तः**—रोहसेनमपि तावद्दर्शय ।

विदूषकः—एव्वम् । जुज्जदि । [एवम् । युज्यते ।]

Rightly indeed do kings attain to a wretched condition, when thrown about by [their] counsellors into such a fire of legal transactions ! (40)

And further,

By such cousins of white crows [deceitful or untruthful persons], disgracing the king's administration [or, orders] are, and have been killed thousands of sinless persons. (41)

Friend, Maitreya, go. In my name [or, behalf], salute for the last time [my] mother. And look after my son Rohasena.

Vidūṣaka :—When the root is cut off, how [can there be] the looking after of the tree ?

Cārudatta :—No, not so.

The son [is] the embodied image of men staying in the other world [that is, dead]. Whatever affection indeed you felt towards me, that [same] should be bestowed on Rohasena. (42)

Vidūṣaka :—O friend, having been your dear friend, shall I [be able to] hold my life bereft of you ?

Cārudatta :—Any way, show up Rohasena to me.

Vidūṣaka :—Right ! [That] is proper.

अधिकरणिकः—भद्र शोधनक अपसार्यतामयं बटुः। (शोधनकस्तथा करोति)

अधिकरणिकः—कः कोऽत्र भोः। चाण्डालानां दीयतामादेशः। ६

(इति चारुदत्तं विसृज्य निष्क्रान्ताः सर्वे राजपुरुषाः)

शोधनकः—इदो आअच्छदु अज्जो। [इत आगच्छत्वार्यः।]

चारुदत्तः—(सकरुणम् मैत्रेय भोः किमिदमद्य (९।२९) इत्यादि पठति। ९
आकाशे) विषसलिलतुलाग्निप्रार्थिते मे विचारे omp'
क्रकचमिह शरीरे वीक्ष्य दातव्यमद्य।
अथ रिपुवचनाद्वा ब्राह्मणं मां निहंसि Curse.
पतसि नरकमध्ये पुत्रपौत्रैः समेतः ॥ ४३ ॥

(इति निष्क्रान्ताः सर्वे)

अयमागतोऽस्मि।

इति व्यवहारो नाम नवमोऽङ्कः।

Judge :—Good man, Śodhanaka, let this chap be driven out.

[Śodhanaka *does accordingly*

Judge :—Who, who [is] there? Oh! Let the [necessary] order be given to the Cāṇḍālas.

[*Leaving* Cārudatta, *exeunt all officers*

Sodhanaka :—Let the noble one come this way.

Cārudatta :—(*Pathetically, repeats IX. 29 ' O Maitreya, what [is] this to-day ' etc.; in the sky*)

After the decision solicited [or, tested] by [resorting to the ordeals of] poison, water, balance and fire had been taken after [due] consideration, then to-day [even] a saw could have been made to operate here on [my] body. But you are murdering me, a Brāhmaṇa, on the testimony of [my] enemy; [so] you would fall, together with sons and grandsons in the midst of hell! (43)

[*Exeunt Omnes*

Here am I coming.

Here ends the Ninth Act called ' Vyavahāra ' [The Trial]

दशमोऽङ्कः ।

(ततः प्रविशति चाण्डालद्वयेनानुगम्यमानश्चारुदत्तः)

उभौ—तक्किं ण कलअ कालण णववहबंधणअणे णिउणा ।
आचिलेण शीशच्छेअणशूलालोवेशु कुशलम्ह ॥ १ ॥

ओशलध अज्जा ओशलध । एशे अज्जचालुदत्ते
दिण्णकलवीलदामे गहिदे अम्हेहिं वज्झपुलिशेहिं ।
दीवे व्व मन्दणेहे थोअं थोअं खअं जादि ॥ २ ॥

[तत्किं न कलय कारणं नववधबन्धनयने निपुणौ ।
Humour आचिरेण शीर्षच्छेदनशूलारोपेषु कुशलौ स्वः ॥
३ अपसरतार्याः अपसरत । एष आर्यचारुदत्तः
red flowers
to create scene of execution दत्तकरवीरदामा गृहीत आवाभ्यां वध्यपुरुषाभ्याम् ।
दीप इव मन्दस्नेहः स्तोकं स्तोकं क्षयं याति ॥]

चारुदत्तः—(सविषादम्)

नयनसलिलसिक्तं पांशुरूक्षीकृताङ्गं
पितृवनसुमनोभिर्वेष्टितं मे शरीरम् ।

ACT X

(*Then enter* Cārudatta, *being followed by two* Cāṇḍālas)

Both ,—

What then ? Think not of the cause. We [two are] experts in killing, binding and leading a fresh [criminal condemned to the gallows] and are skilled in cutting off the head or impaling [one] on the stake in quick time. (1)

Get out of the way, gentlemen, get out of the way. Here, the noble Cārudatta

made to put on garlands of Karavīra flowers, held by us two, the hangmen, is little by little, waning away like a lamp with the oil getting less and less. (2)

Cārudatta :—(*With dejection*)

The crows crying harshly here are intending to feast on my body sprinkled over with tears [lit. water from the eyes],

विरसमिह रटन्तो रक्तगन्धानुलिप्तं
बलिमिव परिभोक्तुं वायसास्तर्कयन्ति ॥ ३ ॥

चाण्डालौ—ओशलध अज्जा ओशलध ।

किं पेक्खध छिज्जन्तं शप्पुलिशं कालपलशुधालाहिं ।
शुअणशउणाधिवाशं शज्जणपुलिशद्दुमं एद्म ॥ ४ ॥

आअच्छ ले चालुदत्ता आअच्छ । [अपसरतार्याः अपसरत ।

किं पश्यथ छिद्यमानं सत्पुरुषं कालपरशुधाराभिः ।
सुजनशकुनाधिवासं सज्जनपुरुषद्रुममेतम् ॥ ३

आगच्छ रे चारुदत्त आगच्छ ।]

चारुदत्तः—पुरुषभाग्यानामचिन्त्याः खलु व्यापाराः यदहमीदृशीं दशामनुप्राप्तः । ६

सर्वगात्रेषु विन्यस्तै रक्तचन्दनहस्तकैः ।
पिष्टचूर्णावकीर्णश्च पुरुषोऽहं पशूकृतः ॥ ५ ॥

(अग्रतो निरूप्य) अहो तारतम्यं नराणाम् । (सकरुणम्)

---

with the limbs rendered rough with dust and covered all round with flowers from the cemetery, [and] besmeared with red sandal-paste, as though it were an oblation. (3)

Cāṇḍālas :—Get out of the way, gentlemen, get out of the way.

Why do you [want to] see this good man being cut down by the [strokes of the sharp] edge of the deadly axe—this tree in the form of [God's] good man, the abode of birds in the form of good people. (4)

Come on, O Cārudatta, come on.

Cārudatta :—Unthinkable indeed [are] the vicissitudes [or, workings] of the fortunes of men, that I have attained to this state !

With the palm-prints in red-sandal-paste shown over all the limbs, and scattered over with rice-flour, I, a human being, have been turned into a beast [the sacrificial victim] ! (5)

(*Looking before him*) Oh, the discretion [or, discrimination] of men ! (*Pathetically*)

---

१ भावना ।

idea of respect

अमी हि दृष्ट्वा मदुपेतमेतन्मर्त्यं धिगस्त्वित्युपजातबाष्पाः ।
अशक्नुवन्तः परिरक्षितुं मां स्वर्गं लभस्वेति वदन्ति पौराः ॥ ६ ॥

चाण्डालौ—ओशलध अज्जा ओशलध । किं पेक्खध ।

इन्दे प्पवाहिअन्ते गोप्पशवे शंकमे च तालाणम् ।
शुपुलिशपाणविपत्ती चत्तालि इमे ण दट्ठव्वा ॥ ७ ॥

[अपसरतार्याः अपसरत । किं पश्यथ ।

इन्द्रः प्रवाह्यमाणो गोप्रसवः संक्रमश्च ताराणाम् ।
3 सुपुरुषप्राणविपत्तिश्चत्वार इमे न द्रष्टव्याः ॥]

एकः—हण्डे आहीन्ता पेक्ख पेक्ख ।

णअलीपधाणभूदे वज्झीअन्ते कदन्तअण्णाए ।
किं लुअदि अन्तलिक्खे आदु अणब्भे पडदि वज्जे ॥ ८ ॥

[अरे आहीन्त पश्य पश्य

नगरीप्रधानभूते वध्यमाने कृतान्ताज्ञया ।
3 किं रोदित्यन्तरिक्षमथवानभ्रे पतति वज्रम् ॥]

द्वितीयः—अले गोहा

ण अ लुअदि अन्तलिक्खं णेअ अणब्भे पडदि वज्जे ।
महिलाशमूहमेहे निवडदि णअणम्बु धाराहिं ॥ ९ ॥

Seeing this [calamity] befalling me, these citizens, with tears gathered [in their eyes], saying 'Fie upon this mortal [world]' not being able to save me, here are the citizens uttering 'May you secure heaven'! (6)

Cāndālas :—Get out of the way, gentlemen, get out of the way. What are you seeing ?

The flag-pole in honour of Indra being carried away, the delivery of a cow, the displacement of stars, [and] the death of a good man—these four ought not to be seen ! (7)

First :—O Āhīnta, see, see—

lovely people, reaction.

When one who had been the foremost [man] in the city is being taken to death, by the order of fate, is the sky weeping or is the thunder-bolt falling [even] in the absence of the clouds ? (8)

Second :—O man [Goha] !

Neither is the sky weeping, nor indeed is the thunder-bolt falling in the absence of the clouds ; tears are falling down in showers from the cloud in the form of the congregation of ladies ! (9)

---

१ मम देहमेनं...खेदाः । २ ...थवानभ्रं ।

अवि अ वज्झम्मि णीअमाणे जणश्श शव्वश्श लोदमाणश्श ।
णअणशलिलेहिं शित्ते लच्छादो ण उण्णमइ लेणू ॥ १० ॥
[अरे गोह न च रोदित्यन्तरिक्षं नैवानभ्रे पतति वज्रम् ।
महिलासमूहमेघान्निपतति नयनाम्बु धाराभिः ॥
अपि च वध्ये नीयमाने जनस्य सर्वस्य रुदतः ।
नयनसलिलैः सिक्तो रथ्यातो नोन्नमति रेणुः ॥

चारुदत्तः—(निरूप्य सकरुणम्)

एताः पुनर्हर्म्यगताः स्त्रियो मां वातायनार्धेन विनिःसृतास्याः ।
हा चारुदत्तेत्यभिभाषमाणा बाष्पं प्रणालीभिरिवोत्सृजन्ति ॥ ११ ॥

चाण्डालौ—आअच्छ ले चालुदत्ता आअच्छ। इमं घोशणट्ठाणम् । आहणेध डिण्डिमम् । घोशेध घोशणम् । [आगच्छ रे चारुदत्त आगच्छ । इदं घोषणस्थानम् । आहत डिण्डिमम् । घोषयत घोषणाम् ।]

उभौ—शुणाध अज्जा. शुणाध । एशे शत्थवाहविणअदत्तश्श णत्तिके शाअलदत्तश्श पुत्तके अज्जचालुदत्ते णाम । एदिणा किल अकज्जकालिणा गणिआ वशन्तशेणा अत्थकल्लवत्तश्श कालणादो शुण्णं पुप्फकलण्डआजिण्णुज्जाणं पवेशिअ बाहुपाशबलक्कालेण मालिदे त्ति एशे शलोत्ते गहिदे शअं अपडिवण्णे । तदो लण्णा पालएण अम्हे आण्णत्ता एदं मालेदुम् । जदि अवले

And further,

While the person condemned [to be hanged] is being led,
the dust does not rise up from the road, sprinkled over with
tears of all people who are crying! (10)

Cārudatta :—(*Scrutinising, pathetically*)

Here these women again, stationed in [their] mansions,
with [their] faces protruding through the half [-opened]
windows, saying with reference to me 'Alas! Cārudatta,' are
letting forth tears as though by conduits! (11)

Cāṇḍālas :—Come along, O Cārudatta, come along. Here [is] the proclamation-spot. Beat the drum, proclaim the proclamation.

Both :—Listen, gentlemen, listen. Here [is] the grandson of the merchant Vinayadatta, the son of Sāgaradatta, by name Cārudatta. By him indeed, the doer of a base deed, was killed the courtesan Vasantasenā for the sake of money—a mere bagatelle, by force with the noose of [his] arms, after having

ईदिशं उभअलोअविलुद्धं अकज्जं कलेदि तं पि लाआ पालए एव्वं जेव्व शाशदि। [शृणुतार्याः शृणुत । एष सार्थवाहविनयदत्तस्य नप्ता सागरदत्तस्य पुत्रक आर्यचारुदत्तो नाम । एतेन किलाकार्यकारिणा गणिका वसन्तसेनार्थकल्यवर्तस्य कारणाच्छून्यं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्य बाहुपाशबलात्कारेण मारितेति एष सलोप्त्रो गृहीतः स्वयं च प्रतिपन्नः । ततो राज्ञा पालकेन वयमाज्ञप्ता एतं मारयितुम् । यद्यपर ईदृशमुभयलोकविरुद्धमकार्यं करोति तमपि राजा पालक एवमेव शास्ति ।]

चारुदत्तः—(सानिर्वेदं स्वगतम्)

मखशतपरिपूतं गोत्रमुद्भासितं मे
सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम मरणदशायां वर्तमानस्य पापै-
स्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥ १२ ॥

(उद्वीज्य कर्णौ पिधाय) हा प्रिये वसन्तसेने

शशिविमलमयूखशुभ्रदन्ति सुरुचिरविद्रुमसंनिभाधरोष्ठि ।
तव वदनभवामृतं निपीय कथमवशो ह्ययशोविषं पिबामि ॥ १३ ॥

---

made her enter the secluded Puṣpakaraṇḍaka old garden; and he was captured with the stolen property and has himself confessed [his guilt]. Thereupon, we have been ordered by King Pālaka to kill him. If any one else does such like base deed condemned in both the worlds, him too, would King Pālaka chastise exactly in the same way.

Cārudatta :—(*Despondently, to himself*)

My family-name, [which was] sanctified all round by [the performance of] hundreds of sacrifices, and formerly glorified in sacrificial assemblies, with the loud continuous recitation of Vedic hymns at the sacrificial fires [or, in sacrificial Pandals crowded with Brāhmaṇas etc.],—[that] is being proclaimed in the proclamation by sinful and unworthy persons, when I am standing at death's door ! (12)

(*Distressed, covering up his ears*) Alas ! Beloved Vasantasenā !

[O] you possessed of teeth white like the pure rays of the moon, [O] you possessed of a lower lip resembling a very lovely coral, having drunk the nectar existing in your mouth, how can I [rendered] helpless, drink [now] the poison of infamy ! (13)

उभौ—ओशलध अज्जा ओशलध ।

एशे गुणलअणणिही शज्जणदुक्खाण उत्तलणशेदू ।
अशुवण्णं मण्डणअं अवणीअदि अज्ज णअलीदो ॥ १४ ॥

अण्णं च । शव्वे क्खु होइ लोए लोए शुहशंठिदाण तत्तिल्ले ।
विणिवडिदाण णलाणं पिअकाली दुल्लहे होदि ॥ १५ ॥

[अपसरतार्याः अपसरत ।

एष गुणरत्ननिधिः सज्जनदुःखानामुत्तरणसेतुः ।
असुवर्णं मण्डनकमपनीयतेऽद्य नगरीतः ॥

comp critical

अन्यच्च सर्वः खलु भवति लोके लोकः सुखसंस्थितानां चिन्तायुक्तः ।
विनिपतितानां नराणां प्रियकारी दुर्लभो भवति ॥]

चारुदत्तः—(सर्वतोऽवलोक्य)

अमी हि वस्त्रान्तनिरुद्धवक्त्राः प्रयान्ति मे दूरतरं वयस्याः ।
परोऽपि बन्धुः समसंस्थितस्य मित्रं न कश्चिद्विषमस्थितस्य ॥ १६ ॥

चाण्डालौ—ओशालणं किदम् । विवित्तं लाअमग्गम् । ता आणेध एदं दिण्णवज्झचिण्हम् । [अपसारणं कृतम् । विविक्तो राजमार्गः । तदानयतैतं दत्तवध्य-

---

Both :—Get out of the way, gentlemen, get out of the way.

Here is being taken away to-day from the city, the ocean [or, the store of gems] of virtues, the bridge for good people to cross over [their] miseries, [and] the ornament, not [the usual] one made of gold ! (14)

And further,

All people indeed in the world are full of anxious thoughts about those happily [or, comfortably] established [in life]; one acting agreeably towards people who are fallen [on evil times and on evil tongues fallen] is very difficult to find ! (15)

Cārudatta :— (*Beholding all round*)

Here are indeed my friends running further away [from me], with [their] faces screened by the ends of [their] garments ; even an outsider [or, stranger acts like] a relative towards one well-circumstanced ; [there is] no one [who can be] a friend of one in bad circumstances ! (16)

Cāṇḍālas :—The driving out [programme] has been gone through ; the king's highway is [now] clear [of obstacles]. So, bring him with the paraphernalia of one condemned to death put on.

चिह्नम्।] (चारुदत्तो निःश्वस्य मैत्रेय भोः किमिदमद्य (९।२९) इत्यादि पठति)

(नेपथ्ये) हा ताद हा पिअवअस्स। [हा तात हा प्रियवयस्य।]

चारुदत्तः—(आकर्ण्य सकरुणम्) भोः स्वजातिमहत्तर इच्छाम्यहं भवतः सकाशात्प्रतिग्रहं कर्तुम्।

चाण्डालौ—किं अम्हाणं हत्थादो पडिग्गहं कलेशि। [किमस्माकं हस्तात्प्रतिग्रहं करोषि।]

चारुदत्तः—शान्तं पापम्। नापरीक्ष्यकारी दुराचारः पालक इव चाण्डालः। तत्परलोकार्थं पुत्रमुखं द्रष्टुमभ्यर्थये।

चाण्डालौ—एव्वं कलीअदु। [एवं क्रियताम्।]

(नेपथ्ये) हा ताद हा आवुक। [हा तात हा पितः।]

(चारुदत्तः श्रुत्वा सकरुणम् भोः स्वजातिमहत्तर (१०-१६-५) इत्यादि पठति)

चाण्डालौ—अले पउला खणं अन्तलं देध। एशे अज्जचालुदत्ते पुत्तमुहं पेक्खदु। (नेपथ्याभिमुखम्) अज्ज इदो इदो। आअच्छ ले दालआ आअच्छ। [हे पौराः क्षणमन्तरं दत्त। एष आर्यचारुदत्तः पुत्रमुखं पश्यतु।...आर्य इत इतः। आगच्छ रे दारक आगच्छ।]

(ततः प्रविशति दारकमादाय विदूषकः)

[Cārudatta *sighing repeats IX.29*, '*O Maitreya, what* [*is*] *this to-day*' etc.

(*Behind the curtain*) Alas! Father! Alas! Dear friend!

Cārudatta :—(*Listening, pathetically*) O Chieftain of your caste, I wish for a gift [or, favour] from you.

Cāṇḍālas :—What, would you be accepting a favour [or, gift] from *our* hands?

Cārudatta :—God forbid! [All the same] a Cāṇḍāla [is not, like Pālaka, ill-behaved and one acting thoughtlessly. So I beg of you [to allow me] to see the face of [my] son for the last time], for the sake of [securing] heaven.

Cāṇḍālas :—Let this be done.

(*Behind the curtain*) Alas, father! Alas, papa!

[Cārudatta, *hearing, pathetically repeats* '*O chieftain of your caste*' *etc.*

Cāṇḍālas :—O citizens, make way for a moment. Let this noble Cārudatta see [his] son's face. (*Facing the curtain*) Sir hither, hitherward. Come, you boy, come.

(*Then enter* Vidūṣaka *taking the boy with him*)

विदूषकः—तुवरदु तुवरदु भद्दमुहो। पिदा दे मारिदुं णीअदि। [त्वरतां-त्वरतां भद्रमुखः। पिता ते मारयितुं नीयते।]

दारकः—हा ताद हा आवुक। [हा तात हा पितः।] २१

विदूषकः—हा पिअवअस्स कहिं मए तुमं पेक्खिदव्वो। [हा प्रियवयस्य कुत्र मया त्वं द्रष्टव्यः।]

चारुदत्तः—(पुत्रं मित्रं च वीक्ष्य) हा पुत्र हा मैत्रेय। (सकरुणम्) २४
भोः कष्टम्। चिरं खलु भविष्यामि परलोके पिपासितः।
अत्यल्पमिदमस्माकं निवापोदकभोजनम् ॥ १७ ॥
किं पुत्राय प्रयच्छामि। (आत्मानमवलोक्य। यज्ञोपवीतं दृष्ट्वा) आं इदं तावदस्ति
मम च। अमौक्तिकमसौवर्णं ब्राह्मणानां विभूषणम्।
देवतानां पितॄणां च भागो येन प्रदीयते ॥ १८ ॥

(इति यज्ञोपवीतं ददाति)

चाण्डालः—आअच्छ ले चालुदत्ता आअच्छ। [आगच्छ रे चारुदत्त आगच्छ।]

द्वितीयः—अले अज्जचालुदत्तं णिलुववदेण णामेण आलवेशि। अले पेक्ख[1]

Vidūṣaka :—Make haste, make haste, [O] auspicious-faced one. Your father is being led for being killed.

Dāraka :—Alas, father! Alas, papa!

Vidūṣaka :—Alas, dear friend! Where are you to be seen by me?

Cārudatta :—(*Seeing his son and friend*) Alas, son! Alas Maitreya! (*Pathetically*) Oh, the pity of it!

I shall indeed [have to] be thirsty for a long time in the other world! Extremely small [would be] for us, this libation water and food [offered by the son at the Srāddha, with his tiny hands]! (17)

What shall I offer to [my] son [as my legacy]? (*Looking over his own person, seeing the sacred thread*) Oh, yes. This indeed does belong to me—

The ornament of Brāhmaṇas, [though] not made of pearls or made of gold, by [the use of] which is offered the share [in the oblations] to Deities and the Manes! (18)

(*Gives his sacred thread*

Caṇḍāla :—Come along, you Cārudatta, come.

Second :—O [you], you are addressing Cārudatta without [any] title! O [you], see—

---

[1] भाजनम्।

अब्भुदए अवशाणे तहेअ लत्तिंदिवं अहदमग्गा ।
उद्दामे व्व किशोली णिअदी क्खु पडिच्छिदुं जादि ॥ १९ ॥
अण्णं च । शुक्खा ववदेशा[1] शे किं विणमिअ मत्थए ण काअव्वम्[2] ।
लाहुगाहिदे वि चन्दे ण वन्दणीए जणपदश्श ॥ २० ॥
[अरे आर्यचारुदत्तं निरुपपदेन नाम्नालपसि । अरे पश्य
अभ्युदयेऽवसाने तथैव रात्रिंदिवमहतमार्गा ।
उद्दामेव किशोरी नियतिः खलु प्रत्येषितुं याति ॥
अन्यच्च । शुष्का व्यपदेशा अस्य किं विनमितमस्तकं न कर्तव्यम् ।
राहुगृहीतोऽपि चन्द्रो न वन्दनीयो जनपदस्य ॥]

imp

दारकः—अरे रे चाण्डाला कहिं मे आवुकं णेध । [अरे रे चाण्डालौ कुत्र मम पितरं नयथः ।]

चारुदत्तः—वत्स

अंसेन बिभ्रत्करवीरमालां स्कन्धेन शूलं हृदयेन शोकम् ।
आघातमद्याहमनुप्रयामि शामित्रमालब्धुमिवाध्वरेऽजः ॥ २१ ॥

चाण्डालः—दालआ

In prosperity, [and] in adversity, [lit. at the rise and at the set] exactly in the same manner, with [its] course unimpeded day and night, does destiny, like a young mare unrestrained [by the reins], pass on, overriding indeed [a person]! (19)

And further,

[Though all] titles [are] useless [now] for him, should not the head be bent down [in his honour]? Is not the moon, though swallowed up [or, clasped] by Rāhu, not adorable by the [inhabitants of the] land? (20)

Dāraka :—O you Cāṇḍālas! Where are you taking my papa?

Cārudatta :—Dear boy!

Bearing the garland of Karavīra [flowers] across the shoulders, the stake on the shoulders, and affliction in the heart, I move on to-day to the place of execution, like the goat at sacrifice to the slaughterer for being killed! (21)

Cāṇḍāla :—Boy,

---

[1] वि वदेशा । [2] पणामिअ मत्थके ।

ण हु अम्हे चाण्डाला चाण्डालउलम्मि जादपुव्वा वि ।
जे अहिभवन्ति शाहुं ते पावा ते अ चाण्डाला ॥ २२ ॥

[दारक न खलु वयं[1] चाण्डालाश्चाण्डालकुले जातपूर्वा अपि ।
येऽभिभवन्ति साधुं ते पापास्ते च चाण्डालाः ॥

दारकः—ता कीस मालेध आवुकम् । [तत्किमर्थं मारयथः पितरम् ।]

चाण्डालः—दीहाओ अत्त लाअणिओओ क्खु अवलज्झादि ण क्खु अम्हे । [दीर्घायुः अत्र राजनियोगः खल्वपराध्यति न खलु आवाम् ।]

दारकः—वावादेध मम् । मुञ्चध आवुकम् । [व्यापादयतम् माम् । मुञ्चतं पितरम् ।]

चाण्डालः—दीहाओ एवं भणन्ते चिलं मे जीव । [दीर्घायुः एवं भणंश्चिरं मे जीव ।]

चारुदत्तः—(सास्रं पुत्रं कण्ठे गृहीत्वा)

इदं तत्स्नेहसर्वस्वं सममाढ्यदरिद्रयोः ।
अचन्दन[2]मनौशीरं हृदयस्यानुलेपनम् ॥ २३ ॥

(अंसेन बिभ्रत्–(१०।२१) इत्यादि पुनः पठति । अवलोक्य स्वगतम् अमी हि वस्त्रान्तनिरुद्धवक्त्राः (१०।१६) इत्यादि पुनः पठति)

Not indeed [are] we [really] Cāṇḍālas, though we have been already born in a Cāṇḍāla family ; those who ill-treat a good man, they [are] the sinful [people] and they [are the real] Cāṇḍālas. (22)

Dāraka :—Then, for what purpose are you killing [my] papa?

Cāṇḍāla :—Long-lived one, here the king's order indeed is at fault [or, offends], not indeed we.

Dāraka :—Kill me ; let go [my] papa.

Cāṇḍāla :—Long-lived one, live long for me, [you who are] talking thus !

Cārudatta :—(*Clasping his weeping son by the neck*)

This [that is, a son is] that well-known (*tat*) all-in-all of affection, the same for [both] the prosperous and the penniless the [soothing] ointment for the heart [though] not constituted of sandal or of Uśīra [paste]. (23)

[*Repeats again* '*Bearing across the shoulders*' *etc.* X. *21* ; *beholding, to himself, repeats again* '*These again, with their faces covered up with the ends of their garments*' *etc.* X. *16*

---

[1] खल्वावां चाण्डालौ...जातपूर्वावपि । [2] चान्दन ।

विदूषकः—भो भद्दमुहा मुञ्चध पिअवअस्सं चारुदत्तम् । मं वावादेध [भो भद्रमुखौ मुञ्चतं प्रियवयस्यं चारुदत्तम् । मां व्यापादयतम् ।]

चारुदत्तः—शान्तं पापम् । (दृष्ट्वा स्वगतम्) अद्यावगच्छामि ।] । [समसंस्थित— (१०।१६) इत्यादि पठति) (प्रकाशम्) एताः पुनर्हर्म्यगताः स्त्रियो माम् (१०।११) इत्यादि पुनः पठति)

चाण्डालः—ओशलध अज्जा ओशलध ।

किं पेक्खध शप्पुलिशं अजशवशेण प्पणट्ठजीवाशम् ।
कूवे खण्डिदपाशं कञ्चणकलशं व्वि डुब्बन्तम् ॥ २३ ॥

[अपसरतार्याः अपसरत ।

किं पश्यत सत्पुरुषमयशोवशेन प्रनष्टजीवाशम् ।
कूपे खण्डितपाशं काञ्चनकलशमिव मज्जन्तम् ॥]

(चारुदत्तः सकरुणम् शशिविमलमयूख—(१०।१३) इत्यादि पठति)

अपरः—अले पुणोवि घोशेहि । [अरे पुनरपि घोषय ।]

(चाण्डालस्तथा करोति)

चारुदत्तः—प्राप्तोऽहं व्यसनकृशां दशामनार्यां
यत्रेदं फलमपि जीवितावसानम् ।

Vidūṣaka :—O gentle sirs [lit. auspicious-faced ones], let go [my] dear friend Cārudatta. Kill me.

Cārudatta :—God forbid! (*Seeing, to himself*) To-day I have comprehended. (*Repeats 'Well-circumstanced' etc. X. 16*) (*Aloud*) [*Repeats again 'These ladies again stationed at the mansions...me' etc. X. 11*

Cāṇḍāla :—Get out of the way, gentlemen, get out of the way.

Why are you [keen on] looking at a good man who has lost [all] hope of life, gone under the control of infamy, like a golden jar sinking in a well, with the rope [holding it] cut off?

[Cārudatta *pathetically repeats* '*...pure rays of the moon*' (*X. 13*) *etc.*

The Other :—Aye, proclaim once again.

[Cāṇḍāla *does accordingly*

Cārudatta :—

I have [already] attained to an ignoble state wretched (*kṛśa*) owing to disaster, where the fruit [or, result] too [is]

---

१ कृता ।

एषा च व्यथयति घोषणा मनो मे
श्रोतव्यं यदिदमसौ मया हतेति ॥ २५॥

(ततः प्रविशति प्रासादस्थो बद्धः स्थावरकः)

स्थावरकः—(घोषणामाकर्ण्य सवैक्लव्यम्) कधं अपावे चालुदत्ते वावादीअदि। हग्गे णिअलेण शामिणा बन्धिदे। भोदु। आक्कन्दामि। शुणाध अज्जा शुणाध। अत्थि दाणिं मए पावेण पवहणपडिवत्तेण पुप्फकलण्डअजिण्णुज्जाणं वशन्तशेणा णीदा। तदो मम शामिणा मं ण कामेशित्ति कदुअ बाहुपाशवलक्कालेण मालिदा ण उण एदिणा अज्जेण। कथम्। विदूलदाए ण को वि शुणादि। ता किं कलेमि। अत्ताणअं पाडेमि। (विचिन्त्य) जइ एव्वं कलेमि तदा अज्जचालुदत्ते ण वावादीअदि। भोदु। इमादो पाशादबालग्गपदोलिकादो एदिणा जिण्णगवक्खेण अत्ताणअं णिक्खिवामि। वलं हग्गे उवलदे ण उण एशे कुलपुत्तविहगाणं वाशपादवे अज्जचालुदत्ते। एव्वं जइ विवज्जामि लद्धे मए पललोए। (इत्यात्मानं पातयित्वा) ही ही। ण उवलद्म्हि। भग्गे मे दण्डणिअले। ता चाण्डालघोशं शमण्णेशामि। (दृष्ट्वोपसृत्य) हंहो चाण्डाला अन्तलं अन्तलम्। [कथमपापश्चारुदत्तो व्यापाद्यते। अहं निगडेन स्वामिना बद्धः। भवतु। आक्रन्दामि। शृणुतार्याः शृणुत। अस्तीदानीं मया पापेन प्रवहणपरिवर्तेन पुष्पकरण्डकजीर्णोद्यानं वसन्तसेना नीता। ततो मम स्वामिना मां न कामयस इति कृत्वा बाहुपाशबलात्कारेण मारिता न पुनरेतेनार्येण। कथम्। विदूरतया न कोऽपि शृणोति। तत्किं करोमि। आत्मानं पातयामि।...यद्येवं करोमि तदार्यचारुदत्तो न व्यापाद्यते। भवतु। अस्याः प्रासादबालाग्रप्रतोलिकात् एतेन जीर्णगवाक्षेणात्मानं निक्षिपामि। वरमहमुपरतः न पुनरेष कुलपुत्रविहगानां वासपादप

noticed

---

this end of life. And [further] this proclamation pains my
mind in that I have to hear this, that she was killed by
me! (25)

(*Then is discovered* Sthāvaraka *bound down, stationed in the palace*)

Sthāvaraka :—(*Listening to the proclamation, with distress*) How? The innocent Cārudatta is being killed? I have been bound down with fetters by [my] Master. All right! I shall shout out. Listen, gentlemen, listen—Now it happened that by me, a sinful wretch, was carried Vasantasenā, owing to an interchange of cars, to the Puṣpakaraṇḍaka old garden. Then, by my Master was she killed by force with the noose of [his]

---

१ त्वया।

critical imp.

आर्यचारुदत्तः। एवं यादि विपये लब्धो मया परलोकः। ...आश्चर्यम्। नोपरतोऽस्मि। भग्नो मे दण्डनिगडः। तच्चाण्डालघोषं समन्विष्यामि। ...हंहो चाण्डालौ अन्तरमन्तरम्।

चाण्डालौ—अले के अन्तलं मग्गेदि। [अरे कोऽन्तरं याचते।]

(चेटः शुणाध (१०–२५–४) इति पूर्वोक्तं पठति)

चारुदत्तः—अये कोऽयमेवंविधे काले कालपाशस्थिते मयि।
अनावृष्टिहते सस्ये द्रोणमेघ इवोदितः॥ २६॥

भोः श्रुतं भवद्भिः। न भीतो मरणादस्मि केवलं दूषितं यशः।
विशुद्धस्य हि मे मृत्युः पुत्रजन्मसमो भवेत्॥ २७॥

---

arms, on the ground (*iti*) that she did not love him, and *not* by this noble one. What? No one hears, owing to the great distance! Then, what shall I do? Shall I throw myself down? (*Thinking*) If I do this, then the noble Cārudatta would not be killed! All right! From this small terrace-end of the palace, I shall throw myself down, through this old window. Better if I am dead [in doing this], but not this roosting tree for the birds in the form of nobly-born men, the noble Cārudatta. If I die thus, heaven is secured by me! (*Throwing himself down*) Ha! Ha! I have not died! [On the contrary] my fetters used for [my] chastisement have been smashed! So, I shall search for [the place of] the proclamation of the Cāṇḍālas! (*Seeing, approaching*) Halloa, Cāṇḍālas, [make] room, [make] room.

Cāṇḍālas :—Aye, who is asking for room?

[Ceṭa *repeats* '*Listen*' *etc. said before*

Cārudatta :—Ah!

Who is this one risen up at such a time when I am caught by the noose of Death, like the Droṇa cloud, when the crop is hit by drought? (26)

Oh, did you hear?

I am not afraid of death; only [my] fame has been tarnished. Death for me cleared [of guilt] would indeed be equal to [that is, as gratifying as] the birth of a son! (27)

अन्यच्च तेनास्म्यकृतवैरेण क्षुद्रेणात्यल्पबुद्धिना ।
शरेणेव विषाक्तेन दूषितेनापि दूषितः ॥ २८ ॥

चाण्डालौ—थावलअ अवि शच्चं भणाशि । [स्थावरक अपि सत्यं भणसि ।]

चेटः—शच्चम् । हगे वि मा कश्श वि कधइश्शशि त्ति पाशादबालग्गपदोलिकाए दण्डणिअलेण बन्धिअ णिक्खित्ते । [सत्यम् । अहमपि मा ३ कस्यापि कथयिष्यसीति प्रासादबालाग्रप्रतोलिकायां दण्डनिगडेन बद्ध्वा निक्षिप्तः ।]

(प्रविश्य) शकारः—(सहर्षम्)

मंशेण तिक्खामिलकेण भत्ते शाकेन शूपेण शमच्छकेण ।
भुत्तं मए अत्तणअश्श गेहे शालिश्श कूलेण गुलोदणेण ॥ २९ ॥

(कर्णं दत्त्वा) भिण्णकंशखङ्खणाए चाण्डालवाआए शलशंजोए । जधा अ एशे उक्खालिदे वज्झडिण्डिमशद्दे पडहाणं अ शुणीअदि तधा तक्केमि दलिद्दचालुदत्ताके वज्झट्ठाणं णीअदि त्ति । ता पेक्खिश्शम् । शत्तुविणाशे णाम मम महन्ते ३ हलकश्श पलिदोशे होदि । शुदं अ मए जे वि किल शत्तुं वावादअन्तं पेक्खदि

And further,

By him, with whom I had formed no enmity, mean, extremely weak-minded, [and] contaminated [himself], was I too (*api*) contaminated as though with an arrow besmeared with poison ! (28)

Cāṇḍālas :—Sthāvaraka, are you telling the truth ?

Ceṭa :—The truth. And I was also bound down with punitive fetters and thrown into the small terrace-end of the palace [by my Master] saying '[Beware], do not speak [about this] to any one.'

(*Entering*) **Sakāra** :—(*With joy*)

I have taken [my] meal in my house, with meat [made] pungent and sour, rice, vegetables, soup with fish, boiled Śāli rice, and rice mixed with guḍa. (29)

(*Listening*) [It is] the voice of the Cāṇḍālas speaking, producing a Khaṅkhaṇa sound like cracked bell-metal. And inasmuch as this loudly resounding noise of the drums and ḍiṇḍima [drums beaten at the execution] of the condemned [criminal], is being heard, I infer that the beggarly Cārudatta is being taken to the place of execution ! So, I shall [now] be looking on. The death of an enemy indeed is to me [the cause

तश्श अण्णाश्शिं जम्मन्तले अक्खिलोगे ण होदि। मए क्खु विशगण्ठिगब्भपविट्टेण विअ कीडएण किं पि अन्तलं मग्गमाणेण उप्पाडिदे ताह दलिद्दचालुदत्ताह विणाशे। शंपदं अत्तणकेलिकाए पाशादबालग्गपदोलिकाए अहिलुहिअ अत्तणो पलक्कमं पेक्खामि। (तथा कृत्वा दृष्ट्वा च) ही ही एद्दाह दलिद्दचालुदत्ताह वज्झं णीअमाणाह एवड्ढे जणशंमद्दे जं वेलं अम्हालिशे पवले वलमणुश्शे वज्झं णीअदि तं वेलं कीदिशे भवे। (निरीक्ष्य) कधम्। एशे शे णवबलद्दके विअ मण्डिदे दक्खिणं दिशं णीअदि। अध किंणिमित्तं ममकेलिकाए पाशादबालग्गपदोलिकाए शमीवे घोशणा णिवडिदा णिवालिदा अ। (विलोक्य) कधम् थावलके चेडे वि णत्थि इध। मा णाम तेण इदो गदुअ मन्तभेदे कडे भविश्शादि। ता जाव णं अण्णेशामि।

[मांसेन तिक्ताम्लेन भक्तं शाकेन सूपेन समत्स्यकेन।
भुक्तं मयात्मनो गेहे शालेः कूरेण गुडौदनेन॥

...भिन्नकांस्यवत्खड्गणायाश्चाण्डालवाचाया: स्वरसंयोग:। यथा चैष उत्खालितो वध्यडिण्डिमशब्द: पटहानां च श्रूयते तथा तर्कयामि दरिद्रचारुदत्तको वध्यस्थानं नीयत इति। तत्प्रेक्षिष्ये। शत्रुविनाशो नाम मम महान्हृदयस्य परितोषो भवति। श्रुतं च मया योऽपि किल शत्रुं व्यापाद्यमानं पश्यति तस्यान्यस्मिञ्जन्मान्तरेऽक्षिरोगो न भवति। मया खलु विषग्रन्थिगर्भप्रविष्टेनेव कीटकेन किमप्यन्तरं मृगयमाणेनोत्पादितस्तस्य दरिद्रचारुदत्तस्य विनाश:। सांप्रतमात्मीयायां प्रासादबालाग्रप्रतोलिकायामधिरुह्यात्मन:

---

of] great gratification of the heart. And I have heard—whosoever indeed sees [his] enemy being destroyed, would not have [any] eye-disease in [his] other next birth. By me indeed, like a worm entering [or, occupying] the interior of a poisonous knotted portion [of a herb] and seeking some way [therein], has been brought about the destruction of that beggarly Cārudatta. Now, ascending to the small terrace-end of my own palace, I shall witness [the outcome of] my own exploit. (*Doing accordingly and seeing*) Ha ! Ha ! If there [is] such a [huge] concourse of people, when this beggarly Cārudatta is being taken to [the place of] execution, what sort would [the crowd] be on the occasion, what time a most excellent, eminent human being like us is being taken to be executed ? (*Observing*) What ? Here is he being taken to the southern quarter, decked like a new [or. young] bull ! But, for what reason has the

पराक्रमं पश्यामि। ... ही ही एतस्य दरिद्रचारुदत्तस्य वध्यं नीयमानस्यैतावाञ्जनसंमर्दः यस्यां वेलायामस्मादृशः प्रवरो वरमानुषो वध्यं नीयते तस्यां वेलायां कीदृशो भवेत् । २८ ...कथम्। एष स नवबलीवर्द इव मण्डितो दक्षिणां दिशं नीयते। अथ किंनिमित्तं मदीयायाः प्रासादबालाग्रप्रतोलिकायाः समीपे घोषणा निपतिता निवारिता च । ...कथम् स्थावरकश्चेटोऽपि नास्तीह । मा नाम तेनेतो गत्वा मन्त्रभेदः कृतो भविष्यति । २७ तथावदेनमन्विष्यामि ।] (इत्यवतीर्योपसर्पति)

चेटः--(दृष्ट्वा) भट्टालका एशे शे आगडे। [भट्टारका एष स आगतः।]

चाण्डालौ-ओशलध देध मग्गं दालं ढक्केध होध तुण्हीआ ।
अविणअतिक्खविशाणे दुट्ठबइल्ले इदो एदि ॥ ३० ॥
[अपसरत दत्त मार्गं द्वारं पिधत्त भवत तूष्णीकाः ।
अविनयतीक्ष्णविषाणो दुष्टबलीवर्द इत एति ॥]

शकारः---अले अले अन्तलं अन्तलं देध। (उपसृत्य) पुत्तका थावलका चेडा एहि। गच्छम्ह। [अरे अरे अन्तरमन्तरं दत्त। ...पुत्रक स्थावरक चेट एहि । गच्छावः ।]

चेटः---ही ही अणज्ज वशन्तशेणिअं मालिअ ण पलितुट्टे शि । शंपदं पणइजणकप्पपादवं अज्जचालुदत्तं मालइदुं ववशिदे शि । [ही ही अनार्य वसन्तसेनां मारयित्वा न परितुष्टोऽसि। सांप्रतं प्रणयिजनकल्पपादपमार्यचारुदत्तं मारयितुं व्यवसितोऽसि ।]

---

proclamation been made and [immediately] stopped near the small terrace-end of my palace? (*Beholding*) What, Sthāvaraka Ceṭa is not here either. I hope, having gone from here, he would not be divulging the secret! So, I shall just make a search for him. [*Getting down, approaches*

Ceṭa :—(*Seeing*) Gentlemen, here has he come.

Cāṇḍālas :—
Get out of the way; make way; close the doors; remain
silent; here is coming [this] wicked bull with sharp horns in
the form of immodest [or, outrageous] behaviour! (30)

Śakāra :—Oh, oh, make way, [make] way. (*Approaching*) Dear son, Sthāvaraka Ceṭa, come; let us go.

Ceṭa :—Ha ! Ha ! Rogue ! You were not fully satisfied by killing Vasantasenā; [so] now, you are resolved upon killing the noble Cārudatta, the wish-fulfilling tree for the suppliants !

शकारः—ण हि लअणकुम्भशलिशे हग्गे इत्थिअं वावादेमि । [न हि रत्नकुम्भसदृशोऽहं स्त्रियं व्यापादयामि ।]

सर्वे—अहो तुए मारिदा । ण अज्जचारुदत्तेण । [अहो त्वया मारिता । नार्यचारुदत्तेन ।]

शकारः—के एव्वं भणादि [क एवं भणति ।]

सर्वे—(चेटमुद्दिश्य) णं एसो साहू । [नन्वेष साधुः ।]

शकारः—(अपवार्य सभयम्) अविद मादिके अविद मादिके कधं थावलके चेडे शुस्ठु ण मए शंजदे। एशे क्खु मम अकज्जश्श शक्खी।(विचिन्त्य) एव्वं दाव कलइश्शम्। (प्रकाशम्) अलिअं भश्टालका। हंहो एशे चेडे शुवण्णचोलिआए मए गहिदे पिश्टिदे मालिदे बद्धे अ। ता किदवेले एशे जं भणादि किं शच्चम् । (अपवारितकेन चेटस्य कटकं प्रयच्छति । स्वैरकम्) पुत्तका थावलका चेडा एदं गेण्हिअ अण्णधा भणाहि। [हन्त कथं स्थावरकश्चेटः सुष्ठु न मया संयतः। एष खलु ममाकार्यस्य साक्षी। ...एवं तावत्करिष्यामि। ...अलीकं भट्टारकाः। अहो एष चेटः सुवर्णचोरिकया मया गृहीतस्ताडितो मारितो बद्धश्च। तत्कृतवैर एष यद्भणति किं सत्यम् । ...पुत्रक स्थावरक चेट एतद्गृहीत्वान्यथा भण ।]

चेटः—(गृहीत्वा) पेक्खध पेक्खध भट्टालका। हंहो शुवण्णेण मं पलोभेदि । [पश्यत पश्यत भट्टारकाः। अहो सुवर्णेन मां प्रलोभयति ।]

Śakāra :—Resembling a jar full of jewels, I shall not surely be killing a woman !

All :—Oh, [she was] killed by you, not by the noble Cārudatta.

Śakāra :—Who says so ?

All :—(*Pointing to* Ceṭa) Well, this good man.

Śakāra :—(*Aside, in fear*) Alas ! Alas ! What ? Sthāvaraka Ceṭa was not properly secured [with chains] by me. He [is] indeed the witness of my [dastardly] crime. (*Thinking*) I shall just do this. (*Aloud*) A lie ! Gentlemen. Oh [look here], this Ceṭa was caught by me for the theft of gold, and beaten, given a hiding and bound down [or, imprisoned]. So, what he indeed being on inimical terms [with me], says—[is it] the truth ? (*Hands over his bracelet to* Ceṭa, *without being observed by others; in whisper*) Dear son, Sthāvaraka Ceṭa, speak otherwise [than what you have told before], on taking this.

Ceṭa .—(*Taking it*) Look, look, gentlemen. Oh, he is tempting me with [the bribe of] gold !

शकारः—(कटकमाच्छिद्य) एशे शे शुवण्णके जश्श कालणादो मए बद्धे । (सक्रोधम्) हंहो चाण्डाला मए क्खु एशे शुवण्णभण्डाले णिउत्ते शुवण्णं चोलअन्ते मालिदे पिट्टिदे। ता जदि ण पत्तिआअध ता पिट्ठिं दाव पेक्खध। [एतत्तत्सुवर्णकम् यस्य कारणान्मया बद्धः ।...हंहो चाण्डालाः मया खल्वेष सुवर्णभाण्डारे नियुक्तः सुवर्णं चोरयन्मारितस्ताडितः । तद्यदि न प्रत्येयाथाम् तदा पृष्ठं तावत्पश्यतम् ।]

चाण्डालौ—(दृष्ट्वा) शोहणं भणादि । वितत्ते चेडे किं ण प्पलवदि । [शोभनं भणति । वितप्तश्चेटः किं न प्रलपति।]

चेटः—हीमादिके ईदिशे दाशभावे जं शच्चं कंवि ण पत्तिआइअदि । (सकरुणम्) अज्जचालुदत्त एत्तिके मे विहवे । [हन्त ईदृशो दासभावः । यत्सत्यं कमपि न प्रत्याययति ।...आर्यचारुदत्त एतावान्मे विभवः।] (इति पादयोः पतति)

चारुदत्तः—(सकरुणम्)

उत्तिष्ठ भोः पतितसाधुजनानुकम्पि-
न्निष्कारणोपगतबान्धव धर्मशील ।
यत्नः कृतोऽपि सुमहान्मम मोक्षणाय
दैवं न संवदति किं न कृतं त्वयाद्य ॥ ३१ ॥

Śakāra :—(*Snatching away the bracelet*) This [is] that gold for the sake of which, he was bound down by me. (*With rage*) Halloa, Cāṇḍālas ! By me indeed was this one appointed to [guard my] gold treasure, beaten and given a hiding when he stole [lit. stealing] the gold. So, if you are not convinced [by my words], just inspect then [his] back.

Cāṇḍālas :—(*Seeing*) He speaks rightly. What would not the Ceṭa, greatly tormented, be prattling ?

Ceṭa :—Alas ! Such [is] servitude, that it can not convince any one of truth [being spoken by a servant]. (*Pathetically*) Noble Cārudatta, so much [only is] my power [to help you].
[*Falls at his feet*

Cārudatta :—(*Pathetically*)

Get up, you taking pity on a good man down [on his luck], [you] a relative come disinterestedly, [you] of a righteous nature ; though a very great effort was made [by you] for my release, Fate does not fall in with [it]. What has not been done by you to-day [for me]?

चाण्डालौ—भट्टके पिट्टिअ एदं चेडं णिक्खालेहि । [भट्टक ताडयित्वैतं चेटं निष्कासय ।]

शकारः—णिक्कम ले । (इति निष्कामयति) अले चाण्डाला किं विलम्बेध । मालेध एदम् । [निष्काम रे ।...अरे चाण्डालौ किं विलम्बेथे । मारयतमेतम् ।]

चाण्डालौ—जदि तुवलाशि ता शअं ज्जेव मालेहि । [यदि त्वरयसे तदा स्वयमेव मारय ।]

रोहसेनः—अले चाण्डाला मं मालेध । मुञ्चध आवुकम् । [अरे चाण्डालौ मां मारयतम् । मुञ्चतं पितरम् ।]

शकारः—शपुत्तं ज्जेव एदं मालेध । [सपुत्रमेवैतं मारयतम् ।]

चारुदत्तः—सर्वमस्य मूर्खस्य संभाव्यते । तद्गच्छ पुत्र मातुः समीपम् ।]

रोहसेनः—किं मए गदेण कादव्वम् । [किं मया गतेन कर्तव्यम् ।]

चारुदत्तः—

आश्रमं वत्स गन्तव्यं गृहीत्वाद्यैव मातरम् ।
मा पुत्र पितृदोषेण त्वमप्येवं गमिष्यसि ॥ ३२ ॥

तद्वयस्य गृहीत्वैनं व्रज ।

विदूषकः—भो वअस्स एव्वं तुए जाणिदम् तुए विणा अहं पाणाइं धारेमि त्ति । [भो वयस्य एवं त्वया ज्ञातम् त्वया विनाहं प्राणान्धारयामीति ।]

Cāṇḍālas :—Master, having beaten this Ceṭa, drive [him] out.

Śakāra :—Get away, you ! (*Drives him out*) O you Cāṇḍālas, why are you delaying ? Kill him.

Cāṇḍālas :—If you are in [such] a hurry, then, kill [him] yourself.

Rohasena :—O Cāṇḍālas, kill me ; release [my] father.

Śakāra :—Kill him indeed along with [his] son.

Cārudatta :—Everything is possible in the case of this fool. So go, [my] son, to [your] mother.

Rohasena :—What should I do, on going away ?

Cārudatta :—

Taking [your] mother, you should go this very day, child, to [stay in] a hermitage ; may not you also, son, come to this [pass] owing to the crime of [your] father ! (32)

So, friend, go taking him [with you].

Vidūṣaka :—O friend, you know this [too well] —would I [be able to] bear [my] life without you

चारुदत्तः—वयस्य स्वाधीनजीवितस्य न युज्यते तव प्राणपरित्यागः।

विदूषकः—(स्वगतम्) जुत्तं ण्णेदम्। तधा वि ण सक्कुणोमि पिअवअस्साविरहिदो पाणाइं धारेदुं त्ति। ता बम्हणीए दारअं समप्पिअ पाणपरिच्चाएण अत्तणो पिअवअस्सं अणुगमिस्सम्। (प्रकाशम्) भो वअस्स पराणेमि एदं लहुम् [युक्तं न्विदम्। तथापि न शक्नोमि प्रियवयस्यविरहितः प्राणान्धारयितुमिति। तद्ब्राह्मण्यै दारकं समर्प्य प्राणपरित्यागेनात्मनः प्रियवयस्यमनुगमिष्यामि। ...भो वयस्य पराणयाम्येतं लघु।] (इति सकण्ठग्रहं पादयोः पतति) (दारकोऽपि रुदन्पतति)

शकारः—अले णं भणामि शपुत्ताकं चालुदत्ताकं वावादेध त्ति। [अरे ननु भणामि सपुत्रकं चारुदत्तं व्यापादयतमिति।] (चारुदत्तो भयं नाटयति]

चाण्डालौ—णहि अम्हाणं ईदिशी लाआण्णत्ती जधा शपुत्तं चालुदत्तं वावादेध त्ति। ता णिक्कम ले दालआ णिक्कम। (इति निष्क्रामयतः) इमं तइअं घोशणट्ठाणम्। ताडेध डिण्डिमम्। [न ह्यावयोरीदृशी राजाज्ञप्तिः यथा सपुत्रं चारुदत्तं व्यापादयतमिति। तन्निष्काम रे दारक निष्काम।...इदं तृतीयं घोषणास्थानम्। ताडयत डिण्डिमम्।] (पुनर्घोषयतः)

शकारः—(स्वगतम्) कधं एशे ण पत्तिआअन्ति पौला। (प्रकाशम्) हंहो चालुदत्ता वडुका ण पत्तिआअदि एशे पौलजणे। ता अत्तणकेलिकाए

Cārudatta :—Friend, the abandonment of life by you who can command your life, is not proper.

Vidūṣaka :—(*To himself*) This [is] indeed proper. Still I cannot remain alive [lit. bear life], separated from [my] dea friend. So, having handed over the boy to the Brāhmaṇa lady [Cārudatta's wife], I shall follow [my] dear friend by abandoning [my] life. (*Aloud*) O friend, I shall take this one back straight away (*laghu*).

[*Having embraced him, clasping round the neck, falls at his feet. The boy also, weeping falls prostrate*

Śakāra :—O [you], surely I say—Kill Cārudatta along with [his] son. [Cārudatta *gesticulates fear*

Cāṇḍālas :—Such [is] not the king's order to us, viz.—Kill Cārudatta along with [his] son. Well, go away, you boy, go away. (*Send him away*). This [is] the third proclamation-place. Beat the drum. [*Proclaim again*

Śakāra :—(*To himself*) How, these citizens are not [still] convinced. (*Aloud*) Halloa, Cārudatta, [you] brat, this crowd

जीहाए भणाहि मए वशन्तशेणा मालिदेत्ति । (कथमेते न प्रत्ययन्ते पौराः ।...अरे चारुदत्त बटुक न प्रत्ययत एष पौरजनः । तदात्मीयया जिह्वया भण मया वसन्तसेना मारितेति ।]

(चारुदत्तस्तूष्णीमास्ते)

शकारः—अले चण्डालगोहे ण भणादि चालुदत्तवडुके । ता भणावेध इमिणा जज्जलवंशखण्डेण शङ्खलेण तालिअ तालिअ । [अरे चाण्डालमनुष्य न भणति चारुदत्तबटुकः । तद्भणयतमनेन जर्जरवंशखण्डेन शङ्खलेन ताडयित्वा ताडयित्वा]

चाण्डालः—(प्रहारमुद्यम्य) भो चालुदत्त भणाहि । [भोश्चारुदत्त भण ।]

चारुदत्तः—(सकरुणम्)

प्राप्यैतद्व्यसनमहार्णवप्रपातं
न त्रासो न च मनसोऽस्ति मे विषादः ।
एको मां दहति जनापवादवह्नि-
र्वक्तव्यं यदिह मया हता प्रियेति ॥ ३३ ॥

(शकारः पुनस्तथैव)

चारुदत्तः—भो भोः पौराः (मया खलु नृशंसेन (९।३०,३८) इत्यादि पुनः पठति ।)

शकारः—वावादिदा । [व्यापादिता ।]

चारुदत्तः—एवमस्तु ।

---

of citizens does not believe [in, your guilt]. So, speak out with your own tongue—' By me was killed Vasantasenā.'

[Cārudatta *remains silent*

Śakāra :—O Cāṇḍāla-man, [this] Cārudatta brat does not speak out. So, make [him] speak out, by beating and beating [him] with this old bamboo-piece, the drum-stick.

Cāṇḍāla :—(*Lifting up his scourge*) O Cārudatta, speak out.

Cārudatta :—(*Pathetically*)

Having got this fall into the big ocean of misery, I have [or, feel] no fear, nor again dejection in [my] mind. [But] one [thing, viz.], the fire of public censure burns me, that I have to say here that by me was killed [my] beloved. (33)

[Śakāra *again says as before*

Cārudatta :—O you citizens! (*Repeats again* ' *By me, indeed, the cruel one* ' *etc. IX- 30, 38*)

Śakāra :—Was killed.

Cārudatta :—So be it.

प्रथमचाण्डालः—अले तव अत्त वज्झवालिआ। [अरे तवात्र वध्यपालिका।]

द्वितीयचाण्डालः—अले तव। [अरे तव।]

प्रथमः—अले लेक्खअं कलेम्ह। (इति बहुविधं लेखकं कृत्वा) अले जदि ममकेलिका वज्झवालिआ ता चिट्ठदु दाव मुहुत्तअम्। [अरे लेखं कुर्वः। ...अरे यदि मदीया वध्यपालिका तदा तिष्ठतु तावन्मुहूर्तकम्।]

द्वितीयः—किंणिमित्तम्। [किंनिमित्तम्।]

प्रथमः—अले भणिदो म्हि पिदुणा शग्गं गच्छन्तेण जधा—पुत्त वीरअ जइ तुह वज्झवालिआ होदि मा शहशा वावादअशि वज्झम्। [अरे भणितोऽस्मि पित्रा स्वर्गं गच्छता यथा—पुत्र वीरक यदि तव वध्यपालिका भवति मा सहसा व्यापादयसि वध्यम्।]

द्वितीयः—अले किंणिमित्तम्। [अरे किंनिमित्तम्।]

प्रथमः—कदावि कोवि साहू अत्थं दइअ वज्झं मोआवेदि। कदावि लण्णो पुत्ते भोदि तेण वद्धावेण शव्ववज्झाणं मोक्खे होदि। कदावि हत्थी बन्धं खण्डेदि तेण शंभमेण वज्झे मुक्के होदि। कदावि लाअपलिवत्ते होदि तेण शव्ववज्झाणं मोक्खे होदि। [कदापि कोऽपि साधुरर्थं दत्त्वा वध्यं मोचयति। कदापि राज्ञः पुत्रो

First Cāṇḍāla :—Oh, your turn to kill in this case.

Second Cāṇḍala :—Oh, yours.

First :—Oh, let us draw lines [or, lots]. (*Drawing lines in various ways*) Oh, if it [would be] my turn to kill, then just let it stand over for a while.

Second :—Oh, for what reason ?

First :—Oh, I was addressed by my father going to heaven [that is, when on death-bed] thus—Son, Vīraka, when it is your turn to kill, you should not straightaway kill the condemned person.

Second :—Oh, for what reason ?

First :—Sometimes, some good man or other releases the condemned person by giving wealth [as ransom]. Perhaps a son is born to the king : owing to the [great festival on the] prosperous occasion, there is the release of all the condemned persons. Sometimes an elephant breaks [his] chains, and the condemned person becomes free, as a result of the consternation

भवति तेन वृद्धिमहोत्सवेन सर्ववध्यानां मोक्षो भवति। कदापि हस्ती बन्धं खण्डयति तेन संभ्रमेण वध्यो मुक्तो भवति। कदापि राजपरिवर्तो भवति तेन सर्ववध्यानां मोक्षो भवति।]

com

शकारः—किं किं लाअपलिवत्ते होदि । [किं किं राजपरिवर्तो भवति ।]

चाण्डालः—अले वज्झवालिआए लेक्खअं कलेम्ह । [अरे वध्यपालिकाया लेखं कुर्वः ।]

शकारः—अले शिग्घं मालेध चालुदत्तकम् । [अरे शीघ्रं मारयतं चारुदत्तम् ।]

(इत्युक्त्वा चेटं गृहीत्वैकान्ते स्थितः)

चाण्डालः—अज्जचालुदत्त लाअणिओओ क्खु अवलज्झादि ण क्खु अम्हे चाण्डाला। ता शुमलेहि जं शुमलिद्व्वम् । [आर्यचारुदत्त राजनियोगः खल्वपराध्यति न खलु आवां चाण्डालौ । तत्स्मर यत्स्मर्तव्यम् ।]

चारुदत्तः—प्रभवति यदि धर्मो दूषितस्यापि मेऽद्य
प्रबलपुरुषवाक्यैर्भाग्यदोषात्कथंचित् ।
सुरपतिभवनस्था यत्र तत्र स्थिता वा
व्यपनयतु कलङ्कं [1]स्वस्वभावेन सैव ॥ ३४ ॥

भोः क्व तावन्मया गन्तव्यम् ।

[produced]. Sometimes a revolution breaks out [lit. there is a change of kings]; then there is the release of all condemned persons.

Śakāra :—What, what! Would there be a change of kings!

Cāṇḍāla :—Oh, let us draw lines about the turn to kill.

Śakāra:—Oh, kill Cārudatta quickly.

[*So saying, taking* Ceṭa *with him, stands in a corner*

Cāṇḍāla :—Noble Cārudatta, [it is] the king's order [that] is indeed at fault here, not indeed we Cāṇḍālas. So, remember what should be remembered [at such a time].

Cārudatta :—

If [my] piety has [any] power, of me, although somehow condemned to-day on the [strength of the] words of powerful persons, through [my] adverse fortune [lit. fault of fortune]- let she herself occupying the abode of Indra, or wherever staying, remove off [this] stigma, by her own nature! (34)

Oh, where now have I to go?

---

[1] स्वग्निभावेन ।

चाण्डालः—(अग्रतो दर्शयित्वा) अले एदं दीशदि दक्खिणमशाणम् जं पेक्खिअ वज्झा झत्ति पाणाइं मुंचन्ति । पेक्ख पेक्ख ।

अद्धं कलेवलं पडिवुत्तं कड्ढन्ति दीहगोमाआ ।
अद्धं पि शूललग्गं वेशं विअ अट्टहाशश्श ॥ ३५ ॥

[अरे एतद्दृश्यते दक्षिणश्मशानम् यत्प्रेक्ष्य वध्या झटिति प्राणान्मुञ्चन्ति । पश्य पश्य । अर्धं कलेवरं प्रतिवृत्तं कर्षन्ति दीर्घगोमायवः ।
अर्धमपि शूललग्नं वेश इवाट्टहासस्य ॥]

चारुदत्तः—हा हतोऽस्मि मन्दभाग्यः । (इति सावेगमुपविशति)

शकारः—ण दाव गमिश्शम्। चालुदत्तकं वावादअन्तं दाव पेक्खामि। (परिक्रम्य दृष्ट्वा) कधं उवविश्टे [न तावद्गमिष्यामि । चारुदत्तकं व्यापाद्यमानं तावत्पश्यामि । ...कथमुपविष्टः ।]

चाण्डालः—चालुदत्ता किं भीदेशि । [चारुदत्त किं भीतोऽसि ।]

चारुदत्तः—(सहसोत्थाय) मूर्ख । (न भीतो मरणादस्मि केवलं दूषितं यशः (१०।२७) इत्यादि पुनः पठति)

Cāṇḍāla :—(*Pointing out in front*) Oh, here is seen the southern cemetery, on seeing which, the condemned persons straightaway abandon life ! See, see—

The jackals [with their bodies] stretched out, are dragging the half [lower portion of the] corpse hanging down, and the [other] half too is sticking to the stake, like the dress [or, mask] of loud [or, grinning] laughter [of Death]. (35)

Cārudatta :—Ha ! I am undone, luckless [that I am]. [*Sits down in a flurry*

Sakāra :—I shall not go for the present. I shall just see Cārudatta [actually] being killed. (*Walking about, seeing*) What ! He has sat down !

Cāṇḍāla :—Cārudatta, are you afraid ?

Cārudatta :—(*Suddenly getting up*) Fool !

[*Repeats again* ' *I am not afraid of death, only* [*my*] *fame has been contaminated* ' *etc. X. 27*

चाण्डालः—अज्जचालुदत्त गणअदले पडिवशन्ता चन्दशुज्जा वि विपत्तिं लहन्ति । किं उण जणा मलणभीलुआ माणवा वा । लोए कोवि उट्ठिदो पडदि कोवि पडिदोवि उट्ठेदि ।

उट्ठन्तपडन्ताह वशणपाडिआ शवश्श उण अत्थि ।
एदाइं हिअए कदुअ संधालेहि अत्ताणअम् ॥ ३६ ॥

(द्वितीयचाण्डालं प्रति) एदं चउट्ठं घोशणट्ठाणम् । ता उग्घोशम्ह :

v. imp.
imp./critical

[आर्यचारुदत्त गगनतले प्रतिवसन्तौ चन्द्रसूर्यावपि विपत्तिं लभेते । किं पुनर्जना मरणभीरुका मानवा वा । लोके कोऽप्युत्थितः पतति कोऽपि पतितोऽप्युत्तिष्ठते ।

उत्तिष्ठत्पततो वसनपातिका शवस्य पुनरस्ति ।
एतानि हृदये कृत्वा संधारयात्मानम् ॥

...एतच्चतुर्थं घोषणस्थानम् । तदुद्घोषयावः ।] (पुनस्तथैवोद्घोषयतः)

चारुदत्तः—हा प्रिये वसन्तसेने । (शशिविमलमयूख (१०।१३) इत्यादि पुनः पठति) (ततः प्रविशति ससंभ्रमा वसन्तसेना भिक्षुश्च)

भिक्षुः—हीमाणहे अट्ठाणपलिश्शन्तं शमश्शाशिअ वशन्तशेणिअं णअन्ते अणुग्गहिदम्हि पव्वज्जाए । उवाशिके कहिं तुमं णइश्शम् । [आश्चर्यम् अस्थान-परिश्रान्तां समाश्वास्य वसन्तसेनिकां नयन्ननुगृहीतोऽस्मि प्रव्रज्यया । उपासिके कुत्र त्वां नेष्यामि ।]

Cāṇḍāla :—Noble Cārudatta, even the sun and the moon residing in the sky-region, do undergo privations : what then of people [in general] or men afraid of death? In [this] world, some one [after] rising up, falls [down] ; some one although [already] fallen down, rises [again].

Of the corpse, rising up and falling, there is the process of the falling [or, throwing] away of a garment ; bearing these [things in [your] heart, sustain yourself. (36)

(*To the* Second Cāṇḍāla) This [is] the fourth proclamation-place. So, let us proclaim.

[*They proclaim again even as before*

Cārudatta :—Alas ! Beloved Vasantasenā !

[*Repeats again* ...'*pure rays of the moon*' *etc X. I. 3*

(*Then enter in excitement* Vasantasenā *and* Bhikṣu)

Bhikṣu :—O wonder ! [In having the privilege of] leading on Vasantasenā, after comforting her fatigued in a strange [or, out-of-the-way] place, I am obliged to [my] renunciation. [Buddha-] worshipper, where shall I take you ?

वसन्तसेना—अज्जचारुदत्तस्स ज्जेव गेहम्। तस्स दंसणेग मिअलाञ्छणस्स विअ कुमुदिणिं आणन्देहि मम् । [आर्यचारुदत्तस्यैव गेहम् । तस्य दर्शनेन मृगलाञ्छनस्येव कुमुदिनीमानन्दय माम् ।)

भिक्षुः—(स्वगतम्) कदलेण मग्गेण पविशामि । (विचिन्त्य) लाअमग्गेण ज्जेव पविशामि । उवाशिके एहि । इमं लाअमग्गम् । (आकर्ण्य) किं णु क्खु एशे लाअमग्गे महन्ते कलअले शुणीअदि । [कतरेण मार्गेण प्रविशामि ।...राजमार्गेणैव प्रविशामि । उपासिके एहि । अयं राजमार्गः ।...किं नु खल्वेष राजमार्गे महान्कलकलः श्रूयते ।]

वसन्तसेना—(अग्रतो निरूप्य) कधं पुरदो महाजणसमूहो। अज्ज जाणाहि दाव किं णेदं त्ति। विसमभरक्कन्ता विअ वसुंधरा एअवासोण्णदा उज्जइणी वट्टादि । [कथं पुरतो महाजनसमूहः । आर्य जानीहि तावत्किं न्विदमिति । विषमभरकान्तेव वसुंधरा एकपार्श्वोन्नतोज्जयिनी वर्तते ।]

चाण्डालः—इमं अ पच्छिमं घोशणट्ठाणम् । ता तालेध डिण्डिमम् । उग्घोशेध घोशणम् । (तथा कृत्वा) भो चालुदत्त पडिवालेहि । मा भाआहि । लहुं ज्जेव मालीअशि । [इदं च पश्चिमं घोषणस्थानम् । तत्ताडयत डिण्डिमम् । उद्घोषयत घोषणाम् । ...भोः चारुदत्त प्रतिपालय । मा भैः । शीघ्रमेव मार्यसे ।]

चारुदत्तः—भगवत्यो देवताः ।

Vasantasenā :—To the noble Cārudatta's house itself. Delight me with his sight, like the night-lotus [with that] of the moon [having the hare for his mark].

Bhikṣu :—(*To himself*) By what route shall I enter [the city]? (*Thinking*) I shall enter by the king's highway itself. [Buddha-] worshipper, come on. Here [is] the king's highway. (*Listening*) How possibly is being indeed heard this big confused noise on the king's highway ?

Vasantasenā :—(*Observing in front*) What ! A huge concourse of people, in front ! Noble one, just find out what possibly it [is]. Ujjayinī is [as though] raised up on one side, the earth being as though packed up with an uneven load !

Cāṇḍāla :—And this [is] the last proclamation-place. So, beat the drum ; proclaim the proclamation. (*Doing accordingly*) O Cārudatta, [just] wait ; do not be afraid. You would be killed in the shortest time !

Cārudatta :—Holy deities !

---

१ एकवासान्नतो ।

भिक्षुः—(श्रुत्वा ससंभ्रमम्) उवाशिके तुमं किल चालुदत्तेण मालिदाशि त्ति चालुदत्तो मालिदुं णीअदि। [उपासिके त्वं किल चारुदत्तेन मारितासीति चारुदत्तो मारयितुं नीयते ।]

वसन्तसेना—(ससंभ्रमम्) हद्धी हद्धी कधं मम मन्दभाईणीए कीदे अज्जचारुदत्तो वावादीअदि। भो तुरिदं तुरिदं आदेसेहि मग्गम्। [हा धिक् हा धिक् कथं मम मन्दभागिन्याः कृत आर्यचारुदत्तो व्यापाद्यते। भोः त्वरितं त्वरितमादेशय मार्गम् ।]

भिक्षुः—तुवलदु तुवलदु बुद्धोवाशिआ अज्जचालुदत्तं जीअन्तं शमश्शाशिदुम् । अज्जा अन्तलं अन्तलं देध। [त्वरतां त्वरतां बुद्धोपासिकार्यचारुदत्तं जीवन्तं समाश्वासयितुम् । आर्याः अन्तरमन्तरं दत्त ।]

वसन्तसेना—अन्तरं अन्तरम्।[अन्तरमन्तरम् ।]

चाण्डालः—अज्जचालुदत्त शामिणिओओ अवलज्झादि । ता शुमलेहि जं शुमलिदव्वम्। [आर्यचारुदत्त स्वामिनियोगोऽपराध्यति । तत्स्मर यत्स्मर्तव्यम् ।]

चारुदत्तः—किं बहुना। (प्रभवति (१०।२४) इत्यादि श्लोकं पठति)

चाण्डालः—(खड्गमाकृष्य) अज्जचालुदत्त उत्ताणे भविअ शमं चिट्ठ। एक्कपहालेण मालिअ तुमं शग्गं णेम्ह। [आर्यचारुदत्त उत्तानो भूत्वा समं तिष्ठ। एकप्रहारेण मारयित्वा त्वां स्वर्गं नयावः ५] (चारुदत्तस्तथा तिष्ठति)

Bhikṣu :—(*Hearing, in excitement*) [Buddha-]worshipper here is Cārudatta being led for being killed, on the ground (*iti*) that you indeed were killed by Cārudatta !

Vasantasenā :—(*In a flurry*) Ah, fie ! Ah, fie ! What, is the noble Cārudatta being destroyed on account of me, the luckless one ! Oh, direct me the way very quickly !

Bhikṣu :—Hurry up, hurry up, [Buddha-]worshipper to comfort the noble Cārudatta [while still] alive ! Gentlemen, make way, [make] way.

Vasantasenā :—[Make] way, way.

Cāṇḍāla :—Noble Cārudatta, the master's order is at fault here. So, remember what should be remembered [at such a time].

Cārudatta :—What [is the use of saying] a good deal ?

[*Repeats the verse* ' *If* [*my*] *piety has* [*any*] *power* ' *etc. X. 34*

Cāṇḍāla :—(*Drawing out his sword*) Noble Cārudatta, lying flat, remain steady [or, straight.]. We shall despatch you to heaven, killing you with [only] one stroke !

[**Cārudatta** *remains in that state*

चाण्डालः—(प्रहर्तुमीहते । खड्गपतनं हस्तादभिनयन्) ही कधम् ।

आअड्ढिदे शलोशं मुट्ठीए मुट्ठिणा गहीदे वि ।
धलणीए कीश पडिदे दालुणके अशणिशंणिहे खग्गे ॥ ३७ ॥

जधा एदं शंवुत्तम् तधा तक्केमि ण विवज्जादि अज्जचालुदत्ते त्ति । भअवदि
शज्झवाशिणि पशीद पशीद । अवि णाम चालुदत्तश्श मोक्खे भवे । तदो अणु-
गहिदं तुए चाण्डालउलं भवे । [ही कथम् ३

आकृष्टः सरोषं मुष्टौ मुष्टिना गृहीतोऽपि ।
धरण्यां किमर्थं पतितो दारुणकोऽशनिसंनिभः खड्गः ॥

यथैतत्संवृत्तम् तथा तर्कयामि न विपद्यत आर्यचारुदत्त इति । भगवति सह्यवासिनि ६
प्रसीद प्रसीद । अपि नाम चारुदत्तस्य मोक्षो भवेत् तदानुगृहीतं त्वया चाण्डालकुलं
भवेत् ।] ९

अपरः—जधाणत्तं अणुचिट्ठम्ह । [यथाज्ञप्तमनुतिष्ठावः ।]

प्रथमः—भोदु । एव्वं कलेम्ह । [भवतु । एवं कुर्वः ।]

(इत्युभौ चारुदत्तं शूले समारोपयितुमिच्छतः) १२

चारुदत्तः प्रभवति (१०।३४) इत्यादि पुनः पठति)

भिक्षुर्वसन्तसेना च—(दृष्ट्वा) अज्जा मा दाव मा दाव । अज्जा एसा
अहं मन्दभाइणी जाए कारणादो एसो वावादीअदि । [आर्याः मा तावन्मा तावत् । १५
आर्याः एषाहं मन्दभागिनी यस्याः कारणादेष व्यापाद्यते ।]

Cāṇḍāla :—(*Is about to strike ; gesticulating the falling of the sword from his hand*) Ha ! How !

Dragged out with vehemence by the fist and although held
fast by the fist,—for what purpose has fallen down on the ground
the sword, terrible and resembling the thunder-bolt ! (37)

Whereas this has [however] happened, I infer that the
noble Cārudatta would [or, can] not be killed. [O] holy
[goddess Durgā] having the Sahya [mountain] as [your] abode !
Be pleased, be pleased. If indeed there would occur the release
of Cārudatta, then [the whole] Cāṇḍāla race would be blessed
by you !

Second :—Let us do as ordered.

First :—All right. Let us do so.

[*Both are about to fix* Cārudatta *on the stake* ; Cārudatta *repeats again* ' *If* [*my*] *piety has* [*any*] *power* ' *etc.* X. 34

Bhikṣu and Vasantasenā :—(*Seeing*) Gentlemen, not thus, not thus. Gentlemen, here I [am], the unfortunate one, on whose account this one is being killed !

चाण्डालः—(दृष्ट्वा)

का उण तुलिदं एशा अंशपडन्तेण चिउलभालेण ।
मा मेत्ति वाहलन्ती उद्विदहत्था इदो एदि ॥ ३८ ॥
[का पुनस्त्वरितमेषांसपतता चिकुरभारेण ।
मा मेति व्याहरन्त्युत्थितहस्तेत एति ॥]

वसन्तसेना—अज्जचारुदत्त किं ण्णेदम् । [आर्यचारुदत्त किं न्विदम् ।] (इत्युरसि पतति)

भिक्षुः—अज्जचालुदत्त किं ण्णेदम् । [आर्यचारुदत्त किं न्विदम् ।] (इति पादयोः पतति)

चाण्डालः—(सभयमपसृत्य) कथम् वशन्तशेणा । णं क्खु अम्हेहिं शाहू ण वावादिवे । [कथम् वसन्तसेना । ननु खल्वस्माभिः साधुर्न व्यापादितः ।]

भिक्षुः—(उत्थाय) अले जीवदि चालुदत्ते । [अरे जीवति चारुदत्तः ।]

चाण्डालः—जीवदि वश्शशदम् । [जीवति वर्षशतम् ।]

वसन्तसेना—(सहर्षम्) पच्चुज्जीविदम्हि । [प्रत्युज्जीवितास्मि ।]

चाण्डालः—ता जाव एदं वुत्तं राइण्णो जण्णवाडगदश्श णिवेदेम्ह । [तद्यावदेतद्वृत्तं राज्ञो यज्ञवाटगतस्य निवेदयावः ।] (इति निष्क्रामतः)

Cāṇḍāla :—(*Seeing*)

Who is this one again, coming here hastily, with [her] mass of curly hair falling over [her] shoulders, saying ' Stop, stop [lit. no, no]' with [her] hand raised up ? (38)

Vasantasenā :—Noble Cārudatta ! What indeed [or, possibly is] this ! [*Falls on his bosom*

Bhikṣu :—Noble Cārudatta ! What indeed [or, possibly is] this ! [*Falls at his feet*

Cāṇḍāla :—(*Moving back in alarm*) What ? Vasantasenā ! Surely indeed [it was a very lucky thing that this] good man was not killed by us !

Bhikṣu :—(*Getting up*) Oh, is Cārudatta alive ?

Cāṇḍāla :—He lives a hundred years !

Vasantasenā :—(*With joy*) I have been brought back to life [by this news] !

Cāṇḍāla :—So, now, let us report this state of things to th King gone to the sacrificial court. [*Start to go away*

शकारः—(वसन्तसेनां दृष्ट्वा सत्रासम्) हीमादिके। केण गब्भदाशी जीवाविदा। उक्कन्ताइं मे पाणाइं। भोदु। पलाइश्शम्। [आश्चर्यम्। केन गर्भदासी जीवनं प्रापिता। उत्क्रान्ता मे प्राणाः। भवतु। पलायिष्ये।] (इति पलायते)

चाण्डालः—(उपसृत्य) अले णं अम्हाणं ईदिशी लाआणत्ती—जेण शा वावादिदा तं मालेध त्ति। ता लट्ठिअशालअं जेव अण्णेशम्ह। [अरे नन्वावयोरीदृशी राजाज्ञप्तिः—येन सा व्यापादिता तं मारयतमिति। तद्राष्ट्रियश्यालमेवान्विष्यावः।] (इति निष्क्रान्तौ)

चारुदत्तः—(सविस्मयम्)

केयमभ्युद्यते शस्त्रे मृत्युवक्त्रगते मयि।
अनावृष्टिहते सस्ये द्रोण[1]वृष्टिरिवागता ॥ ३९ ॥

(अवलोक्य च)

वसन्तसेना किमियं द्वितीया समागता सैव दिवः किमित्थम्।
भ्रान्तं मनः पश्यति वा ममैनां वसन्तसेना न मृताथ सैव ॥ ४० ॥

अथवा

किं नु स्वर्गात्पुनः प्राप्ता मम जीवातुकाम्यया।
तस्या रूपानुरूपेण किमुतान्येयमागता ॥ ४१ ॥

Śakāra:—(*Seeing* Vasantasenā, *in alarm*) Oh! By whom was this slave-by-birth restored to life! My life is [now] finished [lit. has departed]. Well, I shall run away! [*Runs away*

Cāṇḍāla :—(*Approaching*) Oh, surely, such [was] the king's order to us—'Kill him by whom she was destroyed.' So, let us make a search for the king's brother-in-law himself. [*Exeunt*

Cārudatta :—(*In wonder*)

Who is this one come, when the weapon was lifted up against me gone into the mouth [or, jaws] of Death, like a shower from the Droṇa [cloud] on the crop withered [lit. struck down] owing to drought? (39)

(*And beholding*)

[Is] this one a second Vasantasenā? [Or, is she] the same come back, thus from heaven? Or, my wandering mind is seeing this one [not in reality]? [Or] Vasantasenā [was] not dead, and she [is] the same! (40)

Or rather,

[Is it] indeed that she has come again from heaven, with a desire to revive me? Or, is she some other [woman] come, with a form resembling her form! (41)

---

[1] सम्यग्वृष्टि।

वसन्तसेना— (सास्रमुत्थाय पादयोर्निपत्य) अज्जचालुदत्त सा ज्जेव अहं पावा जाए कारणादो इअं तुए असरिसी अवत्था पाविदा। [आर्यचारुदत्त सैवाहं पापा यस्याः कारणादियं त्वयासदृश्यवस्था प्राप्ता।]

(नेपथ्ये) अच्चरिअं अच्चरिअम्। जीवादि वसन्तसेणा। [आश्चर्यमाश्चर्यम्। जीवति वसन्तसेना।]

(इति सर्वे पठन्ति)

चारुदत्तः—(आकर्ण्य सहसोत्थाय स्पर्शसुखमभिनीय निमीलिताक्ष एव हर्षगद्गदाक्षरम्) प्रिये वसन्तसेना त्वम्।

वसन्तसेना—सा ज्जेवाहं मन्दभाआ। [सैवाहं मन्दभाग्या।]

चारुदत्तः—(निरूप्य सहर्षम्) कथं वसन्तसेनैव। (सानन्दम्)

कुतो बाष्पाम्बुधाराभिः स्नपयन्ती पयोधरौ।
मयि मृत्युवशं प्राप्ते विद्येव समुपागता ॥ ४२ ॥

प्रिये वसन्तसेने

त्वदर्थमेतद्विनिपात्यमानं देहं त्वयैव प्रतिमोचितं मे।
अहो प्रभावः प्रियसंगमस्य मृतोऽपि को नाम पुनर्ध्रियेत ॥ ४३ ॥

Vasantasenā :—(*Rising up, with tears, falling at his feet*) Noble Cārudatta, I [am] the same sinful [wretch], on whose account this unworthy condition was attained by you!

(*Behind the curtain*) Wonder! Wonder! Vasantasenā lives.

[*All repeat thus*

Cārudatta :—(*Listening, getting up suddenly, gesticulating pleasure at* Vasantasenā's *touch, with eyes still closed, uttering words choked with joy*) Beloved, [are] you [really] Vasantasenā?

Vasantasenā :—I [am] the very same luckless one!

Cārudatta :—(*Scrutinising, with joy*) How! Vasantasenā herself! (*With delight*)

Bathing [your] breasts with showers of water of tears, whence have you come like [the life-restoring] Vidyā [science], when I had gone under the control of Death! (42)

Beloved Vasantasenā!

This body of mine, while being destroyed on your account, has been released by you yourself! Oh, the [wonderful] power of union with [one's] beloved person! Who, even though dead, could indeed be brought back to life? (43)

अपि च । प्रिये पश्य

रक्तं तदेव वरवस्त्रमियं च माला
कान्तागमेन हि वरस्य यथा विभाति ।
एते च वध्यपटहध्वनयस्तथैव
जाता विवाहपटहध्वनिभिः समानाः ॥ ४४ ॥

वसन्तसेना—अदिदक्खिणदाए किं ण्णेदं ववसिदं अज्जेण। [अतिदक्षिणतया किं न्विदं व्यवसितमार्येण ।]

चारुदत्तः—प्रिये त्वं किल मया हतेति ३

पूर्वानुबद्धवैरेण शत्रुणा प्रभविष्णुना ।
नरके पतता तेन मनागस्मि निपातितः ॥ ४५ ॥

वसन्तसेना—(कर्णौ पिधाय) सन्तं पावम् । तेण म्हि राअसालेण वावादिदा । [शान्तं पापम् । तेनास्मि राजश्यालेन व्यापादिता ।]

चारुदत्तः—(भिक्षुं दृष्ट्वा) अयमपि कः । ३

वसन्तसेना—तेण अणज्जेण वावादिदा । एदिणा अज्जेण जीवाविदम्हि । [तेनानार्येण व्यापादिता । एतेनार्येण जीवं पापितास्मि ।]

चारुदत्तः—कस्त्वमकारणबन्धुः । ६

And further, beloved, see—

That same red [garment] [is] the bride-groom's garment, and this garland appears like [that intended] for a bride-groom by the arrival of [you, my] beloved; and these sounds of the drum at the execution of the condemned person have become similarly equal to the sounds of the marriage-drums ! (44)

Vasantasenā :—What [or, why] indeed was this attempted by the noble one, owing to an extremely generous nature ?

Cārudatta :—Beloved, saying (*iti*) that you indeed were killed by me,

by that antagonist [of mine], who had been on inimical terms with me before, [and] powerful, falling into hell [himself], was I almost (*manāk*) destroyed? (45)

Vasantasenā :—(*Closing her ears*) God forbid [or, let evil be averted] ! By that king's brother-in-law was I killed !

Cārudatta :—(*Seeing* Bhikṣu) Who [is] this one again ?

Vasantasenā:—By that dishonourable [or, wicked] man was I killed ; by this gentleman was I restored to life.

Cārudatta :—Who [are] you, [our] disinterested friend [or, relative] ?

---

१ पततानेन ।

भिक्षुः—ण पच्चभिजाणादि मं अज्जो । अहं शे अज्जश्श चलणशंवाहचिन्तए शंवाहके णाम । जूदिअलेहिं गहिदे एदाए उवाशिकाए अज्जश्श केलके त्ति अलंकालपणणिक्कीदे म्हि । तेण अ जूदणिव्वेदेण शक्कशमणके शंवुत्तेम्हि । एशावि अज्जा पवहणविपज्जाशेण पुप्फकलण्डअजिण्णुज्जाणं गदा । तेण अ अणज्जेण ण मं बहु मण्णेशि त्ति बाहुपाशबलक्कालेण मालिदा । मए दिट्ठा । [न प्रत्यभिजानाति मामार्यः । अहं स आर्यस्य चरणसंवाहचिन्तकः संवाहको नाम । द्यूतकैर्गृहीत एतयोपासिकयार्यस्यात्मीय इत्यलंकारपणनिष्क्रीतोऽस्मि । तेन च द्यूतनिर्वेदेन शाक्यश्रमणकः संवृत्तोऽस्मि । एषाप्यार्या प्रवहणविपर्यासेन पुष्पकरण्डकजीर्णोद्यानं गता । तेन चानार्येण न मां बहु मन्यस इति बाहुपाशबलात्कारेण मारिता । मया दृष्टा ।]

(नेपथ्ये कलकलः) जयति वृषभकेतुर्दक्षयज्ञस्य हन्ता
तदनु जयति भेत्ता षण्मुखः क्रौञ्चशत्रुः ।
तदनु जयति कृत्स्नां शुभ्रकैलासकेतुं
विनिहतवरवैरी चार्यको गां विशालाम् ॥ ४६ ॥

Bhikṣu :—Does not the noble one recognise me? I [am] that professional shampooer of the feet of the noble one, by name Saṁvāhaka. Captured [or, detained] by the gamblers, I was released on payment of a ransom by this [Buddha-] worshipper [simply] because I belonged to [you] the noble one. And owing to that disgust with gambling, I became a Buddhist monk. This lady also, owing to the interchange of cars, had gone to the Puṣpakaraṇḍaka old garden. And [there] by that wicked man was [she] struck down by force with the noose of [his] arms, on the ground that she did not think highly of him. [There] I saw her.

[*A confused noise behind the curtain*

Victorious is the destroyer of the sacrifice of Dakṣa, Śiva [having the bull as his emblem]! After him, victorious is the six-mouthed [Kārtikeya], the enemy of the Krauñca [mountain] [and its] piercer! And after him Āryaka, who has killed [his] powerful enemy, has conquered the whole expansive earth, with the white Kailāsa [mountain] as [its] banner! (46)

(प्रविश्य सहसा) शर्विलकः–हत्वा तं कुनृपमहं हि पालकं भो-
स्तद्राज्ये द्रुतमभिषिच्य चार्यकं तम्।
तस्याज्ञां शिरसि निधाय शेषभूतां
मोक्ष्येऽहं व्यसनगतं च चारुदत्तम् ॥ ४७ ॥

हत्वा रिपुं तं बलमन्त्रिहीनं[1] पौरान्समाश्वास्य पुनः प्रकर्षात्।
प्राप्तं समग्रं वसुधाधिराज्यं राज्यं बलारेरिव[2] शत्रुराज्यम् ॥ ४८ ॥

(अग्रतो निरूप्य) भवतु। अत्र तेन भवितव्यम् यत्रायं जनपदसमवायः। अपि नामायमारम्भः क्षितिपतेरार्यकस्यार्यचारुदत्तस्य जीवितेन सफलः स्यात्। (त्वरिततरमुपसृत्य) अपयात जाल्माः। (दृष्ट्वा। सहर्षम्) अपि ध्रियते चारुदत्तः सह वसन्तसेनया। संपूर्णाः खल्वस्मत्स्वामिनो मनोरथाः।

दिष्ट्या भो व्यसनमहार्णवादपारा-
दुत्तीर्णं गुणभृतया सुशीलवत्या।

[*Entering suddenly*) **Śarvilaka** :—

Having killed that bad king Pālaka, Oh [people], and having hastily installed Āryaka as king on his kingdom, [and] having received on the head his orders, like a garland taken off from an idol, as a gift, I shall be again releasing Cārudatta beset with disaster. (47)

Having killed that enemy lacking in army and ministers, having again inspired confidence in the citizens to a high degree, [by us] has been secured the whole of the enemy's kingdom, with the over-lordship of the earth, like the kingdom of Indra [the enemy of Bala]! (48)

(*Observing in front*) Well. He must be here, where is this [vast] concourse of people. Would this undertaking of king Āryaka be indeed fruitful by [saving] the life of the noble Cārudatta! (*Proceeding very hastily*) Get away, [you] thoughtless people. (*Seeing, with joy*) Is Cārudatta alive, along with Vasantasenā? The desires of our master are indeed fully satisfied!

Oh, luckily I am seeing after a long time [Cārudatta] like the moon freed from eclipse and rich in moon-light, emerging out of the vast boundless ocean of calamity, by [the help of

---

१ बलमन्त्र। २ सुरारे।

नावेव प्रियतमया चिरान्निरीक्षे
ज्योत्स्नाढ्यं शशिनमिवोपरागमुक्तम् ॥ ४९ ॥

तत्कृतमहापातकः कथमिवैनमुपसर्पामि । अथवा सर्वत्रार्जवं शोभते । (उपसृत्य बद्धाञ्जलिः प्रकाशम्) आर्यचारुदत्त ।

3 **चारुदत्तः**—ननु को भवान् ।

शर्विलकः—येन ते भवनं भित्त्वा न्यासापहरणं कृतम् ।
सोऽहं कृतमहापापस्त्वामेव शरणं गतः ॥ ५० ॥

चारुदत्तः—सखे मैवम् । त्वयासौ प्रणयः कृतः । (इति कण्ठे गृह्णाति)

शर्विलकः—अन्यच्च आर्यकेणार्यवृत्तेन कुलं मानं च रक्षता ।
पशुवद्यज्ञवाटस्थो दुरात्मा पालको हतः ॥२१॥

चारुदत्तः—किम् ।

शर्विलकः—त्वद्यानं यः समारुह्य गतस्त्वां शरणं पुरा ।
पशुवद्वितते यज्ञे हतस्तेनाद्य पालकः ॥ ५२ ॥

---

his] beloved endowed with virtues and possessed of very noble character, as by a boat held fast by ropes and of good build. (49)

Then, how possibly shall I, who have committed a great sin, approach him ? Or, straight-forwardness appears to advantage everywhere. (*Approaching with folded hands, aloud*) Noble Cārudatta !

Cārudatta :—I say, who [are] you ?

Śarvilaka :—

By whom was stolen the deposit, after breaking through your house—that [same] I, who have committed a great sin, have come to you yourself, for protection. (50)

Cārudatta :—Friend, not so. That was [an act of] kindness done by you. [*Embraces him*

Śarvilaka :—And further,

By Āryaka of honourable conduct, preserving [his] family [honour] and self-respect, was killed the villain Pālaka occupying the sacrificial court, like the victim-animal [in the sacrifice] ! (51)

Cārudatta :—What ?

Śarvilaka :—

He who formerly, having mounted your car, approached you for protection,—by him was killed to-day, Pālaka, like the victim-animal [in the sacrifice], while a sacrifice was being performed. (52)

चारुदत्तः—शर्विलक योऽसौ पालकेन घोषादानीय निष्कारणं कूटागारे बद्ध आर्यकनामा त्वया मोचितः ।

शर्विलकः—यथाह तत्रभवान् ।

चारुदत्तः—प्रियं नः प्रियम् ।

शर्विलकः—प्रतिष्ठितमात्रेण तव सुहृदार्यकेणोज्जयिन्यां वेणातटे कुशावत्यां राज्यमतिसृष्टम् । तत्प्रतिमान्यतां प्रथमः सुहृत्प्रणयः । (परिवृत्य) अरे रे आनीयतामयं पापो राष्ट्रियशठः ।

(नेपथ्ये) यथाज्ञापयति शर्विलकः ।

शर्विलकः—आर्य नन्वयमार्यको राजा विज्ञापयति—इदं मया युष्मद्गुणोपार्जितं राज्यम् । तदुपयुज्यताम् ।

चारुदत्तः—अस्मद्गुणोपार्जितं राज्यम् ।

(नेपथ्ये) अरे रे राष्ट्रियश्यालक एह्येहि । स्वस्याविनयस्य फलमनुभव ।

(ततः प्रविशति पुरुषैराधिष्ठितः पश्चाद्बाहुबद्धः शकारः)

Cārudatta :—Śarvilaka, the same who was bound down in a secret dungeon without any cause by Pālaka, after being brought from the hamlet, by name Āryaka [and] released by you [afterwards]?

Śarvilaka :—As your honour says.

Cārudatta :—Very agreeable to us, very agreeable.

Śarvilaka :—By your friend Āryaka, the moment he was established, has been presented [to you] the kingdom of Kuśāvatī on the banks of the Veṇā, in [the province of] Ujjayinī. So, let [this] first request of [your] friend be honoured [by acceptance]. (*Turning round*) Oh, you ! Let this sinful rascal, the king's brother-in-law be brought [here].

(*Behind the curtain*) As Śarvilaka commands.

Śarvilaka :—Sir, I say, here requests [you] King Āryaka—' This kingdom was secured by me through your virtues. So, let it be enjoyed [by you].'

Cārudatta :—Kingdom secured through our virtues !

(*Behind the curtain*) O you king's brother-in-law, come, come. Experience the fruit of your roguery.

(*Then enter* Śakāra *escorted by the guards, with hands tied on the back*)

शकारः—हीमादिके

एव्वं दूलमदिक्कन्ते उद्दामे विअ गद्दहे ।
आणीदे क्खु हगे वद्धे कुडे अण्णे व्व दुक्कले ॥ ५३ ॥

(दिशोऽवलोक्य) शमन्तदो उवट्ठिदे एशे लश्टिअबन्धे । ता कं दाणिं अशलणे शलणं वज्जामि । (विचिन्त्य) भोदु । तं ज्जेव अब्भुववण्णशलणवच्छलं गच्छामि । (इत्युपसृत्य) अज्जचालुदत्त पलित्ताआहि पलित्ताआहि । [आश्चर्यम्

एवं दूरमतिक्रान्त उद्दाम इव गर्दभः ।
आनीतः खल्वहं बद्धः कुक्कुरोऽन्य इव दुष्करः ॥

...समन्तत उपस्थित एष राष्ट्रियबन्धः। तत्कमिदानीमशरणः शरणं व्रजामि।...भवतु। तमेवाभ्युपपन्नशरणवत्सलं गच्छामि । ...आर्यचारुदत्त परित्रायस्व परित्रायस्व ।]

(इति पादयोः पतति)

(नेपथ्ये) अज्जचालुदत्त मुञ्च मुञ्च । वावादेम्ह एदम् । [आर्यचारुदत्त मुच्च मुञ्च । व्या[1]पादयामैतम् ।]

शकारः—(चारुदत्तं प्रति) भो अशलणशलणे पलित्ताआहि । [भो अशरणशरण परित्रायस्व ।]

चारुदत्तः—(सानुकम्पम्) अहह अभयमभयं शरणागतस्य ।

Śakāra :—Oh wonder !

[Although] gone so far away, like a donkey unrestrained, have I been indeed brought [back here] bound, like another ill-mannered [or, rabid] dog. (53)

(*Looking to the quarters*) Here on all sides, is the hemming in of the king's brother-in-law ! So, whom now shall I, helpless [that I am], approach for protection ? (*Thinking*) All right ; I shall go right to him [who is] affectionate towards those who approach [him] for protection. (*Approaching*) Noble Cārudatta, help, help. [*Falls at his feet*

(*Behind the curtain*) Noble Cārudatta, leave [him], leave. Let us kill him.

Śakāra :—(*To* Cārudatta) O [you] shelter for the shelterless ! Save [me].

Cārudatta :—(*Compassionately*) Alas ! Freedom from fear, freedom from fear to [you] who have approached for protection [I promise].

---

[1] ...यामैनम ।

शर्विलकः—(सावेगम्) आः अपनीयतामयं चारुदत्तपार्श्वात् । (चारु-
दत्तं प्रति) ननूच्यतां किमस्य पापस्यानुष्ठीयतामिति । १५

आकर्षन्तु सुबद्धैनं श्वभिः संखाद्यतामथ ।
शूले वा तिष्ठतामेष[1] पाट्यतां क्रकचेन वा ॥ ५४ ॥

चारुदत्तः—किमहं यद्ब्रवीमि तत्क्रियते ।

शर्विलकः—कोऽत्र संदेहः ।

शकारः—भट्टालआ चालुदत्त शलणागदे म्हि । ता पलित्ताआहि ३
पलित्ताआहि । जं तुए शलिशं तं कलेहि । पुणो ण ईदिशं कलिश्शम् । [भट्टा-
रक चारुदत्त शरणागतोऽस्मि । तत्परित्रायस्व परित्रायस्व । यत्तव सदृशं तत्कुरु
पुनर्नेदृशं करिष्यामि ।] ६

(नेपथ्ये) पौराः वावादेध । किंणिमित्तं पादकी जीवावीअदि । [पौराः
व्यापादयत । किंनिमित्तं पातकी जीव्यते ।]

(वसन्तसेना वध्यमालां चारुदत्तस्य कण्ठादपनीय शकारस्योपरि क्षिपति) ९

शकारः—गब्भदाशीधीए पशीद पशीद । ण उण मालइश्शम् । ता पलि-
त्ताआहि । [गर्भदासीपुत्रि प्रसीद प्रसीद । न पुनर्मारयिष्यामि । तत्परित्रायस्व ।]

Śarvilaka :—(*Vehemently*) Oh ! Let him be removed from near Cārudatta. (*To* Cārudatta) I say, please tell,—what should be done with this sinner ?

Should they drag him away, after being tightly bound ?
And should [he] be devoured by the dogs ? Or, should [he] stay
on the stake [impaled] ? Or, should [he] be sawed down with
a saw ? (54)

Cārudatta :—Would what I say be done ?

Śarvilaka :—What doubt, here ?

Śakāra :—Master, Cārudatta ! I have approached [you] for protection. So, save [me], save. Do what becomes you. I shall not act in such a way again.

(*Behind the curtain*) Citizens, kill [or, lynch him]. What for is the criminal to live ?

[Vasantasenā, *removing the garland, the emblem of the condemned person, from* Cārudatta's *neck, throws it on* Śakāra.

Śakāra :—[O] daughter of the slave-by-birth, be pleased, be pleased. I shall not again kill [you]. So, save [me].

---

[1] भियता ।

शर्विलकः—अरे रे अपनयत । आर्यचारुदत्त आज्ञाप्यताम्—किमस्य पापस्यानुष्ठीयताम् ।]

चारुदत्तः—किमहं यद्ब्रवीमि तत्क्रियते ।

शर्विलकः—कोऽत्र संदेहः ।

चारुदत्तः—सत्यम् ।

शर्विलकः—सत्यम् ।

चारुदत्तः—यद्येवं शीघ्रमयं

शर्विलकः—किं हन्यताम् ।

चारुदत्तः—नहि नहि । मुच्यताम् ।

शर्विलकः—किमर्थम् ।

चारुदत्तः—शत्रुः कृतापराधः शरणमुपेत्य पादयोः पतितः ।
शस्त्रेण न हन्तव्यः

शर्विलकः—एवम् । तर्हि श्वभिः खाद्यताम् ।

चारुदत्तः—नहि ।
उपकारहतस्तु कर्तव्यः ॥ ५५ ॥

शर्विलकः—अहो आश्चर्यम् । किं करोमि । वदत्वार्यः ।

Śarvilaka :—O you, remove [him]. Noble Cārudatta, please order—what should be done with this sinner ?

Cārudatta :—Would what I say be done ?

Śarvilaka :—What doubt, here ?

Cārudatta :—True ?

Śarvilaka :—True.

Cārudatta :—If so, quickly [let] this one

Śarvilaka :—What, be killed ?

Cārudatta :—No, not at all—be released !

Śarvilaka :—What for ?

Cārudatta :—

An enemy [although] committing an offence, fallen on the feet, having sought protection, should not be killed with a weapon,

Śarvilaka :—All right ; then-let [him] be devoured by dogs ?

Cārudatta :—Not indeed,—
should be made one killed by obligations ! (55)

Śarvilaka :—Oh, wonder ! What shall I do ? Let the noble one speak out.

चारुदत्तः—तन्मुच्यताम् ।

शर्विलकः—मुक्तः ।

शकारः—हीमादिके । पच्चुज्जीविदे म्हि । [आश्चर्यम् । प्रत्युज्जीवितोऽस्मि ।]
(इति पुरुषैः सह निष्क्रान्तः) (नेपथ्ये कलकलः)

(पुनर्नेपथ्ये)एसा अज्जचालुदत्तस्स वहुआ अज्जा धूदा पदे वसणञ्चले विलग्गन्तं दारअं आक्खिवन्ती वाप्फभरिदणअणेहिं जणेहिं णिवारिज्जमाणा पज्जलिदे पावए पविसदि । [एषार्यचारुदत्तस्य वधूरार्या धूता पदे वसनाञ्चले विलगन्तं दारकमाक्षिपन्ती बाष्पभरितनयनैर्जनैर्निवार्यमाणा प्रज्वलिते पावके प्रविशति ।]

शर्विलकः—(आकर्ण्य नेपथ्याभिमुखमवलोक्य) कथं चन्दनकः । चन्दनक किमेतत् ।

चन्दनकः—(प्रविश्य) किं ण पेक्खदि अज्जो । महाराअप्पासादं दक्खिणेण महन्तो जणसंमद्दो वट्टदि । (एसा इत्यादि पुनः पठति) कधिदं अ मए तीए जधा— अज्जे मा साहसं करेहि । जीवदि अज्जचारुदत्तो त्ति । परं तु दुक्खवावुडदाए को सुणेदि को पत्तिआएदि । [किं न पश्यत्यार्यः । महाराजप्रासादं दक्षिणेन महाञ्जनसंमर्दो वर्तते । ...कथितं च मया तस्यै यथा—आर्ये मा साहसं कुरुष्व । जीवत्यार्यचारुदत्तः इति । परं तु दुःखव्यापृततया कः शृणोति कः प्रत्ययते ।]

Cārudatta :—So, let [him] be set free.

Śarvilaka :—[He is] freed.

Śakāra :—Wonderful ! I have been restored to life !

[*Exit with the guards*

[*A confused noise behind the curtain*

(*Again, behind the curtain*) Here is the noble Dhūtā, wife of the noble Cārudatta, pulling away the son clinging to [her] feet [and] the hem of [her] garment, entering into the blazing fire [though] being warded off by people with [their] eyes filled with tears !

Śarvilaka :—(*Listening, looking towards the curtain*) How ! Candanaka [has come] ! Candanaka, what [is] this ?

(*Entering*) **Candanaka** :—What ! Does not the noble one see ? There is, to the south of the King's palace a huge concourse of the people. (*Repeats* ' *Here* ' *etc. again*). And I [actually] told her thus—' Lady, do not do [this] rash deed. The noble Cārudatta does live. ' But owing to being overcome with grief, who listens, who believes ?

चारुदत्तः—(सोद्वेगम्) हा प्रिये जीवत्यपि मयि किमेतद्व्यवसितम् । (ऊर्ध्वमवलोक्य दीर्घं निःश्वस्य च)

न महीतलस्थितिसहानि भवच्चरितानि चारुचरिते यदपि ।
उचितं तथापि परलोकसुखं न पतिव्रते तव विहाय पतिम् ॥ ५६ ॥

(इति मोहमुपगतः)

शर्विलकः—अहो प्रमादः ।

त्वरया सर्पणं तत्र मोहमार्योऽत्र चागतः ।
हा धिक्प्रयत्नवैफल्यं दृश्यते सर्वतोमुखम् ॥ ५७ ॥

वसन्तसेना—समस्ससिदु अज्जो । तत्त गदुअ जीवावेदु अज्जाम् । १ अण्णधा अधीरत्तणेण अणत्थो संभावीअदि । [समाश्वसित्वार्यः । तत्र गत्वा जीवयत्वार्याम् । अन्यथाधीरत्वेनानर्थः संभाव्यते ।]

चारुदत्तः—(समाश्वस्य सहसोत्थाय) हा प्रिये कासि । देहि मे प्रतिवचनम् ।

Cārudatta :—(*Despondently*) Alas ! Beloved ! Even though I am alive, what is this determined upon [by you] ? (*Looking upwards, and sighing heavily*)

Even though your doings, [O you] of charming [or, noble] behaviour, are not worthy of association [that is, are too noble to be associated] with [lit. stay on] the earth-region, still, enjoyment in the other world [that is, heaven], [O] chaste one, [is] not proper on your part, leaving [your] husband [on the earth] ! (56)

[*Faints away*

Śarvilaka :—Oh, the disaster !

Proceeding there hastily [is absolutely necessary] ; here has the noble one got into a swoon. Alas ! Fie ! Fruitlessness of efforts is [to be] seen on all sides [lit. facing everywhere] ! (57)

Vasantasenā :—Be comforted, noble one. Going there, you should make the noble lady live. Otherwise, owing to hasty action [on her part] a disaster would possibly result.

Cārudatta :—(*Recovering, getting up suddenly*) Alas ! Beloved, where are you ? Give me a reply.

चन्दनकः—इदो इदो अज्जो। [इत इत आर्यः।] (इति सर्वे परिक्रामन्ति)

(ततः प्रविशति यथानिर्दिष्टा धूता चेलाञ्चलमाकर्षन्विदूषकेणानुगम्यमानो रोहसेनो रदनिका च)

धूता—(सास्रम्) जाद मुञ्चेहि मम्। मा विग्घं करेहि। भीआमि अज्जउत्तस्य अमङ्गलाकण्णणादो। [जात मुञ्च माम्। मा विघ्नं कुरुष्व। बिभेम्यार्यपुत्रस्यामङ्गलाकर्णनात्।] (इत्युत्थायाञ्चलमाकृष्य पावकाभिमुखं परिक्रामति)

रोहसेनः—माद अज्जए पडिवालेहि मम्। तुए विणा ण सक्कुणोमि जीविदं धारेदुम्। [मातरार्ये प्रतिपालय माम्। त्वया विना न शक्नोमि जीवितं धारयितुम्।]

(इति त्वरितमुपसृत्य पुनरञ्चलं गृह्णाति)

विदूषकः—भोदीए दाव बम्हणीए भिण्णत्तणेण चिदाधिरोहणं पावं उदाहरन्ति रिसीओ।[भवत्यास्तावद्ब्राह्मण्या भिन्नत्वेन चिताधिरोहणं पापमुदाहरन्ति ऋषयः।]

धूता—वरं पावाचरणे। ण उण अज्जउत्तस्स अमङ्गलाकण्णणम्। [वरं पापाचरणम्। न पुनरार्यपुत्रस्यामङ्गलाकर्णनम्।]

शर्विलकः—(पुरोऽवलोक्य) आसन्नहुतवहार्या। तत्त्वर्यतां त्वर्यताम्।

(चारुदत्तस्त्वरितं परिक्रामति)

Candanaka :—This way, this way, sir. [*All move about*

(*Then enter* Dhūtā *as described*, Rohasena *dragging the skirts of her garment*, *being followed by* Vidūṣaka, *and* Radanikā)

Dhūtā :—(*With tears*) Darling, leave me. Do not put any obstacle [in my way]! I am afraid of hearing the inauspicious news about my Lord. [*Rising up, snatching away her skirts, moves about towards the fire*

Rohasena :—Mother, Mamma, wait for me. I can not remain alive [lit. bear life] without you. [*Approaching quickly, again holds her skarts*

Vidūṣaka :—In the case of you, a Brāhmaṇa woman, for the matter of that, the sages declare mounting the funeral fire separately [or, independently, without the husband's body] a sin.

Dhūtā :—Better committing [that] sin, but not hearing inauspicious news about my Lord!

Śarvilaka :—(*Looking in front*) The noble lady [is quite] near the fire. So, make haste, make haste!

[Cārudatta *moves about in haste*

धूता—रआणिए अवलम्ब दारअम् । जाव अहं समीहिदं करेमि । [रदनिके अवलम्बस्व दारकम् । यावदहं समीहितं करोमि ।]

चेटी—(सकरुणम्) अहं पि जधोवदेसिणीम्हि भट्टिणीए । [अहमपि यथोपदेशिन्यास्मि भट्टिन्याः ।]

धूता—(विदूषकमवलोक्य) अज्जो दाव अवलम्बेदु [आर्यस्तावदवलम्बताम् ।]

विदूषकः—(सावेगम्) समीहिदसिद्धिए पउत्तेण बम्हणो अग्गदो कादव्वो । अदो भोदीए अहं अग्गणी होमि । [समीहितसिद्ध्यै प्रवृत्तेन ब्राह्मणोऽग्रे कर्तव्यः । अतो भवत्या अहमग्रणीर्भवामि ।]

धूता—कधं पच्चादिट्ठम्हि दुवेहिं । (बालकमालिङ्ग्य) जाद तुमं ज्जेव पज्जवट्ठावेहि अत्ताणं अम्हाणं तिलोदअदाणाअ । अदिक्कन्ते किं मणोरहेहिं । (सनिःश्वासम्) ण क्खु अज्जउत्तो तुमं पज्जवट्ठाविस्सदि । [कथं प्रत्यादिष्टास्मि द्वाभ्याम् ।...जात त्वमेव पर्यवस्थापयात्मानमस्माकं तिलोदकदानाय । अतिक्रान्ते किं मनोरथैः । ...न खल्वार्यपुत्रस्त्वां पर्यवस्थापयिष्यति ।]

चारुदत्तः—(आकर्ण्य सहसोपसृत्य) अहमेव पर्यवस्थापयामि बालिशम् । (इति बालकं बाहुभ्यामुत्थाप्य वक्षसालिङ्गति)

Dhūtā :—Radanikā, take hold of the boy, while I carry out [my] desire

Ceṭī :—(*Piteously*) I too would be acting as instructed by [the actual example of my] Mistress.

Dhūtā :—(*Looking to* Vidūṣaka) May the noble one hold [or, take care of him] for the matter of that.

Vidūṣaka :—(*In a flurry*) A Brāhmaṇa should be given precedence [lit. placed at the head or in front] by one starting action for the accomplishment of the desired object. So, I shall be going ahead of you [in this matter].

Dhūtā :—How, I have been repudiated by both of them ! (*Embracing the boy*) Darling, do you alone look after yourself, for [the purpose of] offering libations of sesamum-water to us ! What [use] of [that is, entertaining] desires, when [the object has] gone beyond reach ! (*Sighing*) My Lord can not indeed look after you !

Cārudatta :—(*Listening, suddenly approaching*) I alone would be taking care of [my] naughty boy ! [*Lifting up the boy with his arms, embraces him by the bosom*

धूता—(विलोक्य) अम्हहे। अज्जउत्तस्स ज्जेव सरसंजोओ। (पुनर्निपुणं निरूप्य सहर्षम्) दिट्ठिआ अज्जउत्तो ज्जेव एसो। पिअं मे पिअम्। [आश्चर्यम्। आर्यपुत्रस्यैव स्वरसंयोगः ।...दिष्ट्यार्यपुत्र एवैषः। प्रियं मे प्रियम्।]

बालकः—(विलोक्य सहर्षम्) अम्मो। आवुको मं परिस्सजदि। (धूतां प्रति) अज्जए वड्ढीआसि। आवुको ज्जेव मं पज्जवट्ठावेदि। [आश्चर्यम्। तातो मां परिष्वजते।...आर्ये वर्धसे। तात एव मां पर्यवस्थापयति।] (इति प्रत्यालिङ्गति)

चारुदत्तः—(धूतां प्रति)

हा प्रेयसि प्रेयसि विद्यमाने कोऽयं कठोरो व्यवसाय आसीत्।
अम्भोजिनी लोचनमुद्रणं किं भानावनस्तंगमिते करोति॥ ५८॥

धूता—अज्जउत्त अदो ज्जेव सा अचेतणत्ति चुम्बीअदि[1]। [आर्यपुत्र अतएव साचेतनेति चुम्ब्यते।]

विदूषकः—(दृष्ट्वा सहर्षम्) ही ही भो एदेहिं ज्जेव अच्छीहिं पिअवअस्सो पेक्खीअदि। अहो सदीए पहावो जदो जलणप्पवेसव्ववसाएण ज्जेव पिअसमागमं पाविदा। (चारुदत्तं प्रति) जेदु जेदु पिअवअस्सो। [आश्चर्यं भोः एताभ्यामेवाक्षिभ्यां प्रियवयस्यः प्रेक्ष्यते। अहो सत्याः प्रभावः यतो ज्वलनप्रवेशव्यवसायेनैव प्रियसमागमं प्रापिता।...जयतु जयतु प्रियवयस्यः।]

Dhūtā :—(*Seeing*) O wonder! [This is] a voice of my Lord himself! (*Again, carefully scrutinising, with joy*) Luckily, it [is] my Lord himself! Very agreeable to me, very agreeable!

Bālaka :—(*Beholding with joy*) Wonder! Papa is embracing me! (*To* Dhūtā) Mamma, you are prospering! Papa himself would be looking after me! [*Embraces in return*

Cārudatta :—(*To* Dhūtā)

Alas! Beloved! When [your] beloved [husband] was [actually] alive, what [or, how] was this cruel determination [on your part] ? Does the [sun-]lotus-creeper effect the closing of the eyes [the lotus-petals], while the sun is [still] not gone to set? (58)

Dhūtā :—My Lord, for that very reason, she is kissed, because inanimate!

Vidūṣaka :—(*Seeing, with joy*) Ha! Ha! Oh! [My] dear friend is being seen [by me] with these very eyes! Oh, the power of a chaste wife, in that, merely by the determination to enter into the fire, she has secured union with [her] dear husband. (*To* Cārudatta) Victory, victory to [my] dear friend!

---

[1] उच्चीअदि।

चारुदत्तः—एहि मैत्रेय । (इत्यालिङ्गति)

चेटी—अहो संविधाणअम् । अज्ज वन्दामि । [अहो संविधानकम् । आर्य वन्दे ।] (इति चारुदत्तस्य पादयोः पतति)

चारुदत्तः—(पृष्ठे करं दत्त्वा) रदनिके उत्तिष्ठ । (इत्युत्थापयति)

धूता—(वसन्तसेनां दृष्ट्वा) दिट्ठिआ कुसलिणी बहिणिआ । [दिष्ट्या कुशलिनी भगिनी ।]

वसन्तसेना—अहुणा कुसलिणी संवुत्तम्हि । [अधुना कुशलिनी संवृत्तास्मि ।] (इत्यन्योन्यमालिङ्गतः)

शर्विलकः—दिष्ट्या जीवितसुहृद्वर्ग आर्यः ।

चारुदत्तः—युष्मत्प्रसादेन ।

शर्विलकः—आर्ये वसन्तसेने परितुष्टो राजा भवतीं वधूशब्देनानुगृह्णाति ।

वसन्तसेना—अज्ज कदत्थम्हि । [आर्य कृतार्थास्मि ।]

शर्विलकः—(वसन्तसेनामवगुण्ठ्य चारुदत्तं प्रति) आर्य किमस्य भिक्षोः क्रियताम् ।

Cārudatta :—Come on, Maitreya ! [*Embraces him*

Ceṭī :—Oh, the wonderful set of circumstances ! Sir, I salute [you]. [*Falls at* Cārudatta's *feet*

Cārudatta :—(*Putting her on the back*) Radanikā, rise up. [*Helps her to get up*

Dhūtā :—(*Seeing* Vasantasenā) Thank God ! [My] sister [is] hale and hearty.

Vasantasenā :—*Now*, I have become hale and hearty. [*They embrace each other*

Śarvilaka :—Luckily, the noble one has the [whole] circle of [his] friends alive [and safe] !

Cārudatta :—Through your favour !

Śarvilaka :—Lady, Vasantasenā, the King highly pleased [with you] favours you with the title of ' Vadhū ' [a law-fully wedded wife].

Vasantasenā :—Sir, I have [now] all my desires fulfilled.

Śarvilaka :—(*Putting the veil on* Vasantasenā, *to* Cārudatta) Sir, what shoud be done with this Bhikṣu ?

चारुदत्तः—भिक्षो किं तव बहुमतम् ।

भिक्षुः—इमं ईदिशं अणिच्चत्तणं पेक्खिअ दिउणतले मे पव्वज्जाए बहुमाणे संवुत्ते । [इदमीदृशमनित्यत्वं प्रेक्ष्य द्विगुणतरो मम प्रव्रज्यायां बहुमानः संवृत्तः ।] २६

चारुदत्तः—सखे दृढोऽस्य निश्चयः । तत्पृथिव्यां सर्वविहारेषु कुलपतिरयं क्रियताम् ।

शर्विलकः—यथाहार्यः । २७

भिक्षुः—पिअं णो पिअम् । [प्रियं नः प्रियम् ।]

वसन्तसेना—संपदं जीवाविदम्हि । [सांप्रतं जीवापितास्मि ।]

शर्विलकः—स्थावरकस्य किं क्रियताम् । ३०

चारुदत्तः—सुवृत्तः अदासो भवतु । ते चाण्डालाः सर्वचाण्डालानामधिपतयो भवन्तु । चन्दनकः पृथिवीदण्डपालको भवतु । तस्य राष्ट्रियश्यालस्य यथैव क्रिया पूर्वमासीत् वर्तमाने तथैवास्यास्तु । ३१

शर्विलकः—एवं यथाहार्यः । परमेनं मुञ्च मुञ्च । व्यापादयामि ।

Cārudatta :—Bhikṣu, what is most desired by you ?

Bhikṣu :—Seeing this transitoriness of such kind [of earthly objects], my high regard for renunciation has become doubly strengthened !

Cārudatta :—Friend, [quite] fixed [is] his determination ! So, let him be made the Chief monk [Archbishop] over all convents in the country [lit. on the earth] !

Śarvilaka :—As the noble one says.

Bhikṣu :—Very agreeable to us, very agreeable.

Vasantasenā :—Now, I have been [fully] restored to life !

Śarvilaka :—What should be done with Sthāvaraka ?

Cārudatta :—Let him of excellent conduct be freed from bondage ! Let those Cāṇḍālas be the Chiefs of all Cāṇḍālas ! Let Candanaka be the Chief of the Police in the [whole] country. Whatever status [or, work] was there formerly for the king's brother-in-law, let the same be there for him even in the present.

Śarvilaka :—[It would be] thus as the noble one says. But [still], leave him [Śakāra, alone], leave. I [want to] kill [him].

43

चारुदत्तः—अभयं शरणागतस्य । (शत्रुः कृतापराधः (१०–५५) इत्यादि
३६ पठति)

शर्विलकः— तदुच्यतां किं ते भूयः प्रियं करोमि ।

चारुदत्तः—अतःपरमपि प्रियमस्ति ।

लब्धा चारित्रशुद्धिश्चरणनिपतितः शत्रुरप्येष मुक्तः
प्रोत्खातारातिमूलः प्रियसुहृदचलामार्यकः शास्ति राजा ।
प्राप्ता भूयः प्रियेयं प्रियसुहृदि भवान्संगतो मे वयस्यो
लभ्यं किं चातिरिक्तं यदपरमधुना प्रार्थयेऽहं भवन्तम् ॥ ५९ ॥

कांश्चित्तुच्छयति प्रपूरयति वा कांश्चिन्नयत्युन्नतिं
कांश्चित्पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान् ।
अन्योन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं बोधय-
न्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः ॥ ६० ॥

तथापीदमस्तु—(भरतवाक्यम्)

Cārudatta :—Freedom from fear to him who has approached for protection ! [*Repeats* '*An enemy* [*although*] *offending*' *etc. X-55*

Śarvilaka :—Then, speak out what further very agreeable thing I should do to you.

Cārudatta :—Is there any further very agreeable thing than this ?

The clearing off of [my] character has been accomplished; this enemy too, fallen at [my] feet has been set free ; [my] dear friend Āryaka who has exterminated the [very] roots of [his] enemies, rules over the earth [as] king ; this beloved has been again secured ; you united with [my] dear friend [Āryaka] [have now become] my friend ; what else [beyond this] remains to be secured which I should be now asking you for ? (59)

It empties or fills up some ; it elevates some and makes some undergo falling down, and makes some anxious ; [thus] making [all] realise this state of things in the world—the mutual union of opposites—here does fate move in sport, indulging in the maxim of the 'Well-machine and buckets' ! (60)

Still, let there be this—

(*The concluding Benediction by the Actors*)

क्षीरिण्यः सन्तु गावो भवतु वसुमती सर्वसंपन्नसस्या
पर्जन्यः कालवर्षी सकलजनमनोनन्दिनो वान्तु वाताः ।
मोदन्तां जन्मभाजः सततमभिमता ब्राह्मणाः सन्तु सन्तः
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवो धर्मनिष्ठाश्च भूपाः ॥ ६१ ॥

(इति निष्क्रान्ताः सर्वे)

इति संहारो नाम दशमोऽङ्कः।

समाप्तं मृच्छकटिकम् ।

May cows be abounding in milk; may the earth have crops thriving in every way; may rain be falling at proper times; may winds blow on, delighting the minds of all people; may [all] creatures be greatly delighted [or, happy], the Brāhmaṇas always respected; may good men be endowed with wealth and may kings protect the earth, with [their] enemies subjugated, and devoted to righteousness [or, piety]. [61]

[*Exeunt Omnes*

Here ends the Tenth Act, called ' Saṁhāra ' [Winding up]

Here ends [the play] Mṛcchakaṭika [The Clay-cart]

NOTES

The Mṛcchakaṭika opens with two verses for its Nāndī (नन्दन्ति देवताः अस्याम् अनया वा, or नन्दयतीति) which is therefore अष्टपदा (if we understand पद् to mean 'a line' or 'a quarter of a verse'). For the definition of the term Nāndī, see Appendix A.

(1) CONSTRUE : पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानोः, अन्तःप्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य, आत्मनि आत्मानम् एव तत्त्वदृष्ट्या व्यपगतकरणं पश्यतः शंभोः शून्येक्षणघटितलयब्रह्मलग्नः समाधिः वः पातु । (शार्दूलविक्रीडितम्)

पर्यङ्के ग्रन्थिबन्धेन द्विगुणितानां भुजगानाम् आश्लेषेण संवीते जानुषी यस्य ; अन्तः प्राणानाम् अवरोधेन व्युपरतं सकलं ज्ञानं तेन (or, येषां तानि) रुद्धानि इन्द्रियाणि यस्य ; विशेषेण अपगतं करणं यथा स्यात्तथा ; शून्येन ईक्षणेन घटितः यः लयः तेन ब्रह्मणि लग्नः. This verse describes the Samādhi or state of profound meditation on the Highest Self, when the Ātman is realised within oneself, with the distinction between ज्ञातृ, ज्ञान and ज्ञेय being completely obliterated. (This is the निर्विकल्पक समाधि, the highest stage ; in the सविकल्पक समाधि, the knower retains the consciousness that he is the perceiver etc. The expressions आत्मानमेव and तत्त्वदृष्ट्या in the third line, and शून्येक्षण...in the fourth line, clearly point out that it is the निर्विकल्पक समाधि that is referred to here). Naturally enough, in the Samādhi state, the sense-organs which enable one to perceive the external world, cease to function, so also the five vital airs or prāṇas and the अन्तःकरण. The Yogaśāstra recommends different postures or आसनs to enable one to concentrate one's mind on the Highest, with ease and comfort. And it is only after a long patient practice of these, coupled with the observance of various rules and regulations regarding the conduct of body and mind, that one is able to reach the stage of Samādhi (यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा and ध्यान,—these seven Aṅgas or means of attaining Yoga, have to be mastered before Samādhi, the last step of the ladder is reached). पर्यङ्क...' Kālidāsa in his Kumāra (III. 45, 48 and 50) describes Śiva's' Samādhi in a similar strain (Read, पर्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं संनमितोभयांसम्। उत्तानपाणिद्वयसंनिवेशात्प्रफुल्लराजीवमिवाङ्कमध्ये ॥). Śiva was sitting with his legs on his thighs (somewhat like the position 'sitting load' in musketry practices), the upper part of the body being straight and erect, and the hands placed on the lap. This is what is technically called a पर्यङ्क or वीरासन which is described as एक पादमथैकस्मिन् विन्यस्योरुणि संस्थितम् । इतरस्मिंस्तथा चोरुं वीरासनमुदाहृतम् ॥ (वसिष्ठः). Śiva also wears serpents as ornaments over his person. In the पर्यङ्क posture the भुजगाश्लेष would naturally be द्विगुणित and would be covering up the knees. Some take पर्यङ्क to mean the योगपट्टक which is described as पृष्ठजान्वोः समायोगे वस्त्रं वलयवद् दृढम् । परिवेष्ट्य यदूर्ध्वजानुस्तिष्ठेत्तद्योगपट्टकम् ॥ But then द्विगुणित loses much of its force as going with भुजग, and the knees could hardly be said to be covered up by the योगपट्टक, which is tied below the knee, going round the back. One commentator explains as follows—पर्यङ्कस्य साधारणखट्वायाः ग्रन्थः पादैः सह तिर्यग्दण्डानां संयोगस्थले यो बन्धो बन्धनरज्जुः तद्वत्... एतेन यथा पादैः सह तिर्यग्दण्डानां संधिदेशे द्विगुणितरज्जुभिर्दृढबद्धतया उपरि गुरुतरभारपातेऽपि खट्वायाः स्खलनं न संभवति तथा सर्पेण जानुयुगलस्य दृढबद्धतया एकभावेन सदीर्घकालमप्युपविष्टस्य कदाचिदसहत्वादतर्कितभावेन पद्मासनस्य स्खलनं न संभवतीति दर्शितम्. This hardly seems satisfactory. अन्तः... Cf. अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम् । (Kumāra III. 48). The प्राणs are five. हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥ (केचित्तु नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति । तत्र नाग उद्गिरणकरः । कूर्म उन्मीलनकरः । कृकलः क्षुत्करः । देवदत्तो जृम्भणकरः । धनञ्जय पोषणकरः । Vedāntasāra). In a Samādhi, the vital airs cease to function and the body remains absolutely steady ; the same is the case with the Indriyas (cf. मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम् । Kumāra III. 50; the नवद्वारs are नयनश्रवणे द्वे द्वे नासिके वदनं तथा । पायूपस्थौ च देहेऽस्मिन् नवद्वाराणि देहिनाम् ॥) which are eleven, five ज्ञानेन्द्रियs (eye, ear, nose, tongue and touch), mind, and five कर्मेन्द्रियs ; here the five ज्ञानेन्द्रियs are meant. In order to realise the Paramātman, a person must look inwards ; the Indriyas all look outwards, and so, the knowledge of the Ātman can never be had from them (पराञ्चि खानि व्यस्तृणत्स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन्). The mind has therefore to be withdrawn from the senses and concentrated on the self in the हृदयाकाश or the दहराकाश. आत्मन्या... Cf. यमक्षरं वेदविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम् ॥ Kumāra III. 50 ; यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ Gita VI. 20. व्यपगतानि करणानि यथा तथा, व्यपगतकरणं goes with पश्यतः. आत्मसाक्षात्कार or self-realisation does not require any करणs or means for its production, because all the करणs cease to function at that time: hence, only तत्त्वदृष्टि can be responsible for any 'seeing' effected in the form of अहं ब्रह्मास्मि. शून्ये..., लय is एकतानताप्रवाहः or complete absorption; the ईक्षण is शून्य, because it ignores the whole of the external phenomena.

(2) The poet praises in this verse the कण्ठ of Śiva. नीलकण्ठ is an epithet of Śiva, on account of the नील colour of his कण्ठ, which was the result of his drinking the Hālāhala poison, one of the fourteen 'jewels' churned out of the ocean by the gods and the demons. The other 'jewels,' such as लक्ष्मी, कौस्तुभ, पारिजात etc. were readily taken possession of by the big gods Viṣṇu and others; no one however volunteered to take the poison. Śiva took it and had to keep the moon on his head to allay the burning effect of the poison, which however did succeed in making his कण्ठ, नील or dark. A water-cloud is also dark-coloured. गौरी—an epithet of Pārvatī (योगाग्निदग्धदेहा सा पुनर्जाता हिमालये । शङ्खेन्दु-कुन्दधवला ततो गौरी तु सा स्मृता ॥). Her hand is compared to विद्युल्लेखा, the common property being 'brilliance or splendour.'

Bharata lays down that the Nāndī should be Kāvyārthasūcaka, that is, it should be suggestive of the plot of the play. This is not always the case, but commentators often make very fantastic efforts to make the Nāndī of a play suggest some incidents in it by hook or crook. The first verse of the present Nāndī can hardly be made to be Kāvyārthasūcaka; in the second verse, Gaurī and Nīlakaṇṭha can be said to suggest Vasantasenā and Cārudatta; and the expressions श्यामाम्बुद and विद्युल्लता suggest that their meeting is going to take place in thunder, lightning and in rain! I. 2. 1—नान्द्यन्ते सूत्रधारः—The Nāndī is the concluding prayer of the Pūrvaraṅga, an elaborate religious ceremony performed to appease the stage-deity, before the actual representation of the play commenced. In practice, the Pūrvaraṅga came to be abridged a good deal, only the Nāndī being religiously performed. The Sūtradhāra recites the Nāndī, and then either he himself or the Sthāpaka (an actor similar to him) carries on the Prologue to the play. No stage-direction is given before the Nāndī, because the play proper commences after it, and because the Maṅgala-śloka should have nothing whatsoever preceding it. सूत्रधार—The Manager who holds, as it were, the threads of the play in his hands (सूत्रं धारयतीति, नाट्यस्य यदनुष्ठानं तत्सूत्रं स्यात्सबीजकम्). The name appears to have been derived from that of an exhibitor of dolls and paper figures, exhibitions representations which of which seem to have preceded dramatic were evolved out of them. परिषद्—the assembly, the audience, possessing, according to the Nāṭyaśāstra, the following qualifications, अव्यग्रैरिन्द्रियैः शुद्ध ऊहापोहविशारदः । व्यक्तदोषोऽनुरागी च स नाट्ये प्रेक्षकः स्मृतः ॥ यस्तुष्टे तुष्टिमायाति शोके शोकमुपैति च । दैन्ये दीनत्वमभ्येति स नाट्ये प्रेक्षकः स्मृतः ॥ XVII 51-52. अलं परिश्रमेण—The stock expression is अलमतिविस्तरेण. The विस्तर or परिश्रम refers not to the extent of the Nāndi, but to that of the whole Pūrvaraṅga; hence we find this expression used even in the Uttararāmacarita which has a single small verse for its Nāndī. I. 2. 2—आर्यमिश्रान्—मिश्र is an honorific affix. An आर्य is thus described—कर्तव्यमाचरन् काममकर्तव्यमनाचरन् । तिष्ठति प्रकृताचारे स तु आर्य इति स्मृतः ॥ Or कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता । अद्रोह इति येष्वेतत्तानार्यान्संप्रचक्षते ॥ मृच्छकटिकम्—This can be interpreted in two ways:—(1) मृदः शकटिका, or मृदा निर्मिता शकटिका—a toy-cart made of earth. This word is then metaphorically identified with the play, the identification being based upon प्रतिपाद्यप्रतिपादकभाव. It thus becomes an adjective to प्रकरण, and so we get the neuter form मृच्छकटिकम्. The adjective मृच्छकटिकम् again is to be understood as a noun in the sense of the play of that name, according to Vāmana's dictum विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ । Or, (2) मृच्छकटिका वर्ण्यते यस्मिन् तत् (a case of व्यधिकरणबहुव्रीहि compound). Though the play contains various other matters, the name is to be justified according to the maxim प्राधान्येन व्यपदेशा भवन्ति. (See Introduction, for the appropriateness of the name मृच्छकटिक). I. 2. 3—प्रकरणम्—See Introduction.

(3) द्विरदानां (द्वौ रदौ यस्य सः द्विरदः an elephant) or द्विरदेषु इन्द्रः (the best, the Lord) तस्य गतिः इव गतिः यस्य—the gait of an elephant is majestic and dignified, cf. धीरोद्धता नमयतीव गतिर्धरित्रीम् । Uttara VI चकोरस्य नेत्रे इव नेत्रे यस्य, the eyes of the Cakora are reddish in colour. and they are said to become redder still at the sight of poison, In Raghu VI, Indumati is addressed as चकोराक्षि. शोभनः विग्रहः (body) यस्य. A द्विज is a member of the first three castes, Brāhmaṇa, Kṣatriya and Vaiśya, who alone are entitled to the संस्कारs. (जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते). Here द्विज apparently means a Kṣatriya. कविः—एतत्कविः...कविर्बभूव, to remove the tautology, कवि should be taken in one case to mean 'author,' 'scholar.'

(4) This verse describes in brief, the whole career of King Śūdraka. He was a well-read man, conversant with both religious and profane literature, arts and sciences, specially

mathematics or astronomy, and the science of training elephants. He was a worshipper of Śiva who cured him of some eye-disease. He performed an Aśvamedha sacrifice and having lived for full one hundred years and ten days, ended his life by throwing himself into the fire. ऋग्वेद—the chief Veda of the four Vedas. It contains prayers to different deities like Indra, Agni, Varuṇa etc. सामवेद contains hymns mostly taken from the Ṛgveda, and is to be chanted or sung. गणितम्—mathematics, also astronomy and astrology. वैशिकी— वेशे भवा,—वेश means the abode of the courtesans, and the courtesans were expected to be proficient in singing, dancing etc. So, वैशिकी कला may mean 'fine arts in general.' Or, वेश means 'dress' and वैशिकी कला, the art of putting on dress suitable for different characters. Some take वेश to refer to king अग्निवेश (the contraction being on the lines of राम for बलराम or भामा for सत्यभामा). वैशकी कला thus meaning 'the Science founded by Agniveśa.' हस्तिशिक्षा—The reputed authors of works on हस्तिशिक्षा, are पालकाप्य, गौतम, मृगचर्मन् and others. Kālidāsa in Raghu VI. 27 describes the king of the Aṅgas as having his elephants trained by the very founders of the science of हस्तिशिक्षा. King Śūdraka was well-versed in हस्तिशिक्षा; hance the propriety of the expression परवारणबाहुयुद्धलुब्धः in the next verse. शर्व is an epithet of Śiva. व्यपगतं तिमिरं यस्मात्...—तिमिर darkness, that is, ignorance; having secured the right knowledge of Ātman; or तिमिर means 'the तिमिर disease which makes a man blind'. Śūdraka had his eye-sight restored to him as a result of Śiva's favour (just as the poet Mayūra was cured of leprosy, through the favour of the Sun, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, Kāvyaprakāśa I). अश्वमेध—A sacrifice where a horse is the sacrificial victim, अश्वः मेध्यते अत्र. Only a universal monarch could perform this sacrifice (अये अश्वमेध इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महानुत्कर्षनिकषः। Uttara IV). अग्निं प्रविष्टः—Śūdraka seems to have ended his life by throwing himself into the fire (अज in Raghu VIII throws himself into the sacred waters at the confluence of the Ganges and the Śarayu). As committing suicide is forbidden by the Śāstras (अन्धतामिस्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते। Uttara IV), commentators are unwilling to understand अग्निं प्रविष्टः in a literal sense. According to them, the expression is to be understood metaphorically in the sense of 'died'. We fail to see why the expression should not be taken literally. It must be remembered that Śūdraka had overstepped the limit of a hundred years for life and after installing his son on the throne he might have, even with Śāstric justification, thought of terminating his life voluntarily! (Read the following quotation from Mallinātha's commentary on Raghu VIII. 94—अत्र पुराणवचनम्—समासक्तो भवेद्यस्तु पातकैर्महदादिभिः । दुश्चिकित्स्यैर्महारोगैः पीडितो वा भवेत्तु यः ॥ स्वयं देहविनाशस्य काले प्राप्ते महामतिः । आब्रह्माणं वा स्वर्गादिमहाफलजिगीषया । प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनं तथा ॥ एतेषामधिकारोऽस्ति नान्येषां सर्वजन्तुषु ॥ नराणामथ नारीणां सर्ववर्णेषु सर्वदा ॥) Śūdraka could easily be regarded to have taken this step स्वर्गादिमहाफलजिगीषया !

(5) ककुदं—ककुद् literally means 'the hump of a bull,' hence श्रेष्ठ, eminent. परवारणबाहुयुद्धलुब्धः—This expression can be interpreted in a number of ways :—(1) परेषां (of the enemies) वारणाः तैः सह बाहुयुद्धे लुब्धः, (2) पराः (powerful, eminent) वारणाः तैः..., in both these interpretations, वारण means an 'elephant' and in view of the special mention of हस्तिशिक्षा in the last verse, it appears that the poet wants to refer to Śūdraka's daring in fighting with the elephants by his bare arms. Another meaning suggested is—(3) परेषां वारणाभ्यां (वारण repelling, going with बाहु) बाहुभ्यां युद्धे लुब्धः· This is unsatisfactory, as we have to divide here the expression बाहुयुद्ध. समरव्यसनी, who had a great partiality for battle; that is, a great warrior, welcoming every opportunity to show his valour in battle.

(6) अवन्तिपुरी the modern Ujjayini, perhaps the most famous city referred to in Sanskrit literature. The women of अवन्ति are described as आवन्त्य एव निपुणाः सुदृशो रतनर्मणि। द्विजश्चासौ सार्थवाहश्च—सार्थवाह—a leader of a caravan, a merchant. Cārudatta was a Brāhmaṇa by birth, but a merchant by profession. Mr. Kale prefers to take the expression to mean 'a leader of the Brāhmaṇa community' and suggests that the epithet सार्थवाह was retained as a family title. He says that Cārudatta was not a merchant 'because he says भैक्षेण in III. 26. and not वाणिज्येन which he would have done, had he been a merchant.' Mr. Kale seems to have altogether ignored the अपि in भैक्षेणापि which completely gives his case way. Cārudatta was going to have recourse to भैक्ष as a last resort and not 'because it is proper for a Brāhmaṇa to beg' as Mr. Kale tells us. It appears that owing to a series of reverses and great gifts in charity, Cārudatta had to curtail

his expenses and business as well, and had practically retired from active business. वसन्तसेना—The names of courtesans should usually end in दत्ता or सेना (दत्तासेनान्तनामानि वेश्यानां कल्पयेत् सुधीः ।). Supply बभूव as the verb. The reading तस्य for यस्य in the second line makes the construction easier.

(7) इदं—this play. Mr. Kale rejects this meaning on the ground that thereby the construction would be an absurd one—अस्यां च तत्कृतौ इदं प्रकरणं चकार. But when we take इदं to mean प्रकरणं, अस्यां च तत्कृतौ might be connected with stanza 6 only and stanza 7 can be understood independently. We are told in this verse, that the poet in the present play has concentrated upon depicting the following four things: (1) नयप्रचार (Śūdraka often uses his words very loosely, and the student will come across many instances of looseness of construction as well in this play) (i) the progress of state-craft, referring to the revolution, or (ii) उपायविधान, the use of various remedies, or (iii) proper course of conduct, exemplified in the doings of the hero and the heroine; (2) व्यवहारदुष्टता, wrong legal procedure, as in Cārudatta's trial in Act IX. व्यवहार is also used in the play in other senses, such as 'complaint,' 'court of law, and 'affairs in general:' (3) खलस्वभाव—as exemplified in the character of Śakāra; (4) भवितव्यता—the miraculous escape of Cārudatta and Vasantasenā from death, the installation of Āryaka as king, King Pālaka's murder etc.

The passage from एतत्कविः किल (I. 2. 3) to the end of Stanza 7, is obviously from the pen of some one other than Śūdraka, as the use of expressions like प्रविष्टः (Stanza 4), बभूव (Stanza 5), and चकार (Stanza 7) shows. (One commentator tries to justify the contention that these passages were written by Śūdraka himself, by the argument that Śūdraka being a गणितज्ञ, could foretell his own death, and, so himself wrote the passages as they would be repeated by the Sūtradhāra after his death! This, of course, is hardly convincing). But that does not mean that the personal account about Śūdraka given therein should not be regarded as a substantially faithful one. I. 7. 1—अस्मत्, this shows that the Sūtradhāra was a music-master there, so he describes the संगीतशाला as अस्मत्संगीतशाला. शून्या—This is intended to suggest the penury of the hero. I. 7. 2—कुशीलवाः, actors, bards, कुत्सितं शीलमस्ति एषाम् or कुशीलं वान्ति, referring to the low morality prevalent amongst the actors, musicians etc. The word is also derived from कुश and लव, who were the first to recite the Rāmāyaṇa, and were regarded as the founders of bardic poetry.

